BRAHMA SUTRA VRITTI

BY

SADASIVENDRA SARASVATI.

SRI VANI VILAS
SASTRA SERIES.

— No. 6. —

Brahmasutra Vritti.

BY

SADASIVENDRA SARASVATI,
Author of Atma Vidya Vilasa etc.

Srirangam:

SRI VANI VILAS PRESS.

1909.

॥ ओम् ॥

ब्रह्मतत्त्वप्रकाशिका

नाम

॥ ब्रह्मसूत्रवृत्तिः ॥

श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीपरम
शिवेन्द्रसरस्वतीपादाब्जसेवापरायण
श्रीसदाशिवेन्द्रसरस्वत्या
विरचिता ।

श्रीरङ्गनगरे
श्रीवाणीविलासमुद्रायन्त्रालये
संमुद्रिता ।
१९०९.

PREFACE.

THIS is a precious ancient work by Sadasivendra Sarasvati—one of the greatest of Rajayogins of Southern India whose life-sketch appears elsewhere in this volume. The existence of this work was first made known to me by His Holiness Sri Jagadguru of Sringeri who commanded me to bring out a good edition of this as well as the other works of Sri Sadasivendra Sarasvati. I accordingly set out in search of Manuscripts when to my great astonishment the very next day Brahmasri Venkatarama Dikshitar of Tiruchendurai came to me with a palm-leaf Manuscript of this very work and asked me to have it printed and published. With great joy I took it to His Holiness of Sringeri who was much pleased to find me in actual possession of a Manuscript so soon. While this Manuscript was being fair copied I was able to get two more Manuscripts, one from Mr. Krishnaswamy Sastrigal B.A. B.L., Vakil of Tanjore, the grandson of Brahmasri Mahalinga Sastrigal of Tiruvasanallur, and another through the kindness of Mr. K. Sundararama Aiyar M.A., of Kumbaconam from one of his friends Mr. Subbaier. With these manuscripts in my possession, I began the work in right earnest and I take this opportunity to thank the above-mentioned gentlemen for having helped me with the Mss. I have great pleasure in also acknowledging with thanks the ready

help rendered me by Brahmasri Rama Sastrigal, Dharmadhikari of Mysore and of Sri Sringeri Mutt, Brahmasri S. Kuppuswamy Sastrigal, M.A., Principal, Sanskrit College, Mylapore, Pandit R. V. Krishnamachariar, Abhivana Bhatta Bana and Pandit S. Subrahmanya Sastrigal of Tanjore, but for whose active co-operation it would not have been possible for me to have brought out such a good and accurate edition of the work in such a short time. Whenever there was any doubt as to the accuracy of any of the readings, it was at once taken to the notice of His Holiness Sri Jagadguru of Sringeri and his decisions were adopted. In short, no pains have been spared to make this edition as neat and accurate as possible. The Index of Sutras and Adhikaranas will, it is hoped, add much to the usefulness of the book.

SRIRANGAM.
20th January 1909.

T. K. Balasubrahmanyam.

॥ श्रीः ॥

॥ भूमिका ॥

इयं हि 'ब्रह्मतत्त्वप्रकाशिका' नाम ब्रह्मसूत्रवृत्तिः सुप्रसिद्धसर्वविधमहामहिमभिः श्रीसदाशिवब्रह्मेन्द्रसरस्वतीभिः विरचिता। यद्यप्यद्वैतमतानुसारिण्यो बह्वयो वृत्तयः सन्ति, समुपलभ्यन्ते च मुद्रिताः; अथापि तासु एकापि इयमिव ललितललितपदगुम्भिता, अतिविशदविषयविमर्शविभासुरा, प्रतिसूत्रं प्रत्यधिकरणं प्रतिपादं प्रत्यध्यायं च स्फुटं संगतिनिरूपणरमणीया परिमिताक्षरा, विषयबहुला, परिमितप्रज्ञैरपि सुबोधा, अध्यात्मविद्यासौधमारुरुक्षूणां प्रथमसोपानायमाना च नास्तीति निर्भयं वदतामस्माकं नांशतोऽपि स्पृशति हृदयमतिशयोक्तिरिति, मन्यामहे, नियतं जानीयुरेव पुस्तकदर्शनेन सर्वेऽपि समचित्ताः। इयं च महामहिम्नां ज्ञानभक्तिवैराग्यतपःपरमधाम्नां संप्रति श्रीशृङ्गगिरिमठमात्मना परिष्कुर्वतां षड्दर्शनीनिष्णातानां जगद्गुरूणां श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिनाम् अतिप्रशस्तामाज्ञामनुसृत्यैव मुद्रापयितुमुपक्रान्ता। सुशुद्धाश्च प्राचीनाश्चानेके आदर्शा आनीता एतन्मुद्रणोपयो-

गितया । एतत्परिशोधनाय सर्वथापि सामीचीन्यसंपादनाय ब्रह्मश्रीयुताः पण्डितवरेण्याः महीशूरसंस्थानधर्माधिकारिणः श्रीशृङ्गगिरिमठविद्वांसः श्रीमन्तः रामशास्त्रिणः, मैलापुरीस्थ-गीर्वाणभाषामहापाठशालाप्रधानाध्यापकाः एम्. ए. परीक्षोत्तीर्णाः श्रीमन्तः कुप्पुस्वामिशास्त्रिणः, अभिनवभट्टबाणादिबिरुदशालिनः पण्डितकृष्णमाचार्याः, तञ्जानगरस्थाः पण्डितसुब्रह्मण्यशास्त्रिणश्च महान्तं प्रयासमङ्गयकार्षुरिति सुबहु धारयामो वयं कृतज्ञास्तेभ्यः । तत्र तत्र संशयावसरे च श्रीमतां शृङ्गगिरिमठाधिपतीनां श्रीमहास्वामिनामादेशमनुरुध्य पाठयोजनादिकमक्रियत । आदौ योजितायां च आङ्गलभाषाभूमिकायां श्रीसदाशिवब्रह्मेन्द्राणां जीवनचरितम्, सुप्रथितो महिमा, वृत्तेश्चास्या गौरवम्, अन्यान्यानि च ऐतिह्यतः श्रुतानि श्रीब्रह्मेन्द्राणामपदानानि निरूपितानि । अपदानानि च भूयसा श्रीशृङ्गगिरिस्वामिपादैराज्ञप्तानि निवेशितानि । यदि च अत्युत्तमेयं वृत्तिः जिज्ञासूनामुपकाराय कल्पते, आद्रियते च विद्वद्भिः तर्हि सर्वविधोऽपि परिश्रमोऽस्माकं सफल इति सतोषं संभावयामः ।

टि. के. बालसुब्रह्मण्यः.

SADASIVENDRA SARASVATI.

A SKETCH.



श्रीसदाशिवेन्द्रसरस्वती ।

Sadasivendra Sarasvati.

SADASIVENDRA Sarasvati or Sadasiva Brahman as he is more familiarly known, was a great *Sanyasin* and was the last genuine representative of the school of *Rajayogins* that flourished in Southern India. He lived in the beginning of the 18th Century, more than a hundred and fifty years ago, near the modern town of Karur. For the details of his life we have to draw mainly upon tradition, but there is every reason to believe that much of it is very reliable. For several of the incidents in the life of this great Sage, which we are about to narrate in this sketch, we are gratefully indebted to the gracious condescension on the part of His Holiness Sri Sachchidananda Sivabhinava Nrisimha Bharati Swami who now adorns the Mutt of Sringeri and whose high regard for Sadasiva Brahman may be gathered from his precious little work known as "Sadasivendra Stuti"— a collection of stotras in praise of Sadasivendra Sarasvati— composed by His Holiness while on a visit to the great Rajayogi's Samadhi at Nerur.

Sadasiva is represented to have been exceptionally smart and brilliant in his student days. It was at Tiruvisanallur, a village in the Tanjore District, on the

banks of the sacred stream Kaveri, embowered among groves of mangoes and cocoanuts, that Sadasiva's student days were cast. This village was at the time peculiarly blessed in her teachers and pupils. There was Ramabhadra Dikshita, a scholar of no mean repute and the famous author of the drama—the Janaki Parinaya; there was also Sri Venkatesa, yet in his teens with all those potentialities in him which were to ripen in the fulness of time and make of him a heart-stirring preacher and writer, whose noble life and fervid words have earned for him the undying glory of the Saint Divine, whose Akhyasashti, Dayasataka and other works have an earnestness and a pathos rarely met with elsewhere and whose name under the more respected and familiar title of Ayyaval, is invoked even this day by hundreds of devotees in Southern India with grateful strains and uplifted hands; there was Gopalakrishna, also a student, who came to be known as Mahabhashyam Gopalakrishna Sastri, so styled because of his learned commentary on the Patanjali's Mahabhasya and who was afterwards to become the spiritual preceptor of the Tondamans of Pudukota; and there was Sadasiva, the subject of our sketch, a student yet, the most gifted of a gifted set, the most brilliant of a glorious band of students, each of whom was afterwards to leave his mark on earth—'foot-prints on the sands of time'—that have been a guide and an inspiration to many a forlorn heart. He is said to have been much given to arguing, to raise topics of discussion with his teacher who invariably seems to have come out only second best on

these occasions. Towards the close of his student life, news came that his young wife had come of age in a distant village and accordingly his happy mother was preparing a few extra dishes in honor of the occasion. When Sadasiva returned from his teacher's quarters he found his dinner delayed an hour in consequence. While thus waiting for his dinner he reflected as follows, "Married life has just shown the symptoms of dawning and I have already to pay for it with an hour's fasting. This is but a prelude to the misery of the family life to come". So he immediately made up his mind against the married state and accordingly went in search of a spiritual preceptor. From this day he began to display an utter aversion to the so called pleasures of the world and his heart melted for the suffering millions. His habits became cosmopolitan. He cared for neither caste nor creed. All were equal in his eyes. He would eat anything that was given him and that from the hand of any one without distinction. On the days on which no food was offered to him he used to make a sumptuous meal from the refuse leaves thrown in the street. People did not understand the true Mahatma that was hidden behind his appearance and Sadasiva was to them only a crazy youth. He soon found his preceptor Parama Sivendra Saraswati and began under him his apprenticeship in Yoga. He made great progress alike in his studies and practice. It must have been during this period that he wrote the works and *Kirtanas* that are now left behind to remind us of his mighty persona

lity. His *Kirtanas* or songs are sweetly lyrical and breathe a lofty idea. They show the trend his thoughts were now taking and show his ear for music. He soon became an adept in Yoga under his master's guidance. He composed about this time a short but very sweet poem on the glory of self-realisation. This poem —Atma-vidya Vilasa— consists of 62 Stanza in Arya Metre and describes the greatness of a Yogin who has realised Self, his conquest over the passions, his indifference to praise or censure, his overflowing sympathy with all living beings and his revel in beatific bliss. Such a glorous life was now his ideal and he expresses in the poem his ardent thirst for the realisation of his ideal which was not long in coming. Tradition has it that Sadasiva used to worry with a number of questions all persons who came to his preceptor and thus shame them into silence. This practice was so much resented by the people that they one day reported it to Paramasivendra Sarasvati who on hearing it became a bit annoyed and exclaimed "Sadasiva, when will you learn to keep your mouth shut?" The student perceived his folly and to effectually prevent the transgressions of that unruly member, his tongue, took thenceforth a vow of lifelong silence. He prostrated himself before his teacher, begged forgiveness for his fault, took leave of his master and went out a homeless, speechless mendicant, trying to realise in himself the lofty ideals he had set forth in the Atma-vidya Vilasa.

Henceforth he lived the life of a wanderer never staying anywhere for any length of time, never once opening his mouth, but when absolutely necessary expressing his thoughts by gesture or by writing on the ground. Little by little he was trying to gain mastery over his natural fiery spirit. One morning he was found lying in a field, resting his head on the embankment that divided field from field. The labourers that passed by remarked that one who had given up the world still found it necessary to have a support for the head. Next morning the labourers passed by the same way and saw Sadasiva lying in the same place but without any support for the head this time. There-upon they wondered how one who professes to scorn all earthly things, could still be so sensitive to criticism. This incident was soon after related to Sri Venkatesa who is said to have given vent to his thoughts in the following couplet.

तृणतुलिताखिलजगतां करतलकलिताखिलरहस्यानाम् ।
श्लाघावारवधूटीघटदासत्वं सुदुर्निरसम् ॥

"Even to those who hold the world as valueless as a straw and who have mastered all the secrets, even to such it is difficult to cease to be slaves to the strumpet fame.

Such little failures as these were however only stepping stones which led him to the highest heights of Yoga. He now finally left the scenes of his youth and spent his days on the lovely banks of the Amaravati and the Kaveri in the Coimbatore District. His days he would

spend in the bed of the river meditating on the Unknowable and the Unknown. Many a time and oft would he be seen wandering aimlessly, as it were, like a mad man with a strange far off look in his upturned eyes, his mind perfectly unconcsious of what passed around him and his energies concentrated on Self. When it was reported to Sri Paramasivendra Sarasvati that his disciple was wandering thus like a mad man, he seems to have regretted that such madness did not overtake himself.

उन्मत्तवत्संचरतीह शिष्य-
स्तवेति लोकस्य वचांसि शृण्वन् ।
खिद्यन्नुवाचास्य गुरुः पुराहो
ह्युन्मत्तता मे न हि तादृशीति ॥

Now would he be seen to plunge into the groves far and wide that lay stretched on either side of the sacred stream and remain lost to view for many a day Now would he be seen lying upon the white undulating sands of these rivers. Once while thus reposing on the sands of the Kaveri near Kodumudi, one of those sudden floods that often rush through the stream without notice, came and carried off the unconscious Yogin and buried him on the sands in its onward sweeping course. The villagers on the banks who were the spectators of the scene were quite powerless to help the Yogin and quietly returned to their homes deeply regretting the calamity which they thought had befallen the great Sage whom they looked upon with awe and reverence. Three months passed by and when the freshes in

the river subsided and water became scarce, the village officers went to the river for erecting the usual *Korambu.* While one of the labourers plunged his spade deep into the bed, lo ! it came into contact with some obstruction. The surprised workman drew out the spade and beheld with consternation a few drops of blood tripping down his tool. All the officers and workmen now gathered around him and dug a deep pit round the spot and wonder of wonders ! they found buried deep in the sand our great Mahatma, his several limbs lying in different directions and himself lost in Samadhi. They carefully dug him out complete and thus roused into consciousness, this mighty Saint whose 'soul was like a star and dwelt apart' looked about him as if just risen out of deep slumber and after a few minutes, went his way as if nothing in the world had happened to him.

On another occasion in a village near Karur a certain ryot harvested his fields and as it was rather late in the day to measure the harvested paddy, he simply had it collected into a heap so that he may have it measured next morning, marked it with special marks lest it might be stolen and ordered eight of his servants to mount guard over the heap during night. The ryot of course went his way and at about midnight when it was pitch dark, our Sage in the course of his wanderings came that way and stumbled over the paddy heap. The guards, who were on the other side immediatly ran up to him

with sticks in their uplifted hands and found our Yogin lying on the heap with his hands outstreched. They wanted to severely castigate him but lo! such was the greatness of our Sage, they found their hands fixed without any motion whatever. They became absolutely powerless to move their hands from their uplifted position and there in that posture they stood throughout the night, mute with astonishment till their master returned in the morning and found them in that sad plight. When the master and the servants were conversing, our Yogin stood up and went his way and on his departure the servants regained control over their arms.

On another occasion during the superior officer's camp in a certain village the village *Talayaris* were ordered to bring fuel for the camp. These men collected the fuel from an adjoining forest and had it tied into several bundles. Each one of them took a bundle on his head and in the end they found one more bundle remaining. Just at that time it so happened that our Sage was passing by that way. Finding him to be a robust person these *Talayaris* put that remaining bundle on his head and dragged him also along with them to the camp. There when all the bundles were heaped together, Sadasiva's bundle was thrown over them last. And that very moment the whole heap caught fire to the utter bewilderment of all the on-lookers.

Thus he was a great and a born *Siddha* though many mistook him for an insane person, as all great

men are generally apt to be by the ordinary run of mankind. Children especially liked him much, for it is usual with children to play tricks round one whom they consider to be insane, especially when they feel sure that his insanity does not endanger their personal safety. One of his greatest delights was to distribute among these children whatever he received from the people in charity. On a certain day, and that was the day of Vrishabbavahanam festival in Madura, the children whose curiosity was probably excited by the description they heard at home of the grand festival, said to Sadasiva "Father, (for that was the general term by which the children addressed the subject of our sketch) will you take us to Madura to-night. There the God Mahesa will march to-night in a grand procession on the Bull. We wish to enjoy the sight." This request was evidently offered in frolicsome derision, as the children thought it beyond all possibility for their curiosities to be satisfied. They didn't know that Sadasiva was a Siddha and that of a high order. He signed to the children to mount on his head, back and shoulders and other parts of the body. The children enjoyed the fun very much and when he wanted them to shut their eyes for a second they did so. The next moment when they opened their eyes, lo! they beheld themselves all in Madura before the very God in procession on the Bull. Sweetmeats, nuts and all sorts of things that children love were supplied them in profusion by our Sage and thus the children fully enjoyed the festival. Before

dawn they were all brought back to their homes by the same process by which they were taken to Madura. The morning dawned. Every child began to relate to his anxious parents in sweet words its marvellous adventures of the previous night and showed the sweetmeats, some of which still remained unconsumed.

On several occasions such as Mahasivaratri, Gokulashtami etc. he was seen simultaneously in several places. While people here were observing his doings on such important festival days, those that came from Benares, Muttra, Rameswaram etc. positively averred that they saw him there on those very days.

A certain brahmachari, who was quite illiterate, wanted to be blessed by our Sage and so followed him wherever he went. At last the Sage got mercy on him and began to encourage him by gestures. One day the brahmachari said that he was eager to witness the Diety Ranganatha at Srirangam and our Sage desired him to close his eyes. On re-opening the same, he found himself and the Sage standing in the presence of God Ranganatha at Srirangam witnessing the *Nirajana*. A moment later the Sage disappeared and the brahmachari searched for him all over the place. Not finding him anywhere he slowly returned to Nerur where he found the Sage in deep meditation. When he recapitulated his experience to the people there, they would not at first believe it since they said the Yogi did not at all leave their presence throughout those days. But in the end they believed the brahmachari and admired the greatness of the Yogi. Some

years afterwards the Sage took compassion on the brahmachari and blessed him with some Mantras. The brahmachari immediately began to expound all the Puranas to learned audiences and became an adept in such expositions, so much so, that he was generously rewarded by several kings and grants of several plots of land were made to him at Nerur for his proficiency in the Puranas. It is stated that his descendants are still enjoying these lands.

On another occasion our Yogi in the course of his wanderings entered the camp of a Muhamadan Chief. The Chief was resting in the camp with his ladies, who were all of course *Gosha*, and when he observed an *Avadhuta* entering the presence of *Gosha* ladies he became terribly enraged, rose up immediately, drew his sword and in his wrath cut off one of the arms of the Sage. The Sage did not at all mind it but went his way as usual without even noticing that his arm has been chopped off. This behaviour of the Sage, this absolute indifference to the maiming of his own limb, greatly struck the Mahamadan Chief who immediately recognised that the object of his wrath was a mighty Saint. So he deeply repented for his folly and followed the Sage wherever he went like his own shadow. After several days the Yogi turned back and noticed the Mahamadan following him. When questioned as to why he was thus following, the Mahamadan regretted very much that he had committed an extremely grave fault and begged for forgiveness and blessings. Sadasiva could not understand what

fault the Mahamadan had committed and so asked him about it. The Mahamadan implored forgiveness for his having cut off one of his arms. It was only then that Sadasiva found out the fact and when he passed his other arm over the maimed one, the latter also became whole. The Mahamadan became mute with astonishment and craved for Sadasiva's blessings. It is stated that Sadasiva blessed him and went his way as usual. This incident is referred to in the following Slokas of Sadasivendra Stuti.

योऽनुत्पन्नविकारः बाहौ म्लेच्छेन छिन्नपतितेऽपि ।
अविदितममतायास्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥

पुरा यवनकर्तनस्रवदमन्दरक्तोऽपि यः
पुनः पदसरोरुहप्रणतमेनमेनोनिधिम् ।
कृपापरवशः पदं पतनवर्जितं प्राप यत्
सदाशिवयतीट् स मय्यनवधिं कृपां सिञ्चतु ॥

Sadasiva used to go to temples and while seeing the Diety there, he used to repeat the Archanas and for every Archana that he uttered a flower would of its own accord fall on the head of the Diety.

न्यपतन्सुमानि मूर्धनि येनोच्चरितेषु नामसूम्रस्य ।
तस्मै सिद्धवराय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥

It may be hard to believe all these anecdotes whose number is legion (only a few of them being given here), but they persist in living. We all know that nothing is impossible for a *Siddha* and Sadasiva Brahmendra was undoubtedly one of the greatest of *Siddhas*. His mind

was ever and anon concentrated on the Self. He cared for nothing of this world. He always besmeared himself with mud and ashes and considered the whole Universe to be absolutely worthless—much below the mud and ashes he was wearing. His realisation of the Supreme Brahman was such that even his Guru praised and envied him.

निजगुरुपरमशिवेन्द्रश्लाघितविज्ञानकाष्ठाय ।
निजतत्त्वनिश्चलहृदे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥

He rose above the whole Universe and was always immersed in eternal Bliss. He cared not for food or drink. He roamed wherever he willed with none to dispute his sway. The several directions were his clothes. In short he was living in the world, though himself always out of it, a really grand and magnificient beacon light for all time to come, for persons that hanker after spiritual wisdom. A true Mahatma he was—certainly the divine manifestation of a true Siddha.

It was about 1738 A. D. that Sadasiva roamed into the forests adjoining Tiruvarangulam a few miles off Pudukotah. While wandering in these extensive forests he was seen by the then ruler of Pudukotah State—Vijaya Raghunatha Tondaman (1730—1769) who was known by his more familiar name Sivajnana Puram Dorai. This Tondaman was a religious man and spent much of his time in pious meditations in the forests adjoining a lake which still bears his name. Pleased with the single minded devotion of the Tondaman who clung to the Sage

for about eight years with a steadfastness which precluded all chances of evasion, Sadasiva wrote down on the sand certain religious instructions and by the same method directed him for further information to his fellow pupil Gopalakrishna Sastri who was then living in Bhikshandarkoil in the Trichinopoly District. This Sastri was accordingly invited to the Court and by a copperplate *Sasana* dated 1738 A.D. that still exists, grants of land were made to him and other brahmans who came with him into the State. The Dusserah celebrations as well as the worship of Dakshinamurty in the Palace Temple were now instituted on the lines laid down by Sadasiva. The sand on which the Sage had written the instructions was carefully brought to the palace shrine and is still preserved there with religious veneration and worshipped as the holy relic of the great Sage. From the advent of Sadasiva followed a bright and prosperous period for the State and the Tondamans trace all their glory and eminence to the spiritual influence of the Sage. Sadasiva did not stay long in these forests, but wandered on wherever his feet led him, spreading sunshine and happiness wherever he went. He is supposed to have travelled even as far as Turkey in Europe. After a long life of silent meditation he, one day, told the brahmins of Nerur that on a particular day (Jyeshtha Suddha Dasami in the month of Mithuna) he intended to attain Beatific Union with the Supreme Being and if the villagers were prepared for the event on that day a brahmin would be coming with a *Banalinga* from Benares

which should be consecreated in a temple by the side of his *Samadhi.* They accordingly awaited the mentioned date, when to their surprise a brahmin turned up from Benares with the *Banalinga.* And into the pit specially dug out, the great Jivanmukta descended of his own accord and merged with the Parabrahman. The people assembled performed the necessary ceremonies and had the temple erected by the side of the Samadhi and the *Banalinga* consecrated therein. It is stated that this Jivanmukta attained *Samadhi* simultaneously in three different places.

त्रिविधस्यापि त्यागं वपुषः कर्तुं स्थलत्रये य इव ।
अकरोत्समाधिमस्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥

But the Samadhi at Nerur is the only one well known in Southern India and the Tondamans of Pudukotah have made extensive grants of lands for the performance, in a suitable style, of the religious services in this sacred shrine. All the expenses of the celebration of the sacred Anniversary day every year are defrayed even now by the Pudukotah State.

Such was the mighty Saint, the great Jivanmukta, whom it was the fortune of Southern India to own in its midst for several years. His influence has been and still is very great on the minds of the people of Southern India. His name is revered and cherished as a family heirloom by all knowing people. His Holiness the present Sri Jagadguru of Sringeri than whom it is impossible to come across a holier Personage, a truer

Mahatma, a nobler Saint and a more rigorous Ascetic—even such a marvellous *Mahapurusha*, divine incarnation itself as he appears to be, has this Sadasiva Brahmendra as his Ideal. He has Sadasiva's picture always before him and it is only a copy of this picture that is given here as frontispiece. He longs for the day when he will be as free as Sadasiva. When such a mighty Personage admires Sadasiva so much, we may, without any hesitation, conclude that the greatness of Sadasiva is something beyond the range of human expression.

Sadasivendra Sarasvati appears to have composed several works but only a few of them are now available. Of these the Brahmasutra Vritti is the most important. There are several Vrittis on the Brahma Sutras and several of them have been printed also. But none of them equals this Vritti in the simplicity of style, clearness of exposition, closeness of reasoning and subtlety of thought. The clear statement of the Purvapaksha and the Siddhanta in each Sutra, the concise presentation of the Phalabheda in the Purvapaksha and Siddhanta of each Sutra, the introduction to each Sutra showing its consistent relation with the previous Sutra, the exposition of the connection between each Pada and between each Adhyaya are all peculiarly characteristic of this Brahmasutra Vritti. Written in a lucid style, chaste and easily understandable by all, this Vritti gives the essence of the whole of Sri Sankara's Bhashya in as few words as possible. Useful alike to students and scholars, this Vritti would surely commend itself to all lovers of Sanskrit

Literature. Besides this Vritti, Sadasiva appears to have written Dipikas for about a dozen Upanishads, which we hope to publish one after another at no distant date. Then we have his minor works such as Atmavidya Vilasa, Siddhantakalpavalli, Advaitarasamanjari, etc. As we have stated already, Atmavidya Vilasa is a peculiarly charming little poem of sixty two verses describing the greatness of a Yogin who has realised the Self. When we go through this work we feel as if we are reading a faithful description of Sadasivendra himself. Siddhantakalpavalli is a poetic version of the Siddhantalesasangraha of Appayya Dikshita. Advaitarasamanjari is a short and sweet poem of about forty five stanzas describing the essence of the Advaita Philosophy. Some say that a certain Nalla Dikshita, a disciple of Sadasivendra wrote this poem. We reserve a discussion of this topic for a subsequent volume of the works of Sadasivendra.

In all the works of Sadasiva we find a peculiar sweetness and melody characteristic of the harmonious mind of a true Yogin. His style is always lucid and simple, his sentiments lofty, his ideas noble and on the whole we find in all his poetical outpourings the elegant easy and emotional flow of a great soul. His songs are so lyrical, his rhythm so perfect that one is not tired of reciting them over and over again. Even without the help of the traditional anecdotes narrated above, we can, from a perusal of his poems alone, unhesitatingly say that he was a great *Siddha* of very high spiritual attainments

In conclusion we may state of him in his own words—

संत्यज्य शास्त्रजालं संव्यवहारं च सर्वतस्त्यक्त्वा ।
आश्रित्य पूर्णपदवीमास्ते निष्कम्पदीपवद्योगी ॥

वैराग्यविपुलमार्गं विज्ञानोद्दामदीपिकोद्दीप्तम् ।
आरुह्य तत्त्वहर्म्यं मुक्त्या सह मोदते यतिराट् ॥

आशावसनो मौनी नैराश्यालंकृतः शान्तः ।
करतलभिक्षापात्रस्तरुतलनिलयो मुनिर्जयति ॥

T. K. Balasubrahmanyam.

॥ अधिकरणानुक्रमणिका ॥

॥ अधिकरणानुक्रमणिका ॥

ब्रह्मतत्त्वप्रकाशिका

नाम

॥ ब्रह्मसूत्रवृत्तिः ॥

॥ ब्रह्मसूत्रवृत्तिः ॥

आम्नायान्तैकसंसिद्धमादिमध्यान्तवर्जितम् ।
आनन्दघनमापूर्णमात्मज्योतिरुपास्महे ॥ १ ॥

नमस्त्रय्यन्तकान्तारविहारैकपटीयसे ।
वादिमत्तेभसंहर्त्रे व्यासकेसरिणे सते ॥ २ ॥

स्तुवन्मोहतमस्तोमभानुभावमुपेयुषः ।
स्तुमस्तान्भगवत्पादान्भवरोगभिषग्वरान् ॥ ३ ॥

यद्वाणीद्युमणिध्वस्ता मन्मोहध्वान्तसंततिः ।
श्रीगुरून्भावयामस्तांस्त्रय्यन्ताम्बुजभास्करान् ॥ ४ ॥

श्रीमद्देशिकपादाब्जपरिचर्याबलादहम् ।
भाष्यानुगां ब्रह्मसूत्रवृत्तिं कुर्वे यथामति ॥ ५ ॥

इह खलु भगवान्बादरायणः प्रेक्षावत्प्रवृत्त्यौपयिकमापात-

तत्त्रय्यन्तवचोभिः प्रतिपन्नमनुबन्धजातं न्यायतो निर्णेतुमिदमारचयांचकार—

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

१. जिज्ञासाधिकरणम्।

अत्र अथशब्देन साधनचतुष्टयसंपत्त्यानन्तर्यमुच्यते। अतःशब्देन साधनचतुष्टयस्य संभावना। 'ब्रह्मजिज्ञासा' इत्यनेन अज्ञातत्वेन विषयत्वम्, ज्ञातत्वेन प्रयोजनत्वम्, ब्रह्मण उक्तं भवति। एवं च प्रेक्षावत्प्रवृत्त्यङ्गभूताधिकार्यादिसमर्पकत्वेन समन्वयाद्यखिलविचारोपोद्घातत्वात् आदावस्य सूत्रस्य संगतिः। विचारविषयवेदान्तवाक्यैः स्वार्थनिर्णयायास्यापेक्षणात् श्रुतिसंगतिः। एवं सर्वेषां सूत्राणां श्रुतिसंगतिर्द्रष्टव्या। विशेषतो ब्रह्मपरवाक्यतात्पर्यनिर्णायकन्यायसूचकत्वात् ब्रह्मविचारात्मकशास्त्रसंगतिः। एवमग्रेऽपि शास्त्रसंगतिरूह्या। 'अथातो ब्रह्मजिज्ञासा' इत्यादिभिः सूत्रैः सर्वे वेदान्ता ब्रह्मपरा इति समन्वयप्रतिपादनात् तेषाम् आध्यायं समन्वयाध्यायसंगतिः। प्रथमपादे स्पष्टब्रह्मलिङ्गानां वाक्यानां विचार्यत्वात् आपादं पादसंगतिः। प्राथम्यादस्याधिकरणस्य नाधिकरणसंगतिः। उत्तराधिकरणसंगतिस्तु तस्यैवानेनेति नास्योच्यते। पूर्वपक्षे विचारानारम्भादुपायान्तरसाध्या मुक्तिः। सिद्धान्ते तु तदारम्भसंभवान्

तदधीनज्ञानसिद्धेस्तेनैव मुक्तिरिति फलभेदः । अत्र वेदान्तवाक्यविचारो विषयः । स न कर्तव्यः कर्तव्यो वेति विषयप्रयोजनसंभवासंभवाभ्यां संदेहे, यद्धि संदिग्धं सप्रयोजनं तस्य विचारविषयत्वम् ; ब्रह्मणस्तु स्फुटतराहंप्रत्ययालम्बनत्वेनासंदिग्धत्वात् तद्ज्ञानान्मुक्तिलक्षणप्रयोजनाभावाच्च न विचारविषयत्वम् । अतोऽसंभावितविषयादिमान् वेदान्तवाक्यविचारो न कर्तव्य इति पूर्वः पक्षः । सिद्धान्तस्तु––श्रुतिगम्यब्रह्मात्मतत्त्वस्य अहंप्रत्ययानालम्बनत्वेन संदिग्धत्वात् तत्साक्षात्कारादनर्थनिवृत्तिलक्षणमोक्षसंभवात् संभावितविषयादिमान् वेदान्तवाक्यविचारः कर्तव्यः––इति । सूत्रार्थस्तु–– अत्र सूत्रे अनुवादकत्वेनानर्थक्यपरिहाराय पुरुषप्रवृत्तये च 'कर्तव्या' इति पदमध्याहर्तव्यम् । नन्वेवमप्यानर्थक्यं तदवस्थमेव, प्रकृतिप्रत्ययार्थयोर्ज्ञानेच्छयोः कर्तव्यतानन्वयादिति चेत्, नैष दोषः ; अत्र प्रकृत्या फलीभूतं ब्रह्मापरोक्षज्ञानम् अजहल्लक्षणया कथ्यते ; सन्प्रत्ययेन इच्छासाध्यो विचारो जहल्लक्षणया जेगीयते ; अर्थादपरोक्षज्ञानस्य मोक्षसाधनत्वं वेदान्तवाक्यानां विचार्यत्वं च लभ्यते ; एवं च श्रुत्यर्थाभ्यां साधनचतुष्टयसंपन्नस्याधिकारिणो मोक्षसाधनब्रह्मापरोक्षज्ञानाय वेदान्तवाक्यविचारः कर्तव्य इति विचारे कर्तव्यतान्वयसंभवात्–– इति ॥

नन्वित्थं ब्रह्मणस्त्र्यन्तविचारमुखेन विचार्यत्वमवादि, तदसारम्; लक्षणाभावेन स्वरूपस्यैवासिद्धेरित्याक्षिप्याह—

जन्माद्यस्य यतः ॥ २ ॥

अस्य पूर्वाधिकरणेनाक्षेपिकी संगतिः । अत्र पूर्वपक्षे ब्रह्मस्वरूपासिद्ध्या मुक्त्यसिद्धिः, सिद्धान्ते तु तत्सिद्धिरिति फलभेदः । अत्र 'यतो वा इमानि भूतानि...' इत्यादिवाक्यं विषयः । तत्र श्रूयमाणं जन्मादिकं ब्रह्मलक्षणं न वेति संदेहे, जन्मादेर्जगन्निष्ठत्वेन ब्रह्मनिष्ठत्वासंभवान्न तद्ब्रह्मलक्षणम् । न च 'सत्यं ज्ञानमनन्तम्' इत्यादिवाक्यस्थसत्यादिकं लक्षणं स्यादिति सांप्रतम्; लोकसिद्धभिन्नार्थकानामेकब्रह्मलक्षणत्वाप्रसिद्धेरिति पूर्वः पक्षः । सिद्धान्तस्तु— अस्य प्रत्यक्षाद्युपस्थापितस्य जगतः, जन्मादि जन्म उत्पत्तिः आदिर्यस्य जन्मस्थितिभङ्गस्य तत् जन्मादि, यतो यस्मात् ब्रह्मणो भवति; तस्य ब्रह्मणो जगज्जन्मादिकारणत्वं तटस्थलक्षणम्, सत्यादिकं स्वरूपलक्षणम् । न च लोकसिद्धभिन्नार्थकत्वादेकब्रह्मलक्षणत्वाप्रसिद्धिरिति सांप्रतम्; सत्यादिपदानामखण्डार्थत्वेन एकब्रह्मपर्यवसायितया लक्षणत्वसंभवात्— इति ॥

२. जन्माद्यधिकरणम् ।

नन्वित्थं ब्रह्मणो जगत्कारणत्वेन सर्वज्ञत्वमर्थादभाणि,

तदरमणीयम्; वेदस्य नित्यत्वेन जगत्कारणत्वायोगादित्याक्षिप्याह—

शास्त्रयोनित्वात् ॥ ३ ॥

अस्य पूर्वाधिकरणेनाक्षेपिकी संगतिः। फलं तु पूर्वपक्षे ब्रह्मणः सर्वज्ञत्वानिर्धारणम्, सिद्धान्ते तन्निर्धारणमिति द्रष्ट-

३. शास्त्रयोनित्वाधिकरणम्।

व्यम्। 'अस्य महतो भूतस्य निःश्वसितमेवैतद्यदृग्वेदः' इत्यादिवाक्यं विषयः। तत् ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं न साधयति, उत साधयतीति संदेहे, 'वाचा विरूप नित्यया' इति वेदस्य नित्यत्वश्रवणात् तत्कर्तृत्वेन सर्वज्ञत्वं न साधयतीति पूर्वः पक्षः। सिद्धान्तस्तु—शास्त्रस्य ऋग्वेदादेः सर्वज्ञकल्पस्य, योनिः कारणं तस्य भावः तत्त्वं तस्माद्वेदकर्तृत्वात्, सर्वज्ञत्वं साधयति। यद्वादि पूर्ववादिना वेदस्य नित्यत्वश्रवणादिति, तदसाधु; 'अस्य महतो भूतस्य...' इत्यादिवेदोत्पत्तिश्रुत्यनुरोधेन नित्यत्वश्रुतेरर्थवादपरत्वात्। न च वेदस्य सकर्तृकत्वे पौरुषेयत्वं स्यादिति सांप्रतम्; तस्योपलभ्यरचितत्वानङ्गीकारात्—इति। इति प्रथमवर्णकम् ॥

यद्वा जगत्कारणत्वेन ब्रह्मणि लक्षिते तस्य मानान्तरगम्यत्वमाशङ्क्याह— शास्त्रयोनित्वात्। लक्षणप्रमाणयोर्ब्रह्म-

निर्णयार्थत्वादेकफलत्वं संगतिः । अत्र पूर्वपक्षे अनुमानस्यैव विचार्यत्वसिद्धिः, सिद्धान्ते वेदान्तवाक्यानामिति फलभेदः । 'तं त्वौपनिषदं पुरुषम्....' इत्यादिवाक्यं विषयः । तत्किं ब्रह्मणः शास्त्रैकगम्यत्वं समर्पयति, उत नेति संदेहे, ब्रह्मणः सिद्धवस्तुत्वेन मानान्तरेणापि अवगम्यमानत्वान्न समर्पयतीति पूर्वः पक्षः । सिद्धान्तस्तु— शास्त्रम् ऋग्वेदादि योनिः प्रमाणं यस्य तत्तथोक्तं तस्य भावस्तत्त्वम् तस्माद्वेदैकप्रमाणकत्वात्तदेकगम्यत्वं समर्पयति । यत्तु मानान्तरगम्यत्वं ब्रह्मणोऽभाणि, तन्न ; तस्य रूपाद्यभावेन तद्गम्यत्वासंभवात्— इति । इति द्वितीयं वर्णकम् ॥

नन्वित्थं ब्रह्मणः शास्त्रैकगम्यत्वमभ्यधायि, तदसाधु ; शास्त्रस्यान्यपरत्वादित्याक्षिप्याह—

तत्तु समन्वयात् ॥ ४ ॥

अस्य पूर्वेणाक्षेपिकी संगतिः । फलं तु पूर्वपक्षे मुमुक्षोर्वेदान्तेषु प्रवृत्त्यनुपपत्तिः, सिद्धान्ते प्रवृत्तिसिद्धिरिति

४. समन्वयाधिकरणम् ।

द्रष्टव्यम् । अत्र सर्वे वेदान्ता विषयः । ते किं कर्मशेषकर्त्रादिपराः, उत नित्यसिद्धब्रह्मपरा इति संदेहे, अहेयानुपादेयसिद्धब्रह्मपरत्वे निष्प्रयोजनत्वसापेक्षत्वप्रसङ्गात् कर्मशेषकर्त्रादिपरा एवेति पूर्वः

पक्षः । सिद्धान्तस्तु— सौत्रतुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । तत् ब्रह्म, वेदान्तेषु प्रतिपाद्यते। कुतः, समन्वयात् सम्यक्तात्पर्यवत्त्वेन वेदान्तानां ब्रह्मण्यन्वयात् संबन्धात्, अतो वेदान्ता नित्यसिद्धब्रह्मपराः, न कर्त्रादिपराः, भिन्नप्रकरणस्थत्वात्। न च प्रकरणाभेदादुपासनाविधिपरा इति सांप्रतम्; तत्त्वमस्यादीनां विधिविधुराणां बहुलमुपलब्धेः । यत्तु निष्प्रयोजनत्वमुक्तम्, तदयुक्तम्; अनर्थनिवृत्तेः प्रयोजनस्य संभवात्। यच्च सापेक्षत्वम्, तन्न; रूपादिहीनस्य ब्रह्मणः प्रमाणान्तरागम्यत्वेन तत्प्रतिपादकवेदान्तानां सापेक्षत्वासंभवात्। तस्मादुपक्रमादिलिङ्गैर्वेदान्ता ब्रह्मपरा एवेति सिद्धम्। इति प्रथमवर्णकम् ।

यद्वा इत्थं ब्रह्मणो वेदान्तवेद्यत्वेऽपि, तद्विधिद्वाराङ्गीकुर्वत एकदेशिनो मतं प्रसङ्गादाक्षिप्याह— **तत्तु समन्वयात्** । पूर्वेणास्य प्रसङ्गसंगतिः । अत्र पूर्वपक्षे उपासनया मुक्तिः, सिद्धान्ते ज्ञानादिति फलभेदः । तत्र वेदान्ताः प्रतिपत्तिविधिविषयतया ब्रह्म समर्पयन्ति, उत साक्षादिति संदेहे, प्रवृत्त्यादिलिङ्गाभावेन सिद्धे शक्तिग्रहायोगात् प्रवृत्तिनिवृत्तिपरस्यैव शास्त्रत्वेन सिद्धपरत्वे तत्त्वायोगाच्च विधिविषयतयैवेति पूर्वः पक्षः । सिद्धान्तस्तु—तत् ब्रह्म साक्षात् वेदान्ताः समर्प-

यन्ति। कुतः, समन्वयात् तात्पर्यवत्त्वेन तेषां तत्रान्वयात् । यत्तु सिद्धे प्रवृत्त्यादिलिङ्गाभावेन न शक्तिग्रह इति, तन्न ; प्रवृत्तिनिवृत्ती एव लिङ्गमिति न निर्बन्धः, 'पुत्रस्ते जातः' इत्यादिषु हर्षादिलिङ्गेनापि शक्तिग्रहसंभवात्। यत्तु प्रवृत्त्यादिपरस्यैव शास्त्रत्वमिति, तदपि न ; हितशासनात् वेदान्तानां शास्त्रत्वोपपत्तेः— इति दिक् । इति द्वितीयं वर्णकम् ॥

इत्थं चतुर्भिः सर्वजगत्कारणं सर्वज्ञं सर्ववेदान्तप्रतिपाद्यं ब्रह्मैवेति प्रत्यपादि । तत्र सांख्याः— कूटस्थत्वेन क्रियाशक्त्ययोगात् ब्रह्म न जगत्कारणम् ; अपि तर्हि त्रिगुणात्मकत्वात् क्रियाशक्तिमत्प्रधानमेव जगत्कारणम्— इति जगुः ; तन्मतं निराकर्तुमिदमाह—

ईक्षतेर्नाशब्दम् ॥ ५ ॥

पूर्वेणास्याक्षेपसंगतिः । फलं तु पूर्वपक्षे प्रधानैक्यसंपदुपास्तिः, सिद्धान्ते ब्रह्मैक्यधीरिति बोद्धव्यम् । छान्दोग्ये

५. ईक्षत्यधिकरणम् ।

श्रूयते— 'सदेव' इत्युपक्रम्य 'तदैक्षत....' इति । तत्र सच्छब्दितं जगदुपादानं किं प्रधानम्, उत ब्रह्मेति संशये, प्रधानमिति पूर्वः पक्षः । सिद्धान्तस्तु—न प्रधानं जगदुपादानम् । कस्मात्, अशब्दम्, हेतुगर्भविशेषणमेतत्, अशब्दत्वात् अवेदप्रमाणक-

त्वात्; कस्मादवेदप्रमाणकत्वम्, ईक्षतेः, धातुवाचकेक्षतिशब्दः तदर्थलक्षकः, ईक्षितृत्वश्रवणात्; न ह्यचेतनस्य प्रधानस्येक्षितृत्वं संभवति, तस्य चेतनधर्मत्वात्। न च कूटस्थब्रह्मणो ज्ञानक्रियाशक्त्यभावः, मायामहिम्ना सर्वस्याप्युपपत्तेः। अतः सन् ईक्षितृ चेतनं ब्रह्मैव जगदुपादानमित्यर्थः॥

ननु 'तत्तेज ऐक्षत' 'ता आप ऐक्षन्त' इत्यचेतनेऽपि ईक्षितृत्वश्रवणात् तत् प्रधानेऽपि गौणमस्त्वित्याशङ्क्याह—

गौणश्चेन्नात्मशब्दात्॥ ६॥

अप्तेजसोरिव प्रधाने ईक्षितृशब्दो गौण इति चेत्, न; कस्मात्, आत्मशब्दात्, 'सदेव...' 'तदैक्षत' इति प्रकृतं सदीक्षितृ 'सेयं देवता' इति देवताशब्देन परामृश्य 'अनेन जीवेनात्मना' इत्यात्मशब्दश्रवणादित्यर्थः॥

नन्वात्मशब्दः प्रधानेऽप्यस्तु, तस्य नानार्थकत्वादित्याशङ्क्याह—

तन्निष्ठस्य मोक्षोपदेशात्॥ ७॥

न प्रधानमात्मशब्दवाच्यम्, 'स आत्मा...' इति प्रकृतं सदणिमानमादाय 'तत्त्वमसि' इति श्वेतकेतोश्चेतनस्य तन्निष्ठतां तत्स्वरूपतामुपदिश्य 'अथ संपत्स्ये' इति प्रारब्धक्ष-

यानन्तरं मोक्षोपदेशात्। अतश्चेतनस्याचेतननिष्ठत्वानुपपत्तेः श्रद्धया तद्ध्यायतो मोक्षासंभवादनर्थप्राप्तेश्च आत्मशब्दश्चेतनपर इति सिद्धम् ॥

ननु स्थूलारुन्धतीन्यायेन प्रधानोपदेशद्वारा अयमात्मोपदेशोऽस्त्वित्याशङ्क्याह—

हेयत्वावचनाच्च ॥ ८ ॥

यद्यनात्मैव प्रधानं सच्छब्दवाच्यम् 'स आत्मा तत्त्वमसि' इतीहोपदिष्टं स्यात्, स तदुपदेशश्रवणादनात्मज्ञतया तन्निष्ठो मा भूदिति मुख्यमात्मानमुपदिदिक्षु शास्त्रं तस्य हेयत्वं ब्रूयात्; न तथा ब्रूते; अतो हेयत्वस्यावचनात् अनभिधानात्, चकारात् एकविज्ञानेन सर्वविज्ञानोपक्रमविरोधाच्चेत्यर्थः ॥

इत्थं प्रधानस्यात्मोपदेशद्वारत्वात्मत्वगौणेक्षितृत्वनिरासेन जगत्कारणत्वं निरस्य, अधुना स्वतन्त्रैर्हेतुभिस्तदेव निरासितुं सूत्रत्रयमाह—

स्वाप्ययात् ॥ ९ ॥

स्वस्मिन् प्रकृतसच्छब्दिते चिदात्मनि, अप्ययात् 'सता सोम्य तदा संपन्नो भवति' इति लयश्रवणात्, अपिपूर्वस्य एतेर्लयार्थकत्वात्। अतो यस्मिन् सर्वेषां जीवानां सुषुप्तौ

उपाधिकृतविशेषाभावादप्ययः, तच्चेतनं सच्छब्दवाच्यं ब्रह्मैव जगत्कारणम् , न प्रधानमित्यर्थः ॥

गतिसामान्यात् ॥ १० ॥

गतेः सर्वेषु 'आत्मन आकाशः संभूतः' इत्यादिवेदान्तेषु चेतनकारणत्वावगतेः समानत्वात् , नाचेतनं प्रधानं कारणमित्यर्थः ॥

श्रुतत्वाच्च ॥ ११ ॥

श्रूयते हि श्वेताश्वतरोपनिषदि सर्वज्ञमीश्वरं प्रकृत्य 'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः' इति। तस्मात् सर्वज्ञं ब्रह्म जगतः कारणम् , नाचेतनं प्रधानमन्यद्वेति सिद्धम् ॥

इत्थं सर्वेषां वेदान्तानां सविशेषनिर्विशेषब्रह्मपराणाम् उपास्तिविधिद्वारा साक्षाच्च निर्विशेषब्रह्मपरत्वे सिद्धेऽपि, अधुना निर्विशेषवाक्यविचारात्मकमिदमधिकरणमारभ्यते—

आनन्दमयोऽभ्यासात् ॥ १२ ॥

ईक्षत्यधिकरणे 'तत्तेज ऐक्षत' इत्यमुख्येक्षणप्रायपाठो यथा जगत्कारणत्वे न निश्चायकः, न तथा आनन्दमय इत्यत्र मयटो विकारार्थत्वे प्रायपाठोऽनिश्चायक इति पूर्वेणास्य प्रत्यु-

दाहरणसंगतिः। पूर्वपक्षे जीवस्यानन्दमयत्वेनोपास्तिः फलम्,

६. आनन्दमयाधिकरणम्।

सिद्धान्ते तु निर्विशेषब्रह्मैक्यप्रमितिरिति परमसिद्धान्तानुसारिणः; एकदेशिमते तु उभयत्रोपास्तिरिति विवेकः। तैत्तिरीयके श्रूयते—'अन्नमयः' इत्याद्युपक्रम्य 'अन्योऽन्तर आत्मानन्दमयः' इति। तत्र किम् आनन्दमयशब्देन 'सत्यं ज्ञानम्....' इति प्रकृतं परं ब्रह्मैवोच्यते, किं वा अन्नमयादिवत् ब्रह्मणोऽर्थान्तरं जीव इति विशये, अर्थान्तरमिति पूर्वः पक्षः। सिद्धान्तस्तु— आनन्दमयः परमात्मैव। कुतः, अभ्यासात् आनन्दशब्दस्य ब्रह्मण्येव बहुकृत्वोऽभ्यासादित्यर्थः॥

नन्वानन्दमयशब्दस्य विकारार्थत्वादित्याशङ्क्याह—

विकारशब्दान्नेति चेन्न प्राचुर्यात्॥ १३॥

न ब्रह्म आनन्दमयशब्दितम्। कुतः, विकारशब्दात् विकारार्थकमयट्प्रत्ययात्, ब्रह्मणश्चानन्दविकारत्वानुपपत्तेः इति चेत्, न; कस्मात्, प्राचुर्यात् प्रकृते मयट आनन्दप्राचुर्यवाचकत्वादित्यर्थः॥

मयटः प्राचुर्यार्थकत्वे हेत्वन्तरमाह—

तद्धेतुव्यपदेशाच्च॥ १४॥

तमानन्दं प्रति ‘एष ह्येवानन्दयाति’ इति ब्रह्मणो हेतुत्वव्यपदेशात् आनन्दमयः पर एवेत्यर्थः ॥

इतश्चानन्दमयः पर एवेत्याह—

मान्त्रवर्णिकमेव च गीयते ॥ १५ ॥

‘ब्रह्मविदाप्नोति परम्’ इत्युपक्रम्य ‘सत्यं ज्ञानमनन्तं ब्रह्म’ इत्यस्मिन्मन्त्रे यत् सत्याद्यात्मकं सर्वान्तरं ज्ञेयत्वेनोक्तम्, तत् मान्त्रवर्णिकं ब्रह्मैव ‘आनन्दमयः’ इति ब्राह्मणे गीयते, मन्त्रब्राह्मणयोरैकार्थ्यादित्यर्थः ॥

इतश्चानन्दमयः परो न जीव इत्याह—

नेतरोऽनुपपत्तेः ॥ १६ ॥

ईश्वरादितरो जीवो नानन्दमयः । कुतः, अनुपपत्तेः ‘सोऽकामयत बहु स्यां प्रजायेयेति’ इत्यादिश्रूयमाणस्य सृष्टेः प्राक् कामयितृत्वस्रष्टव्यात्मकत्वादेरनुपपत्तेरित्यर्थः ॥

इतश्च नानन्दमयो जीव इत्याह—

भेदव्यपदेशाच्च ॥ १७ ॥

‘रसो वै सः रसꣳ ह्येवायं लब्ध्वानन्दी भवति’ इति लब्धृलब्धव्यत्वेन जीवानन्दमययोर्भेदेन व्यपदिश्यमानत्वादित्यर्थः ॥

ननु तर्ह्यानन्दमयशब्देन प्रधानमुच्यताम्, तत्राह—

कामाच्च नानुमानापेक्षा ॥ १८ ॥

अनुमीयत इत्यनुमानम् अनुमानैकगम्यं प्रधानम्, तस्य नापेक्षा आनन्दमयत्वेनात्र न स्वीकारः। कुतः, कामात् तदधिकारे 'सोऽकामयत' इति कामयितृत्वश्रवणादित्यर्थः। अत्र प्रधाननिराकरणं प्रासङ्गिकमिति बोध्यम् ॥

इतश्च नानन्दमयो जीव इत्याह—

अस्मिन्नस्य च तद्योगं शास्ति ॥ १९ ॥

अस्मिन् आनन्दमये प्रकृत आत्मनि, प्रबुद्धस्य अस्य जीवस्य, तद्योगं तदात्मना योगः तद्योगः तद्भावापत्तिः मुक्तिः तम्, 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते' इत्यादिशास्त्रं शास्ति; तस्मान्नानन्दमयो जीवः, किंतु परमात्मैवेत्यर्थः ॥

इदं त्वेकदेशिमतम्। भगवत्पादीयमते त्वेवं सूत्रयोजना—

आनन्दमयोऽभ्यासात्। ईक्षत्यधिकरणे मुख्येक्षणात् ब्रह्मनिर्णये गौणप्रायपाठस्यानिश्चायकत्वं यथा, न तथेहाधारत्वावयवत्वयोः पुच्छशब्दलक्षकत्वसाम्यादवयवप्रायपाठस्यानिश्चायकत्वमस्तीति तेनास्य प्रत्युदाहरणसंगतिः। फलं त्वधस्तादभिहितम्। 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यत्र किमानन्दमयाव-

यवत्वेन ब्रह्मोच्यते, उत स्वप्रधानत्वेनेति संदेहे, अवयवत्वेनेति पूर्वः पक्षः । सिद्धान्तस्तु— सौत्रानन्दमयशब्देन आनन्दमयवाक्यस्थब्रह्मपुच्छमित्यत्रत्यब्रह्मशब्द उपलक्ष्यते; स स्वप्रधानब्रह्मपरः। कुतः, अभ्यासात्, तस्यैव 'असन्नेव स भवति' इति श्लोके अभ्यस्यमानत्वादित्यर्थः ॥

यत्तु पुच्छशब्दस्यावयवपरत्वमिति तत्राह— **विकारशब्दान्नेति चेन्न प्राचुर्यात्** । विकारशब्दात् अवयवपरपुच्छशब्दात् तत्समानाधिकरणब्रह्मशब्दो न स्वप्रधानब्रह्मपर इति चेत्, न; प्राचुर्यात् अवयवप्रायप्रयोगात् पुच्छमित्युच्यते; नावयवविवक्षया । अतः प्रतिष्ठासमभिव्याहारात् पुच्छशब्दस्याधारपरतया स्वप्रधानत्वेन ब्रह्मोच्यत इत्यर्थः ॥

इतश्च पुच्छशब्दस्याधारपरत्वमित्याह— **तद्धेतुव्यपदेशाच्च** । तस्य ब्रह्मणः स्वविकारजातं प्रति हेतुत्वेन 'इद॰सर्वमसृजत' इति वाक्ये व्यपदेशादित्यर्थः ॥

इतश्च पुच्छवाक्ये ब्रह्म स्वप्रधानमित्याह— **मान्त्रवर्णिकमेव च गीयते** । यत् 'सत्यं ज्ञानमनन्तम्' इत्यादिमन्त्रवर्णप्रतिपाद्यं ब्रह्म, तदेव 'ब्रह्म पुच्छम्' इति ब्राह्मणवाक्ये स्वप्राधान्येन गीयते मन्त्रब्राह्मणयोरैकार्थ्यादित्यर्थः ॥

ननु पुच्छवाक्ये आनन्दमयः स्वप्रधानत्वेन प्रतिपाद्यः किं

न स्यादित्यत आह— **नेतरोऽनुपपत्तेः ।** इतर आनन्दमयोऽत्र न प्रतिपाद्यः, प्रियादिमत्त्वेनाग्रिमवाक्योक्तस्रष्टृत्वाद्यनुपपत्तेरित्यर्थः ॥

इतश्चानन्दमयोऽत्र न प्रतिपाद्य इत्याह—**भेदव्यपदेशाच्च ।** 'रसꣳ ह्येवायं लब्ध्वानन्दी भवति' इत्यानन्दमयब्रह्मणोर्लब्धृलब्धव्यत्वेन रूपेण भेदव्यपदेशादित्यर्थः ॥

ननु 'आनन्दो ब्रह्म' इत्यत्रत्यानन्दस्य ब्रह्मत्वादानन्दमयस्यापि ब्रह्मत्वमनुमीयत इत्यत आह— **कामाच्च नानुमानापेक्षा ।** काम्यत इति कामः आनन्दः तस्य ब्रह्मत्वदर्शनात् न अनुमानेन आनन्दमयस्यापि ब्रह्मत्वमपेक्षितव्यम्, विकारार्थमयड्विधानादित्यर्थः ॥

इतोऽपि नानन्दमयोऽत्र प्रतिपाद्य इत्याह— **अस्मिन्नस्य च तद्योगं शास्ति ।** अस्मिन् पुच्छवाक्योक्ते ब्रह्मणि, प्रबुद्धस्य अस्य आनन्दमयस्य 'यदा ह्येव—' इति शास्त्रं तद्योगं तद्भावापत्तिं शास्ति; अतोऽत्रानन्दमयस्याप्रतिपाद्यत्वात् पुच्छब्रह्मैव स्वप्रधानं निर्विशेषं ज्ञेयमिति सिद्धम् ॥

इत्थं पूर्वसिद्धनिर्विशेषब्रह्मसमन्वयापवादकमिदमाह—

अन्तस्तद्धर्मोपदेशात् ॥ २० ॥

पूर्वत्र ब्रह्मपदम् , आनन्दमयपदम् , आनन्दाभ्यासश्चेति मुख्यत्रितयात्मकबहुप्रमाणवशात् निर्विशेषब्रह्मनिर्णयो यथा,

७. अन्तरधिकरणम्। तथा रूपवत्त्वादिबहुप्रमाणवशात् संसारी हिरण्मयः पुरुषोऽस्त्विति पूर्वसिद्धान्तयुक्त्या पूर्वपक्षोत्थानात् तेनास्य दृष्टान्तसंगतिः। फलं तु पूर्वोत्तरपक्षयोरपरपरब्रह्मोपास्तिरेवेति द्रष्टव्यम्। छान्दोग्ये श्रूयते— 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषः....' इत्यादि। तत्र किमयं पुरुषो विद्याकर्मातिशयवशात्प्राप्तोत्कर्षः कश्चित्संसारी, उत नित्यसिद्धः परमेश्वर इति संदेहे, संसारीति पूर्वः पक्षः। सिद्धान्तस्तु—'य एषोऽन्तरादित्ये....' 'य एषोऽन्तरक्षिणि....' इति च श्रूयमाणः परमेश्वर एव, न संसारी। कुतः, तद्धर्मोपदेशात्, तस्य परमेश्वरस्य ये सर्वपाप्मराहित्यादिधर्माः तेषामस्मिन्वाक्ये उपदेशात्। हिरण्यश्मश्रुकेशादिकं तु मायिकं परमेश्वरस्य लोकानुग्रहार्थमुपपद्यत इत्यविरोधः। तस्मादक्ष्यादित्ययोरन्तः परमेश्वर एवेत्यर्थः॥

किं च—

भेदव्यपदेशाच्चान्यः॥ २१ ॥

आदित्याक्ष्णोरन्तः श्रूयमाणः पुरुषः आदित्यशरीराभिमानिनो जीवादन्यः। कुतः, भेदव्यपदेशात्, आदित्यशरीरा-

भिमानिनो जीवादन्यस्य परमात्मनोऽन्तर्यामितया 'य आदित्ये तिष्ठन्....' इत्याद्यन्तर्यामिब्राह्मणे तयोर्भेदव्यपदेशात्। अत्राप्यन्तरशब्दश्रुत्या तत्प्रत्यभिज्ञानात्परमेश्वर एवाक्ष्यादित्ययोरुपास्य इति सिद्धम् ॥

ननु पूर्वत्राव्यभिचरितापहतपाप्मत्वादिब्रह्मलिङ्गेन रूपवत्त्वादिकमन्यथा नीतं यथा, न तथेह लिङ्गादाकाशशब्दश्रुतिरन्यथा नेतुं शक्या; तस्या बलवत्त्वादित्यत आह—

आकाशस्तल्लिङ्गात् ॥ २२ ॥

पूर्वेणास्य प्रत्युदाहरणसंगतिः। फलं तु पूर्वपक्षे भूताकाशदृष्ट्या उद्गीथोपास्तिः, सिद्धान्ते ब्रह्मदृष्ट्येति द्रष्टव्यम्।

८. आकाशाधिकरणम्। छान्दोग्ये श्रूयते—'अस्य लोकस्य का गतिरित्याकाश इति होवाच' इत्यादि। तत्र किमाकाशशब्देन भूताकाशोऽभिधीयते, उत परं ब्रह्मेति विशये, भूताकाश इति पूर्वः पक्षः। सिद्धान्तस्तु—आकाशशब्देन ब्रह्मैव गृह्यते। कुतः, तल्लिङ्गात्, तस्य ब्रह्मणो यल्लिङ्गं समस्तमहाभूतादिसृष्ट्यादिकं तस्यास्मिन्वाक्ये दृष्टत्वात्। यत्तु लिङ्गाच्छ्रुतिर्बलीयसीति, तन्न। भूयसीनां ब्रह्मलिङ्गश्रुतीनामनुग्रहाय एकस्या आकाशश्रुतेर्बाधस्य युक्तत्वात्। 'आका-

शो ह्येवैभ्यः....' इति श्रुत्यन्तराच्च आकाशशब्दितं ब्रह्मैवात्रोद्गीथे उपास्यमिति सिद्धम् ॥

आकाशन्यायमन्यत्रातिदिशति—

अत एव प्राणः ॥ २३ ॥

अत्रातिदेशत्वात्पृथक्संगतिर्नापेक्षिता । यद्वा पूर्वमाकाशश्रुतेरव्यभिचारिब्रह्मलिङ्गाद्बाधो यथा युक्तः, न तथेह प्राण-

९. प्राणाधिकरणम् ।

श्रुतेर्बाधो युक्तः संवेशनादिलिङ्गस्य प्राणसाधारणतया ब्रह्माव्यभिचाराभावादिति प्रत्युदाहरणसंगतिः । फलं तु पूर्वपक्षे प्राणदृष्ट्या प्रस्तावोपास्तिः, सिद्धान्ते ब्रह्मदृष्ट्येति द्रष्टव्यम् । छान्दोग्ये श्रूयते उद्गीथे— 'प्रस्तोतर्या देवता....' इति प्रस्तुत्य, 'कतमा सा देवतेति प्राण इति होवाच' इत्यादि । तत्र किं प्राणशब्देन ब्रह्माभिधीयते, उत वायुविकार इति संशये, वायुविकार इति पूर्वः पक्षः । सिद्धान्तस्तु—प्राणशब्देन ब्रह्मैवाभिधीयते । कुतः, अत एव पूर्वसूत्रोक्तताल्लिङ्गादेव, तस्य ब्रह्मणो यल्लिङ्गम् '....प्राणमेवाभिसंविशन्ति' इत्यादिसर्वभूतसंवेशनादिकं तस्यास्मिन्वाक्ये दृष्टत्वात् । न च 'प्राणं तर्हि वागप्येति' इत्यादिना वायुविकारेऽपि श्रुतमिति वाच्यम्; तत्र इन्द्रियसंवेशनादेरेव श्रुतत्वात् । अतोऽनन्यथासिद्धब्रह्मलिङ्गात् प्राणशब्दा-

भिधेयं ब्रह्मैवोपास्यमिति सिद्धम् ॥

पूर्वं प्राणवाक्ये ब्रह्मलिङ्गसद्भावात् ब्रह्मपरता यथा, न तथेह स्ववाक्ये ब्रह्मपरता तदभावादिति प्रत्युदाहरणसंगत्येदमाह—

ज्योतिश्चरणाभिधानात् ॥ २४ ॥

अत्र पूर्वपक्षे कौक्षेये ज्योतिषि आदित्यादिदृष्टयोपास्तिः, सिद्धान्ते ब्रह्मदृष्टयेति फलभेदः । छान्दोग्ये श्रूयते— 'अथ

१०. ज्योतिश्चरणाधिकरणम् ।

यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु....' इत्यादि। तत्र किं ज्योतिःशब्देन आदित्यादिकं तेजोऽभिधीयते, उत ब्रह्मेति संशये, आदित्यादिकमिति पूर्वः पक्षः । सिद्धान्तस्तु—'दिवो ज्योतिः....' इति ज्योतिःशब्देन ब्रह्मैव गृह्यते । कुतः, चरणाभिधानात् ज्योतिर्वाक्यात्पूर्ववाक्ये 'पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' इति चतुष्पात्त्वाभिधानात् । अतो ब्रह्मैव ज्योतिःशब्दितमित्यर्थः ॥

ननु 'गायत्री वा इदं सर्वम....' इति गायत्र्याख्यच्छन्दसः प्रकृतत्त्वात्तस्यैवोपास्यत्वम्, नान्यस्येत्याशङ्क्याह—

छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथाहि दर्शनम् ॥ २५ ॥

छन्दोभिधानात् गायत्र्याख्यछन्दस एवाभिधानात्, पूर्ववाक्ये न ब्रह्मणः प्रकृतत्वमिति चेत्, न । कुतः, तथा च्छन्दोद्वारेण तद्गते ब्रह्मणि, चेतोर्पणस्य चित्तसमाधानस्य, निगदात् अभिधानात् । तत्र दृष्टान्तः— तथाहि दर्शनम्; अन्यत्रापि विकारद्वारेण 'एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते' एतमात्मानं प्रधाने शस्त्रे तदनुगतमुपासते; इति ब्रह्मण उपासनं दृश्यते इति दर्शनं दृष्टमित्यतो ब्रह्मैव पूर्ववाक्ये निर्दिष्टम्, न छन्द इति सिद्धम् ॥

इतश्च गायत्रीवाक्ये ब्रह्मैव प्रतिपाद्यमित्याह—

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २६ ॥

भूतपृथिवीशरीरहृदयैः 'चतुष्पदा गायत्री' इति व्यपदेशस्य ब्रह्मण्येवोपपत्तेः। न ह्यक्षरसंनिवेशरूपगायत्र्या भूतादिपादव्यपदेशः संभवति । अतो गायत्रीवाक्ये ब्रह्मैव प्रतिपाद्यमिति, ज्योतिर्वाक्ये द्युसंबन्धात्तदेव प्रत्यभिज्ञायत इति सिद्धम् ॥

ननु पूर्वं दिवीति सप्तम्या द्यौराधारत्वेन निर्दिश्यते, दिव इति पञ्चम्या द्यौरवधित्वेन । तथा च विभक्तिभेदेन द्युसंबन्धात् यत्प्रत्यभिज्ञानमुक्तं तन्नेत्याशङ्क्याह—

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ २७ ॥

'दिवि' 'दिवः' इति विभक्तिभेदेनोपदेशात् ज्योतिर्वाक्ये प्रत्यभिज्ञानं न संभवतीति चेत्, न। कुतः, उभयस्मिन्नपि विभक्तिभेदेन उपदेशद्वयेऽपि प्रधानप्रातिपदिकार्थेन प्रत्यभिज्ञाया अविरोधात्, प्रकृतत्रिपाद्ब्रह्मपरामर्शियच्छब्दानुबन्धाच्च परं ब्रह्मैव ज्योतिःशब्दितमुपास्यमिति सिद्धम् ॥

पूर्वस्मिन्नधिकरणे प्रकृतत्रिपाद्ब्रह्मपरामर्शियच्छब्दसमानाधिकृता ज्योतिःश्रुतिस्तदर्थेत्युक्तं यथा, न तथेहासाधारणं किंचित्समस्ति प्राणस्य ब्रह्मत्वे मानम्, येन तथा स्यादिति प्रत्युदाहरणसंगत्येदमाह—

प्राणस्तथानुगमात् ॥ २८ ॥

अत्र पूर्वपक्षे प्राणेन्द्रदेवताजीवानामन्यतमोपास्तिः, सिद्धान्ते ब्रह्मधीरिति फलभेदः । कौषीतक्युपनिषदि इन्द्रप्रतर्दना-

११. प्रातर्दनाधिकरणम्।

ख्यायिकायां प्रतर्दनं प्रतीन्द्रवाक्यं श्रूयते— 'प्राणोऽस्मि प्रज्ञात्मा' इत्यादि । तत्र किं प्राणशब्देन वायुमात्रमभिधीयते, उत इन्द्रदेवता, उत जीवः, अथवा परं ब्रह्मेति विशये, 'अथ खलु...' इत्यादिलिङ्गात् वायुमात्रमिति पूर्वः पक्षः । सिद्धान्तस्तु— प्राणशब्देन ब्रह्मैवाभिधीयते । कुतः, तथानुगमात् तथा ब्रह्मपरत्वे 'हिततमं मन्यसे' इत्यादिहिततमत्वाद्यनेकलिङ्गानाम् अनुगमात् अव-

गमात् । अतोऽत्र प्राणो ब्रह्मैवेत्यर्थः ॥

ननु अस्मीत्यहंकारवादाह्लिङ्गादिन्द्रदेवताभिधीयत इत्याशङ्कयाह—

न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् ॥ २९ ॥

वक्तुः इन्द्रस्यं देवताविशेषस्य, आत्मोपदेशात् 'मामेव विजानीहि' इत्यात्मत्वेनोपदिश्यमानत्वात्, प्राणो न ब्रह्मेति चेत्, अत्रोच्यते—अध्यात्मसंबन्धभूमा ह्यस्मिन्निति । हि यस्मात्, अस्मिन् अध्याये 'यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः स एष प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृतः' इत्याद्यध्यात्मसंबन्धस्य प्रत्यगात्मसंबन्धस्य भूमा बाहुल्यमुपलभ्यते । तस्मात् प्राणात्मकब्रह्मोपदेश एवायम्, न देवताविशेषोपदेश इति सिद्धम् ॥

कथं तर्हि वक्तुरात्मोपदेशः, तत्राह—

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३० ॥

इन्द्रस्य वक्तुः 'मामेव विजानीहि' इत्युपदेशः शास्त्रदृष्ट्या ज्ञातव्यः; अहमेव परं ब्रह्मेति शास्त्रदृष्ट्या पश्यन्नेवमुक्तवानित्यर्थः । अत्र दृष्टान्तः— वामदेववत् यथा वामदेवः शास्त्रदृष्ट्या 'अहं मनुरभवं सूर्यश्च' इत्याह तद्वदिति । अतो

ब्रह्मपरमेवैतद्वाक्यमिति सिद्धम् ॥

नन्वेवमपि न ब्रह्मपरमिदम्, अपि त्वन्यपरमित्याशङ्कयाह—

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३१ ॥

'वक्तारं विद्यात्' इति जीवलिङ्गात् 'इदं शरीरं परिगृह्योत्थापयति' इति मुख्यप्राणलिङ्गाच्च तदुभयपरम्, न ब्रह्मपरमेवेति चेत्, न। कुतः, उपासात्रैविध्यात् जीवमुख्यप्राणब्रह्मोपासनानि त्रीणि प्रसज्येरन्। न च तदिष्टम्; 'मामेव....' इत्युपक्रम्य 'प्राणोऽस्मि' इत्युक्त्वा अन्ते उपसंहरति 'स एष प्राण एव प्रज्ञात्मा' इति। एवमुपक्रमोपसंहाराभ्यां वाक्यैकवाक्यत्वावगमात्। किंच अन्यत्र ब्रह्मलिङ्गवशात् प्राणशब्दस्य ब्रह्मणि वृत्तेराश्रितत्वादिहापि तद्योगात् हिततमत्वाद्यसाधारणब्रह्मलिङ्गयोगात् ब्रह्मण एवायमुपदेश इति सर्वमतिशोभनम् ॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्व-
प्रकाशिकायां प्रथमाध्यायस्य
प्रथमः पादः ॥

ॐ

द्वितीयः पादः ॥

इत्थं पूर्वस्मिन्पादे स्पष्टब्रह्मलिङ्गवाक्यानां ब्रह्मणि समन्वयः साधितः; अधुना अस्पष्टब्रह्मलिङ्गानां समन्वयं साधयितुं

१. सर्वत्र प्रसिद्ध्यधिकरणम्।

द्वितीयतृतीयपादावारभ्येते । पूर्वस्मिन्पादे जगत्कारणत्वेन व्यापित्वादिकमर्थसिद्धम् । तदुपजीव्योत्तरपादद्वयस्य उत्थानात् हेतुहेतुमद्भावः संगतिरस्य पूर्वपादेन । यथा पूर्वं जीवादिलिङ्गबाधया ब्रह्मपरत्वमुक्तम् , न तथेह मनोमयादिवाक्ये ब्रह्मलिङ्गमस्तीति प्रत्युदाहरणसंगत्येदमारभ्यते ॥

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

अस्य पूर्वपक्षे जीवस्योपास्तिः, सिद्धान्ते ब्रह्मण इति फलभेदः । छान्दोग्ये शाण्डिल्यविद्यायामिदमाम्नायते— ‘स क्रतुं कुर्वीत’ ‘मनोमयः प्राणशरीरो भारूपः’ इत्यादि । तत्र किं मनोमयत्वादिगुणकः शारीर उपास्यत्वेन उपदिश्यते किं वा परमात्मेति संशये, शारीर इति पूर्वः पक्षः । सिद्धान्तस्तु— परं ब्रह्मैवोपास्यत्वेनोपदिश्यते । कुतः, सर्वत्र प्रसिद्धोपदेशात्

सर्वेषु वेदान्तेषु यत्प्रसिद्धं जगत्कारणं ब्रह्म, तस्यैवात्र 'सर्वं खलु....' इत्यादिना उपदेशादित्यर्थः ॥

इतश्च ब्रह्मैवात्रोपदिश्यत इत्याह—

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

विवक्षिताः 'भारूपः सत्यसंकल्पः' इत्यादिना उपासनायामुपादेयत्वेनोपदिष्टा ये गुणाः सत्यसंकल्पत्वादयः तेषां ब्रह्मण्येवोपपत्तेरित्यर्थः। जीवासाधारणस्यापि मनोमयत्वादेः सत्यसंकल्पत्वाद्यनुरोधेन सर्वात्मके ब्रह्मण्युपपत्तेः। अतः तद्गुणकं ब्रह्मैवोपास्यमिति सिद्धम् ॥

ननु विपरीतं किं न स्यादिति चेत्, नेत्याह—

अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

सत्यसंकल्पत्वादीनां जीवे सामञ्जस्येनानुपपत्तेः न शारीरो जीवस्तद्धर्मेणोपास्यः, किं तु ब्रह्मैवेत्यर्थः ॥

इतश्च न शारीर उपास्य इत्याह—

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

'एतमितः प्रेत्याभिसंभवितास्मि' इत्यनेन एतमिति प्रकृतस्य मनोमयत्वादिगुणकस्य ब्रह्मणः कर्मत्वेन प्राप्यत्वेन,

अभिसंभवितास्मि प्राप्तास्मि इति शारीरस्य कर्तृत्वेन व्यपदिश्यमानत्वादित्यर्थः ॥

इतश्च न शारीर उपास्य इत्याह—

शब्दविशेषात् ॥ ५ ॥

समानप्रकरणे 'अन्तरात्मन्पुरुषो हिरण्मयः' इति शारीरस्य यः शब्दोऽभिधायकः सप्तम्यन्तः अन्तरात्मन्निति, तस्माद्विशिष्टोऽन्यः प्रथमान्तः पुरुषशब्दो मनोमयत्वादिविशिष्टस्यात्मनोऽभिधायकः; तस्य सत्त्वान्न परस्मादन्यः शारीरः उपास्य इत्यर्थः ॥

किं च—

स्मृतेश्च ॥ ६ ॥

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥' इत्यादौ जीवपरमात्मनोर्भेदस्मरणान्न परस्मादन्यो जीव उपास्य इति सिद्धम् । अनयोर्भेदस्तु काल्पनिकः, न वास्तव इति रहस्यम् ॥

अधुना परमात्मन उपास्यत्वमाक्षिप्य परिहरति—

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

अर्भकौकस्त्वात् अर्भकमल्पम् ओकः स्थानं यस्य सोऽर्भकौकाः तस्य भावस्तत्त्वं तस्मात्, 'एष म आत्मान्तर्हृदये' इति परिच्छिन्नहृदयायतनत्वादित्यर्थः। किं च तद्व्यपदेशाच्च तस्य स्वशब्देनैव 'अणीयान्' इत्यणीयस्त्वस्य व्यपदेशात् आराग्रमात्रो जीव इहोपास्यः न सर्वगतः परमात्मेति चेत्, न। कुतः, निचाय्यत्वादेवम् अर्भकौकस्त्वाणीयस्त्वादिविशिष्टत्वेन रूपेण परमात्मन इह निचाय्यत्वात् उपास्यत्वात्। अतः सर्वगतस्यात्मन उपासनापेक्षया अर्भकौकस्त्वादिगुणः। नैतावता सर्वगतत्वहानिः। तत्र दृष्टान्तः व्योमवत्; यथा सर्वगतमपि व्योम सूच्याद्यवच्छेदेनार्भकौकोऽणीयश्च व्यपदिश्यते तद्वत् ब्रह्मापीत्यर्थः॥

अधुना परमात्मनः सर्वगतत्वे दोषमाशङ्क्य परिहरति—

संभोगप्राप्तिरिति चेन्न वैशेष्यात्॥ ८॥

व्योमवत्परमात्मनः सर्वगतत्वे चेतनत्वाविशेषात् जीववत् सुखदुःखानुभवरूपसंभोगप्राप्तिरिति चेत्, न। वैशेष्यात् जीवपरमात्मनोः भोक्तृत्वाभोक्तृत्वादिविशेषान्न तद्भोगेनास्य भोगप्राप्तिः। तस्मान्मनोमयत्वादिगुणकः परमात्मैवोपास्यः, न शारीर इति सुस्थितम्॥

पूर्वं यथा ब्रह्मणो भोक्तृत्वाभाव उक्तः, तथा कर्तृत्वाभाव इह ब्रह्मण इति दृष्टान्तसंगत्येदमाह—

अत्ता चराचरग्रहणात् ॥ ९ ॥

अत्र पूर्वपक्षे अग्नेर्जीवस्य वोपास्तिः, सिद्धान्ते निर्विशेषब्रह्मधीरिति फलभेदः । कठवल्लीषु श्रूयते 'यस्य ब्रह्म च

२. अत्रधिकरणम्।

क्षत्रं चोभे भवत ओदनः' इत्यादि । तत्रौदनोपसेचनसूचितः कश्चिदत्ता प्रतीयते। स किमग्निः, उत जीवः, उताहो परमात्मेति विशये, अग्निजीवाविति पूर्वः पक्षः । सिद्धान्तस्तु— परमात्मैवात्ता । कुतः, चराचरग्रहणात् । चराचरयोः स्थावरजङ्गमयोः आद्यत्वेनास्मिन्वाक्ये ग्रहणात् श्रवणात् । न हि परमात्मानं सर्वसंहर्तारमृतेऽन्यस्य कस्यचिच्चराचरात्तृत्वं संभवतीत्यर्थः ॥

इतश्च परमात्मैवात्तेत्याह—

प्रकरणाच्च ॥ १० ॥

'न जायते म्रियते वा विपश्चित्' इत्यादिना परमात्मनः प्रकरणात् प्रकृतत्वात् 'क इत्था वेद यत्र सः' इति दुर्विज्ञेयत्वरूपासाधारणलिङ्गाच्चेत्यर्थः ॥

पूर्वं ब्रह्मक्षत्रपदस्य मृत्युपदसांनिध्यादनित्यवस्तुपरत्ववदिहापि पिबच्छब्दस्य संनिहितगुहाप्रवेशादिना बुद्धिक्षेत्रज्ञपरत्वमस्त्विति दृष्टान्तसंगत्येदमाह—

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

अत्र पूर्वपक्षे बुद्धिभिन्नजीवज्ञानम्, सिद्धान्ते तु जीवविलक्षणपरमात्मज्ञानमिति फलभेदः। कठवल्लीष्वेवं श्रूयते—

३. गुहाप्रविष्टाधिकरणम्।

'ऋतं पिबन्तौ सुकृतस्य लोके' इत्यादि। तत्र किं बुद्धिजीवौ निर्दिष्टौ, उत जीवपरमात्मानाविति विशये, बुद्धिजीवाविति पूर्वः पक्षः। सिद्धान्तस्तु— इह गुहां प्रविष्टौ जीवपरमात्मानावेव। कुतः, आत्मानौ हि, हि यस्मादात्मानौ चेतनौ, 'ऋतं पिबन्तौ' इति कर्मफलभोगश्रवणेन एकस्यात्मत्वे द्वितीयस्याप्यात्मत्वं न्याय्यम्। तत्र हेतुः तद्दर्शनात्, संख्याश्रवणे च संख्यावतोरेकरूपत्वस्य लोके दर्शनादित्यर्थः ॥

इतश्च जीवपरमात्मानावेव गुहां प्रविष्टावित्याह—

विशेषणाच्च ॥ १२ ॥

'सोऽध्वनः पारमाप्नोति....' 'देवं मत्वा धीरो हर्षशोकौ जहाति' इति जीवपरमात्मनोरेवास्मिन्प्रकरणे गन्तृगन्तव्यभावेन च विशेषितत्वादित्यर्थः ॥

पूर्वं प्राथमिकपिबन्ताविति द्वित्वश्रुत्या चेतनत्वेन तुल्यजीवपरदृष्ट्यनुसाराच्चरमश्रुता गुहाप्रवेशादयो नीताः। तर्हि तद्वदेव 'दृश्यते' इति प्राथमिकप्रत्यक्षत्वोक्त्या अक्षिप्रतिबि-

न्बात्मावगत्यनुरोधाच्चरमश्रुता अमृतत्वादयः स्तुत्यर्थत्वेन कथंचिन्नेया इति दृष्टान्तसंगत्येदमाह––

अन्तर उपपत्तेः ॥ १३ ॥

अत्र पूर्वपक्षे प्रतिबिम्बोपास्तिः, सिद्धान्ते ब्रह्मोपास्तिरिति फलभेदः । उपकोसलविद्यायां छान्दोग्ये श्रूयते–– 'य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच' इत्यादि । तत्र अक्षिण्यन्तरुपदिश्यमानः प्रतिबिम्बादिः, उत परमात्मेति संशये, प्रतिबिम्बादिरिति पूर्वः पक्षः । सिद्धान्तस्तु–– अन्तरः अक्षिमध्यगतः परमात्मैवोपदिश्यते । कुतः, उपपत्तेः आत्मत्वामृतत्वाभयत्वादीनामिहोक्तानां परमात्मन्येवोपपत्तेः । 'एतं संयद्वाम इत्याचक्षते' इत्यादिनिर्दिष्टसंयद्वामत्वादीनां च परमात्मन्येव, न प्रतिबिम्बेऽन्यत्र वोपपत्तिः । अतः अक्ष्यन्तरः पुरुषः परमात्मैवेत्यर्थः ॥

४. अन्तराधिकरणम् ।

ननु सर्वगतस्याल्पमक्षि स्थानं न संभवति इति पूर्वपक्षवीजं दूषयितुमिदमाह––

स्थानादिव्यपदेशाच्च ॥ १४ ॥

'यश्चक्षुषि तिष्ठन्' इत्यादिचक्षुरादीनि स्थानानि आदयो

येषाम् ‘तस्योदिति नाम’ ‘हिरण्यश्मश्रुः’ इत्यादिनामरूपाणां तेषामुपासनार्थत्वेन व्यपदेशादिहापि परमात्मनोऽक्षिस्थानादिव्यपदेशो नानुपपन्न इत्यर्थः ॥

प्रकरणादप्यक्षिस्थः परमात्मैवोपदिश्यत इत्याह—

सुखविशिष्टाभिधानादेव च ॥ १५ ॥

‘प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म’ इति वाक्योपक्रमे श्रूयमाणं यत्सुखविशिष्टं ब्रह्म तस्यैवेहाभिधानादित्यर्थः ॥

प्रकरणादक्षिस्थस्य ब्रह्मत्वमभिधाय लिङ्गादपि तदाह—

श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १६ ॥

श्रुता उपनिषत् रहस्यं ब्रह्मविज्ञानं यस्य स तथा, तस्य ब्रह्मविदो या गतिः देवयानाख्या ‘अथोत्तरेण तपसा ब्रह्मचर्येण’ इत्यादिश्रुतौ ‘अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्’ इति स्मृतौ च प्रसिद्धा। तस्या गतेः इहापि ‘आदित्याच्चन्द्रमसम्’ इत्यादावभिधानात् अक्षिस्थस्य ब्रह्मत्वं निश्चीयत इत्यर्थः ॥

इत्थं सिद्धान्तमभिधाय पूर्वपक्षं प्रत्याह—

अनवस्थितेरसंभवाच्च नेतरः ॥ १७ ॥

उपासकस्य सर्वत्राक्षिणि प्रतिबिम्बसंपादकबिम्बभूतपुरुषान्तरस्यानवस्थानात्, असंभवाच्च अमृतत्वादिगुणानां न

च्छायात्मादिरितरः । अतः परमात्मैवाक्षिस्थान उपदिश्यत इति सिद्धम् ॥

पूर्वम् 'स्थानादिव्यपदेशाच्च' इति सूत्रे 'यः पृथिव्यां तिष्ठन्' इत्याद्यन्तर्यामिब्राह्मणस्थम् 'यश्चक्षुषि तिष्ठन्' इत्यादिवाक्यम् अन्तर्यामिणो ब्रह्मत्वं सिद्धवत्कृत्योदाहृतम् । तदाक्षिप्य समाधत्त इत्याक्षेपसंगत्येदमाह—

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥

अत्र पूर्वपक्षे प्रधानस्य योगिनो जीवस्य वोपास्तिः, सिद्धान्ते परमात्मन एवेति फलभेदः । बृहदारण्यके श्रूयते—

५. अन्तर्याम्यधिकरणम् । 'यः पृथिव्यां तिष्ठन्.... पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः' इत्यादि । तत्र अन्तर्यामी प्रधानम्, उत अणिमादिविशिष्टो जीवः, उताहो परमात्मेति विशये, प्रधानजीवाविति पूर्वः पक्षः । सिद्धान्तस्तु—इह अधिदैवादिषु श्रूयमाणोऽन्तर्यामी परमात्मैव । कुतः, तद्धर्मव्यपदेशात् तस्य परमात्मनो ये धर्माः सर्वान्तर्यामित्वात्मत्वामृतत्वादयः साधारणाः तेषामिह व्यपदेशादित्यर्थः ॥

ननु प्रधानमन्तर्याम्यस्त्वित्याशङ्क्याह—

न च स्मार्तमतद्धर्माभिलापात् ॥ १९ ॥

स्मार्तं सांख्यस्मृतिकल्पितं प्रधानं नान्तर्यामि । कुतः, अतद्धर्माभिलापात्; अत्र तच्छब्देन प्रधानमुच्यते, न तत् अतत्, प्रधानभिन्नपरमात्मा, तस्यैव चेतनस्य ये धर्माः 'अदृष्टो द्रष्टाश्रुतः श्रोता....' इति वाक्यशेषे श्रूयमाणादृष्टृत्वादयः, तेषामिहाभिलापात् अभिधानादित्यर्थः ॥

ननु तर्हि चेतनो जीवो योगी भवत्वन्तर्यामीत्यत आह—

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ २० ॥

शारीरो नान्तर्यामीति पूर्वसूत्रात् नञोऽनुषङ्गः । कस्मात्, उभयेऽपि 'यो विज्ञाने तिष्ठन्....' इति काण्वाः, 'य आत्मनि तिष्ठन्....' इति माध्यंदिनाः, तेऽप्यन्तर्यामिणो भेदेन एनं शारीरं पृथिव्यादिवदधिष्ठानत्वेन नियम्यत्वेन च अधीयते । अतोऽधिदैवादिष्वन्तर्यामी परमात्मैवेति सिद्धम् ॥

पूर्वं प्रधानविरोधिद्रष्टृत्वादिधर्मवशात् न प्रधानमन्तर्यामीत्युक्तम् । तर्हि तद्विरोधिधर्माणामत्राश्रवणात् प्रधानमेवादृश्यत्वादिगुणको भूतयोनिः स्यादिति प्रत्युदाहरणसंगत्येदमाह—

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥

६. अदृश्यत्वाद्यधिकरणम् ।

पूर्वपक्षे प्रधानस्य शारीरस्य वा ध्यानम्, सिद्धान्ते निर्विशेषब्रह्मज्ञानमिति फलभेदः। मुण्डके श्रूयते—'यत्तदद्रेश्यमग्राह्यम्.... तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' इति। तत्र किम् अदृश्यत्वादिगुणको भूतयोनिः प्रधानम्, उत शारीरः, किं वा परमात्मेति संदेहे, प्रधानशारीराविति पूर्वः पक्षः। सिद्धान्तस्तु—'यत्तदद्रेश्यम्....' इत्यादौ श्रुता अदृश्यत्वादयो गुणाः यस्य, सोऽदृश्यत्वादिगुणको भूतयोनिः परमात्मैव। कुतः, धर्मोक्तेः 'यः सर्वज्ञः सर्ववित्' इत्यादिश्रूयमाणसर्वज्ञत्वादेः परमेश्वरधर्मस्य भूतयोनौ निर्देशात्। न ह्यचेतने प्रधाने किंचिज्ज्ञे शारीरे वा सर्वज्ञत्वादिधर्मः संभवति, येन भूतयोनिता स्यात्। अतो भूतयोनिः परमात्मैवेत्यर्थः ॥

भूतयोनेः परमात्मत्वे हेत्वन्तरमाह—

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २२ ॥

विशेषणं च भेदव्यपदेशश्च विशेषणभेदव्यपदेशौ ताभ्याम् इतरौ प्रधानजीवौ न भूतयोनी भवतः। तत्र 'दिव्यो ह्यमूर्तः पुरुषः....' इत्यादिना दिव्यत्वादिविशेषणश्रवणात् न जीवः; 'अक्षरात्परतः परः' इत्यक्षरस्याव्याकृतस्य पर-

मात्मनश्च भेदेन व्यपदिष्टत्वात् न प्रधानं भूतयोनिः; अपि तु परात्मैवेत्यर्थः ॥

भूतयोनेः परमात्मत्वे हेत्वन्तरमाह—

रूपोपन्यासाच्च ॥ २३ ॥

'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ' इत्यादिसर्वकार्यात्मकरूपस्योपन्यासात् परमात्मैव भूतयोनिरिति वृत्तिकारमतम् । 'पुरुष एवेदं विश्वं कर्म' इत्यादिसर्वात्मकरूपोपन्यासात् परमात्मैव भूतयोनिरिति भगवत्पादीयमतम् ॥

पूर्वं रूपोपन्यासप्रसङ्गात् त्रैलोक्यदेही वैश्वानरोऽत्र स्मृतो विचार्यत इति प्रसङ्गसंगत्येदमाह । यद्वा, पूर्वम् उपक्रमस्थादृश्यत्वादिसाधारणधर्मस्य वाक्यशेषस्थसर्वज्ञत्वादिलिङ्गेन ब्रह्मनिष्ठत्वमुक्तम् । तद्वदत्राप्युपक्रमस्थसाधारणवैश्वानरशब्दस्य वाक्यशेषस्थहोमाधारत्वलिङ्गेन जाठरनिष्ठत्वमस्त्विति दृष्टान्तसंगत्येदमाह—

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥

अत्र पूर्वपक्षे जाठरादेरुपास्तिः, सिद्धान्ते ब्रह्मण इति फलभेदः । छान्दोग्ये वैश्वानरविद्यायाम् 'को न आत्मा किं ब्रह्म' इति 'आत्मानमेवेमं वैश्वानरम्....' इति चोपक्रम्याम्ना-

यते— 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानर-

७. वैश्वानराधिकरणम्। मुपास्ते' इत्यादि। तत्र किं वैश्वानरो जाठराग्निः, उत भूताग्निः, उत आदित्यादिदेवता, आहो शारीरः, आहोस्वित् परमेश्वर इति विशये, जाठरादिरिति पूर्वः पक्षः। सिद्धान्तस्तु— वैश्वानरः परमात्मैव। कुतः, साधारणशब्दविशेषात् साधारणशब्दयोर्विशेषः तस्मादित्यर्थः। जाठरभूताग्न्यादित्यदेवतासु साधारणो वैश्वानरशब्दः; जीवपरमात्मनोः साधारणः आत्मशब्दः; तयोः वैश्वानरात्मशब्दयोः उभयत्र साधारणयोरपि सतोः परमात्मपरत्व एव विशेषोऽवगम्यते। 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः' इत्यादौ उक्तद्युमूर्धत्वादिः सर्वात्मकपरमात्मपरत्व एव विशेषोऽवगम्यते, उपपन्नतरत्वात्। तस्मात् वैश्वानरः परमात्मैव, न जाठरः; चरमश्रुतहोमाधारत्वापेक्षया प्रथमश्रुतद्युमूर्धत्वादेर्बलवत्त्वादिति सिद्धम्॥

स्मृत्या च श्रुत्यर्थः शक्यो निर्णेतुमित्याह—

स्मर्यमाणमनुमानं स्यादिति॥ २५॥

वैश्वानरशब्दस्य परमात्मपरत्वे स्मर्यमाणम् 'यस्याग्निरास्यं द्यौर्मूर्धा खम्...' इत्यादिस्मृत्युक्तत्रैलोक्यात्मकं रूपम्, अनुमानं स्यात् अनुमापकं लिङ्गं स्यादित्यर्थः। एवं च स्मृतौ

परमेश्वरस्यैवोक्तत्वात् तन्मूलभूतश्रुतौ विद्यमानवैश्वानरशब्दः परमात्मपर एवेति तात्पर्यम्। सूत्रे इतिशब्दः हेतौ; यस्मादेवं लिङ्गमस्ति तस्माद्वैश्वानरः परमात्मैवेति सिद्धम् ॥

सिद्धान्तविधिं विधान्तरेणाक्षिप्य समाधातुमाह—

शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते ॥ २६ ॥

शब्दस्तावत् वैश्वानरशब्दो न परमात्मपरः, जाठरादौ रूढत्वात्; आदिशब्देन 'हृदयं गार्हपत्यः' इत्याद्यग्नित्रितयकल्पनम् 'तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयम्' इत्यादिना प्राणाहुत्याधारतासंकीर्तनं च गृह्यते; एतेभ्यो हेतुभ्यो जाठर एव वैश्वानरः। किं च अन्तःप्रतिष्ठानात् 'पुरुषेऽन्तःप्रतिष्ठितं वेद' इति वैश्वानरस्य अन्तःप्रतिष्ठानश्रवणात् जाठर एव वैश्वानरो न परमात्मेति चेत्, न। कुतः, तथादृष्ट्युपदेशात् तथा जाठररूपेण परमेश्वरस्य दृष्टेः उपास्तेः उपदेशात्, 'मनोमयः....' इत्यादिवत्। अथवा तथा तस्मिन् जाठरे परमेश्वरदृष्टेरुपदेशात् 'मनो ब्रह्मेत्युपासीत' इतिवत्। ननु जाठर एव वैश्वानरो मुख्योऽस्तु, तत्राह— असंभवादिति; 'मूर्धैव

सुतेजाः' इत्यादेः जाठरे तावदसंभवादित्यर्थः । किं च पुरुषमपि चैनं वैश्वानरं वाजसनेयिनोऽधीयते— 'एतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद' इति । अतः परमेश्वरस्य सर्वात्मकतया पुरुषविधत्वाद्युपपत्तेः वैश्वानरः परमात्मैवेति सिद्धम् ॥

इत्थं द्युमूर्धत्वादिविशेषस्य जाठरविषयत्वं संदूष्य देवतादिविषयत्वं दूषयितुमाह—

अत एव न देवताभूतं च ॥ २७ ॥

देवता च भूतं च देवताभूतम्; एकवद्भावः । उभयमपि न वैश्वानरः । कुतः । अत एव उक्तेभ्यो हेतुभ्यः । न हि विकारस्य भूताग्नेः विकारान्तरद्युलोकाद्यात्मकत्वं संभवति । न च देवताया ऐश्वर्ययोगात्तदस्त्विति वाच्यम्, तस्याः परमेश्वराधीनैश्वर्यवत्त्वात् । अतो वैश्वानरः सर्वात्मकः परमात्मैवेत्यर्थः ॥

पूर्वं जाठरार्थकत्वं वैश्वानरादिशब्दस्याभ्युपेत्य जाठरोपाधिकं जाठरप्रतीकं वा ब्रह्मोपास्यमित्यभिहितम् । अधुना विना वैश्वानरोपाधिकल्पनां साक्षादेव परमात्मोपासनापरिग्रहे विरोधाभावं जैमिनिराचार्यो मन्यत इत्याह—

साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥

वैश्वानरस्य पूर्वापरपर्यालोचनया ब्रह्मत्वे निर्णीते, विश्वश्चासौ नरश्चेति विश्वानरः सर्वात्मकः, विश्वानर एव वैश्वानर इति योगेन वैश्वानरशब्दो ब्रह्मपरतया नेतव्य इति तात्पर्यार्थः ॥

ननु परमात्मपरत्वे कथं प्रादेशमात्रश्रुतिः इत्याशङ्क्य तां व्याख्यातुमाह—

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥

अनवच्छिन्नस्यापि परमात्मनः प्रादेशमात्रत्वमुपपद्यते। कुतः, अभिव्यक्तेः उपासकानामनुग्रहाय परमेश्वरो हृदयादिस्थानेषु प्रादेशपरिमाणोऽभिव्यज्यते किलेत्याश्मरथ्याचार्यो मन्यत इत्यर्थः ॥

मतान्तरमाह—

अनुस्मृतेर्बादरिः ॥ ३० ॥

प्रादेशमात्रहृदयपुण्डरीकस्थेन मनसा अनुस्मृतेर्ध्यानात् प्रादेशमात्र इत्युपचर्यत इति बादरिराचार्यो मन्यत इति ॥

मतान्तरमाह—

संपत्तेरिति जैमिनिस्तथाहि दर्शयति ॥ ३१ ॥

मूर्धप्रभृति चुबुकान्ते प्रादेशमात्रे वैश्वानरस्योपास्यत्वप्रतिपादनात् परमेश्वरस्य प्रादेशमात्रत्वं संपन्नम् । ततः प्रादेशमात्रत्वसंपत्तेः प्रादेशमात्रश्रुतिरुपपद्यत इति जैमिनिराचार्यो मन्यते । अस्मिन्नर्थे श्रुत्यन्तरसंवादमाह सूत्रकारः— तथा-हि दर्शयति ; 'प्रादेशमात्रमिव ह वै देवाः सुविदिता अभि-संपन्नाः' इत्यादि वाजसनेयब्राह्मणं मूर्धादिचुबुकान्तेषु द्युप्रभृतीन् पृथिव्यन्तानवयवान् त्रैलोक्यात्मनो वैश्वानरस्य संपादयत् प्रादेशमात्रत्वसंपत्तिं परमात्मनो दर्शयतीत्यर्थः ॥

प्रादेशमात्रश्रुतिः संपत्तिनिमित्ता इत्यत्र श्रुत्यन्तरमाह—

आमनन्ति चैनमस्मिन् ॥ ३२ ॥

अस्मिन्प्रादेशपरिमाणे मूर्धचुबुकान्तराले एनं परमेश्वरं जाबालाः 'य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति....' इत्याद्यामनन्ति । अतः प्रादेशमात्रश्रुतिरुपपन्नेत्यर्थः । तस्मात्सर्वात्मकः परमात्मैवेहोपास्य इत्यतिशोभनम् ॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्व-
प्रकाशिकायां प्रथमाध्यायस्य
द्वितीयः पादः ॥

ॐ

तृतीयः पादः ॥

इत्थं द्वितीयपादे अस्पष्टब्रह्मलिङ्गवाक्यानां प्रायश उपास्यत्वेन ब्रह्मणि समन्वयः प्रत्यपादि । अधुना तादृशानां वाक्यानां प्रायशो ज्ञेयत्वेन ब्रह्मणि समन्वयं प्रतिपादयितुं तृतीयपादोऽयमारभ्यते।

१ द्युभ्वाद्यधिकरणम् ।

वैश्वानराधिकरणे त्रैलोक्यात्मा वैश्वानरः परमात्मेत्यभिहितम्, तर्हि त्रैलोक्यायतनमन्यदित्याक्षिप्य समाधानादाक्षेपसंगत्या; उपक्रमस्थसाधारणशब्दस्य वाक्यशेषस्थद्युमूर्धत्वादिना ब्रह्मपरत्वमुक्तम्, तद्वदत्रापि उपक्रमस्थसाधारणायतनत्वस्य 'अमृतस्यैष सेतुः' इति वाक्यशेषस्थसेतुत्वलिङ्गेन परिच्छिन्नप्रधानादिपरत्वमस्त्विति दृष्टान्तसंगत्या वा इदमधिकरणमारभते—

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

अत्र पूर्वपक्षे प्रधानाद्युपास्तिः, सिद्धान्ते ब्रह्मप्रमितिरिति फलभेदः । मुण्डके श्रूयते—— 'यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतम्....' इत्यादि। तत्र द्युभ्वादीनामोतत्वेन किंचिदायतनं प्रतीयते । तत्किं प्रधानम्, उत जीवः, आहोस्विद्ब्रह्मेति

संशये, प्रधानादिरिति पूर्वः पक्षः। सिद्धान्तस्तु— द्युभ्वाद्याय-तनं द्यौश्च भूश्च द्युभ्वौ, द्युभ्वौ आदी यस्य द्यौःपृथिव्यन्त-रिक्षमित्येवमात्मकस्य, तद्द्युभ्वादि, तस्यायतनम् अधिष्ठानं ब्रह्मैव। कुतः, स्वशब्दात् स्वस्य परब्रह्मणो वाचको य आत्म-शब्दः 'तमेवैकं जानथ आत्मानम्' इति श्रुतः तस्मादित्यर्थः। एवं च उपक्रमस्थसाधारणायतनत्वस्य गौणसेतुत्वलिङ्गात्प्र-थमश्रुतात्मश्रुत्या ब्रह्मपरत्वमेव, न प्रधानादिपरत्वमिति भावः॥

द्युभ्वाद्यायतनं ब्रह्मेत्यत्र हेत्वन्तरमाह—

मुक्तोपसृप्यव्यपदेशात्॥ २॥

मुक्तैरुपसृप्यं मुक्तोपसृप्यम्, भावप्रधानोऽयं निर्देशः। तथा च 'तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्' इति ब्रह्मणोऽविद्यातत्कार्यसकलानर्थोच्छेदद्वारा मुक्तप्राप्यत्वस्य व्यपदिश्यमानत्वात्। अतो द्युभ्वाद्यायतनं ब्रह्मैवेत्यर्थः॥

सिद्धान्तमभिधाय प्रधानपक्षं निषेधति—

नानुमानमतच्छब्दात्॥ ३॥

अनुमीयत इत्यनुमानम्, सांख्यपरिकल्पितं प्रधानम्। न तद्द्युभ्वाद्यायतनम्। कुतः, अतच्छब्दात् तस्याचेतनस्य

प्रधानस्य प्रतिपादकः शब्दः तच्छब्दः, न तच्छब्दोऽतच्छब्दः, तस्मात् प्रधानप्रतिपादकशब्दस्येहाश्रवणात्, प्रत्युत तद्विपरीतचेतनप्रतिपादकस्य 'यः सर्वज्ञः सर्ववित्' इत्यादेः शब्दस्य श्रवणादित्यर्थः ॥

ननु तर्हि शारीरोऽस्तु द्युभ्वाद्यायतनम्, तस्य चेतनत्वादियोगादित्याशङ्कयाह—

प्राणभृच्च ॥ ४ ॥

प्राणभृत् शारीरोऽपि न द्युभ्वाद्यायतनम्। कुतः, अतच्छब्दादेव, शारीरस्य सर्वज्ञत्वासंभवात् तत्साधारण आत्मशब्दोऽतच्छब्द एव ॥

शारीरनिरासे हेत्वन्तरमाह त्रिभिः सूत्रैः—

भेदव्यपदेशात् ॥ ५ ॥

'तमेवैकं जानथ' इति ज्ञातृज्ञेयभावेन जीवपरयोर्भेदेन व्यपदिश्यमानत्वादित्यर्थः ॥

प्रकरणात् ॥ ६ ॥

'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातम्' इत्युपक्रमात् ब्रह्मण एवेदं प्रकरणम्। न हि शारीरज्ञानात् सर्वविज्ञानं संभवति। तस्मात्प्रकरणादपि न शारीर इत्यर्थः ॥

स्थित्यदनाभ्यां च ॥ ७ ॥

'द्वा सुपर्णा' इति मन्त्रे 'अनश्नन्नन्यो अभिचाकशीति' इत्यौदासीन्येन स्थितिः परमात्मनो निर्दिश्यते, 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति अदनं शारीरस्य। अतः स्थित्यदनाभ्यां न शारीरो द्युभ्वाद्यायतनम्, अपि तु परं ब्रह्मैवेति सिद्धम् ॥

पूर्वमात्मशब्दात् द्युभ्वाद्यायतनं ब्रह्मेत्युक्तम्। तन्न; 'तरति शोकमात्मवित्' इत्यत्राब्रह्मणि प्राणेऽपि आत्मशब्दप्रयोगादित्याक्षेपसंगत्येदमाह––

भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥

अत्र पूर्वपक्षे प्राणोपास्तिः, सिद्धान्ते तु ब्रह्मधीरिति फलभेदः। छान्दोग्ये श्रूयते— 'भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति। यत्र नान्यत्पश्यति....' इत्यादि। तत्र किं प्राणो भूमा, उत परमात्मेति संदेहे, प्राण इति पूर्वः पक्षः।

२. भूमाधिकरणम्।

सिद्धान्तस्तु—भूमा परमात्मैव। कुतः, संप्रसादादध्युपदेशात् सम्यक्प्रसीदत्यस्मिन् जीव इति संप्रसादः, सुषुप्त्यवस्था, तस्यां प्राणो जागर्तीति संप्रसादशब्देन प्राणोऽभिधीयते; प्राणादधि प्राणोपदेशानन्तरम्, 'एष तु वा अतिवदति यः

सत्येनातिवदति' इति तुशब्देन प्राणवादस्यानतिवादित्वमभिधाय सत्यशब्दवाच्यपरमात्मवादस्यातिवादित्वं ब्रुवता भूम्न एवोपदिश्यमानत्वात् । 'तरति शोकमात्मवित्' इति प्रश्नवाक्ये आत्मोपक्रमेणात्मप्रकरणात्प्राणसंनिधेर्दुर्बलतया न प्राणो भूमा, परमात्मैवेति सिद्धम् ॥

परमात्मनो भूमत्वे युक्त्यन्तरमाह—

धर्मोपपत्तेश्च ॥ ९ ॥

'यत्र नान्यत्पश्यति' इत्यादिनोक्तानां सर्वव्यवहाराभावादिधर्माणां परमात्मन्येवोपपत्तेः परमात्मैव भूमेत्यर्थः ॥

पूर्वं सत्यशब्दस्य ब्रह्मणि रूढत्वात् भूमा ब्रह्मेत्युक्तम् । तद्वदिहाप्यक्षरशब्दस्य वर्णे रूढत्वाद्वर्ण एवाक्षरमस्त्विति दृष्टान्तसंगत्येदमाह—

अक्षरमम्बरान्तधृतेः ॥ १० ॥

अत्र पूर्वपक्षे ओंकाररूपाक्षरोपास्तिः, सिद्धान्ते ब्रह्मज्ञानमिति फलभेदः । बृहदारण्यके गार्गीं प्रति याज्ञवल्क्य आह—

३. अक्षराधिकरणम् । 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्य- स्थूलम्....' इत्यादि । तत्र किम् अक्षरशब्देन वर्ण उच्यते, उत ब्रह्मेति संदेहे, वर्ण इति पूर्वः पक्षः । सिद्धा-

न्तस्तु— न क्षरतीत्यक्षरं ब्रह्मैव। कुतः, अम्बरान्तधृतेः 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' इति पृथिव्यादेः आकाशान्तस्य विकारजातस्य धारणादित्यर्थः ॥

नन्वम्बरान्तधारणं प्रधानेऽपि संभवतीत्यत आह—

सा च प्रशासनात् ॥ ११ ॥

सा च धृतिः परमेश्वरस्यैव कर्म, नान्यस्याचेतनस्य। कुतः प्रशासनात् 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' इत्यादिना प्रशासनश्रवणादित्यर्थः ॥

प्रधानादिनिरासेन ब्रह्मोपादाने हेत्वन्तरमाह—

अन्यभावव्यावृत्तेश्च ॥ १२ ॥

अन्यस्य प्रधानादेः भावो धर्मः सोऽन्यभावः, तद्व्यावृत्तेः 'तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ....' इत्यादितद्विपरीतधर्मश्रवणात् न प्रधानादि अक्षरम्; किंतु ब्रह्मैवेति सिद्धम् ॥

पूर्वं वर्णे रूढस्याक्षरशब्दस्य जगद्धृतिलक्षणलिङ्गेन ब्रह्मणि 'न क्षरति' इति योगवृत्तिराश्रिता। तद्वदिहापि देशपरिच्छिन्नफलश्रुतिलिङ्गेन परशब्दस्य आपेक्षिकपरत्वविशिष्टे हिरण्यगर्भे वृत्तिरस्त्विति दृष्टान्तसंगत्येदमाह—

ईक्षतिकर्मव्यपदेशात्सः ॥ १३ ॥

अत्र पूर्वपक्षे कार्यब्रह्मोपास्तिः, सिद्धान्ते परब्रह्मोपास्तिरिति फलभेदः। प्रश्नोपनिषदि श्रूयते-- 'यः पुनरेतं त्रिमात्रेणो-

४. ईक्षतिकर्माधिकरणम्। मित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत....' इति। तत्र ध्येयं वस्तु किं हिरण्यगर्भाख्यमपरं ब्रह्म, उत परं ब्रह्मेति विशये, अपरमिति पूर्वः पक्षः। सिद्धान्तस्तु-- सः ध्यातव्यः परमात्मैव। कुतः, ईक्षतिकर्मव्यपदेशात् 'परात्परं पुरिशयं पुरुषमीक्षते' इति वाक्यशेषे ध्यातव्यस्य ईक्षतिकर्मत्वेन व्यपदेशात्, ध्यानेक्षणयोरेकविषयत्वनियमात्। अतः क्रममुक्त्यर्थमोंकारावलम्बनेन ध्यातव्यः परमात्मैवेति समञ्जसम्॥

पूर्वं परपुरुषशब्दस्य ब्रह्मणि रूढत्वात् ब्रह्म उपास्यमित्युक्तम्। तद्वदिहाप्याकाशशब्दस्य भूताकाशे रूढत्वात् तस्यैवोपास्यत्वमस्त्विति दृष्टान्तसंगत्येदमाह—

दहर उत्तरेभ्यः॥ १४॥

अत्र पूर्वपक्षे आकाशाद्युपास्तिः, सिद्धान्ते ब्रह्मोपास्तिरिति फलभेदः। छान्दोग्ये श्रूयते— 'अथ यदिदमस्मिन्ब्र-

५. दहराधिकरणम्। ह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः' इत्यादि। तत्र दहरपुण्डरीके यो दहराकाशः श्रुतः स किं भूताकाशः, उत जीवः, उताहो

परमात्मेति विशये, भूताकाशादिरिति पूर्वः पक्षः । सिद्धान्तस्तु — दहराकाशः परमात्मैव । कस्मात्, उत्तरेभ्यः 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते एष आत्मापहतपाप्मा' इत्यादिवाक्यशेषगतेभ्य आकाशोपमानत्वद्यावापृथिव्यधिष्ठानत्वात्मत्वापहतपाप्मत्वादिहेतुभ्य इत्यर्थः ॥

दहराकाशस्य परब्रह्मपरत्वे हेत्वन्तरमाह—

गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च ॥ १५ ॥

'इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' इति दहरवाक्यशेषे प्रजाशब्दवाच्यानां जीवानां प्रत्यहमुच्यमाना प्रकृतदहरविषया या गतिः, यश्च ब्रह्मलोकशब्दः, ताभ्यां दहरस्य परब्रह्मतावगम्यते । तथाहि दृष्टं श्रुत्यन्तरे 'सता सोम्य तदा संपन्नो भवति' इति । एवं च प्रत्यहं हिरण्यगर्भलोकगमनासंभवाद्ब्रह्मैव लोक इति सामानाधिकरण्यस्य परिग्रहे अहरहर्गमनमेव लिङ्गं ज्ञापकम् । चशब्देन निषादस्थपतिन्यायोऽपि सामानाधिकरण्यपरिग्रहे सूचित इति ध्येयम् ॥

दहरस्य परब्रह्मत्वे हेत्वन्तरमाह द्वाभ्याम्—

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १६ ॥

'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय' इति श्रुताया धृतेरपि हेतोर्दहराकाशः परमात्मैव । अस्य च सर्वलोकविधारणलक्षणमहिम्नः अस्मिन् परमात्मनि 'एष भूतपाल एष सेतुर्विधरणः' इत्यादिश्रुत्यन्तरेऽप्युपलब्धेरित्यर्थः ॥

प्रसिद्धेश्च ॥ १७ ॥

दहराकाशस्यापि परमात्मन्येव प्रसिद्धेः, लोकरूढ्यपेक्षया 'आकाशो वै नाम नामरूपयोर्निर्वहिता' इत्यादिश्रौतरूढेर्बलीयस्त्वाद्दहराकाशः परमात्मैव, न भूताकाश इति सिद्धम् ॥

ननु तर्हि जीवोऽस्त्वित्याशङ्क्याह—

इतरपरामर्शात्स इति चेन्नासंभवात् ॥ १८ ॥

'एष संप्रसादः' इति संप्रसादशब्देन इतरस्याप्यस्मिन्प्रकरणे परामर्शात्स जीवो दहराकाशोऽस्त्विति चेत्, न। असंभवात् जीवे आकाशोपमेयत्वापहतपाप्मत्वादीनामसंभवादित्यर्थः ॥

इत्थमभिहितासंभवस्यासिद्धिमाशङ्क्य परिहरति—

उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १९ ॥

उत्तरात् 'य एषोऽक्षिणि पुरुषो दृश्यते' इत्यादिप्रजापतिवाक्यात् जाग्रदाद्यवस्थापन्ने जीवे अपहतपाप्मत्वादिसंभवाज्जीव एव दहराकाश इति चेत्, अत्राह—आविर्भूतस्वरूपस्तु । तुशब्दो जीवशङ्काव्यावृत्त्यर्थः । यतः तत्राप्याविर्भूतं पारमार्थिकं स्वरूपमस्येत्याविर्भूतस्वरूपो जीवो विवक्षितः, न तु जीवत्वेन रूपेण; 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इत्युपसंहारदर्शनात् । अतः तस्य ब्रह्मत्वेनापहतपाप्मत्वादिसंभव इति जीवत्वेन तदसंभवान्न पूर्वसूत्रस्थहेतुरसिद्ध इति भावः ॥

ननु तर्हि 'संप्रसादः' इति जीवपरामर्शो व्यर्थः स्यादित्यत आह—

अन्यार्थश्च परामर्शः ॥ २० ॥

जीवपरामर्शः 'अभिनिष्पद्यते' इति उपसंपत्तव्यपरमात्मपर एव, न जीवप्रतिपादनार्थ इत्यर्थः ॥

जीवपूर्वपक्षबीजमाशङ्क्य परिहरति—

अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २१ ॥

'दहरोऽस्मिन्नन्तराकाशः' इत्याकाशस्याल्पत्वश्रवणान्न परमात्मत्वम्, किंतु जीवत्वमिति चेत्, तत्र समाधानमुक्तम्

'अर्भकौकस्त्वात्तद्व्यपदेशाच्च....' इत्यत्र । तस्माद्दहराकाशः परमात्मैवोपास्य इति सिद्धम् ॥

पूर्वम् 'परं ज्योतिरुपसंपद्य....' इति वाक्यार्थविचारप्रसङ्गात् 'तच्छुभ्रं ज्योतिषां ज्योतिः....' '....आयुर्होपासतेऽमृतम्' इति वाक्योक्तपरंज्योतिष्ट्वसाधकम् 'न तत्र सूर्यः' इत्यादिवाक्यं विचार्यत इति प्रसङ्गसंगत्येदमाह––

अनुकृतेस्तस्य च ॥ २२ ॥

अत्र पूर्वपक्षे अलौकिकतेजस उपास्तिः, सिद्धान्ते निर्विशेषब्रह्मधीरिति फलभेदः। मुण्डके श्रूयते— 'न तत्र सूर्यो भाति न चन्द्रतारकम्...' इत्यादि। तत्र सूर्यादिजगद्भासकतया प्रतीयमानं किं तेजोविशेषः, उत ब्रह्मेति संशये, प्रबलेन तेजसा दुर्बलस्याभिभवदर्शनात्तेजोविशेष इति पूर्वः पक्षः। सिद्धान्तस्तु––तथा प्रतीयमानं ब्रह्मैव। कुतः, अनुकृतेः अनुकृतिरनुकरणं तस्मात्, 'तमेव भान्तमनुभाति सर्वम्' इत्यनुभानात्। न हि सूर्यादिकं तेजस्तेजोऽन्तरमनुभाति, लोके तददर्शनात्। तर्हि प्राप्तं स्वतः सूर्यादेर्भानमित्यत्राह— तस्य चेति। 'तस्य भासा सर्वमिदं विभाति' इति ब्रह्मभासा भास्यत्वावगमात्। न च विपरीतं किं न स्यादिति वाच्यम्, 'तच्छुभ्रं ज्योतिषां

६. अनुकृत्यधिकरणम्।

ज्योतिः' इति वाक्योपक्रमे ब्रह्मणः स्वयंज्योतिष्ट्वावगमात्, 'न तत्र...' इति तच्छब्देन तस्यैव प्रकृतज्योतिषः परामर्शात्। अतः स्वयंज्योतिः सूर्यादिसकलजगदवभासकं ब्रह्मैव, न तु लौकिकं तेजः, तस्यात्राप्रकृतत्वादिति सिद्धम्॥

अस्मिन् श्रुत्युक्तार्थे स्मृतिं दर्शयितुमाह—

अपि च स्मर्यते॥ २३॥

'न तद्भासयते सूर्यो न शशाङ्को न पावकः' 'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्....' इति भगवद्गीतासु स्मर्यत इत्यर्थः॥

पूर्वमनुभानादिना लिङ्गेन तत्रेति विषयसप्तमीं कृत्वा न भातीत्यादौ णिजध्याहारेण न भासयतीत्यर्थो वर्णितप्रायः। तथे-

७. प्रमिताधिकरणम्। हापि 'अङ्गुष्ठमात्रः' इति परिमाणलिङ्गाज्जीवमादाय ईशानोऽस्मीति भावयेदिति विध्यध्याहारेणोपास्तिपरमङ्गुष्ठवाक्यमस्त्विति दृष्टान्तसंगत्येदमाह—

शब्दादेव प्रमितः॥ २४॥

अत्र पूर्वपक्षे जीवोपास्तिः, सिद्धान्ते तस्यैव परमात्मतया धीरिति फलभेदः। कठवल्लीषु श्रूयते—'अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्य....' इति।

तत्र किमयमङ्गुष्ठवाक्यप्रतिपाद्यो जीवः, उत ब्रह्मेति संदेहे, जीव इति पूर्वः पक्षः । सिद्धान्तस्तु—— प्रमितः वाक्यप्रतिपाद्यः प्रत्यगभिन्नपरमात्मैव । कुतः, शब्दादेव 'ईशानो भूतभव्यस्य....' इत्यत्र ईशानशब्दात् । न चाङ्गुष्ठमात्रजीवलिङ्गविरोधः, लिङ्गश्रुत्योर्विरोधे श्रुतेरेव प्रबलत्वात् । न च परमात्मनोऽङ्गुष्ठमात्रत्वानुपपत्तिः, अङ्गुष्ठमात्रजीवानुवादेन ब्रह्माभेदबोधनादिति समञ्जसम् ॥

ननु जीवस्य परमार्थतः सर्वगतब्रह्मत्वेन कथमङ्गुष्ठमात्रत्वमित्यत आह——

हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ २५ ॥

तुशब्दः शङ्कानिरासार्थः । मनुष्याधिकारत्वाच्छास्त्रस्य, मनुष्याणां हृदयस्याङ्गुष्ठमात्रत्वात्तदपेक्षया सर्वगतस्यात्मनोऽङ्गुष्ठमात्रत्वमविरुद्धम् । अतोऽङ्गुष्ठवाक्ये प्रतिपाद्यः परमात्मैवेति सिद्धम् ॥

पूर्वं मनुष्याधिकारं शास्त्रमित्युक्ते तर्ह्यमनुष्याणां देवादीनामधिकारो न स्यादित्याक्षिप्य समाधीयत इत्याक्षेपसंगत्या प्रसङ्गसंगत्या वा इदमाह——

तदुपर्यपि बादरायणः संभवात् ॥ २६ ॥

अत्र पूर्वपक्षे मन्त्राद्यप्रामाण्यादुपगमनादिवाक्यानामपि स्वार्थे तदयोगात्तत्त्वमस्यादेरपि नैक्यनिष्ठतेति फलम्, सिद्धान्ते तत्सर्वसंभवादैक्यनिष्ठतेति फलम्।

८. देवताधिकरणम्। बृहदारण्यके श्रूयते— 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' इत्यादि। तत्र किं देवानां ब्रह्मविद्यायामधिकारोऽस्ति न वेति संदेहे, नास्तीति पूर्वः पक्षः। सिद्धान्तस्तु— तदुपर्यपि, तेषां मनुष्याणामुपरिष्टात् ये देवादयः तेषामपि ब्रह्मविद्यायामधिकारोऽस्तीति बादरायण आचार्यो मन्यते स्म। कस्मात्, संभवात् अर्थित्वसामर्थ्याद्यधिकारकारणस्य संभवादित्यर्थः॥

ननु यदीन्द्रादीनां विग्रहवत्त्वेन विद्याधिकारः, तर्हि कर्मणि विरोध इत्याशङ्क्याह—

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्॥ २७॥

इन्द्रादीनामृत्विगादिवदेकस्य शरीरस्य अनेकत्र कर्मणि युगपत्संनिधानासंभवात्कर्मविरोधः प्रसज्येतेति चेत्, न। कस्मात्, अनेकप्रतिपत्तेर्दर्शनात् एकस्येन्द्रस्य अनेकेषां शरीराणां युगपत्प्राप्तेः 'स एकधा भवति त्रिधा भवति' इत्यादिश्रुतौ दर्शनात्। यद्वा अनेकत्र कर्मणि एकस्य प्रतिपत्तिः अङ्गभावः तस्य

लोके दर्शनात् । यथा बहुभिर्नमस्कुर्वाणैर्युगपदेको ब्राह्मणो नमस्क्रियमाणो दृश्यते तद्वदित्यर्थः ॥

ननु मास्तु कर्मणि विरोधः, शब्दे स्यादित्याशङ्क्याह—

शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॥ २८ ॥

शब्दे वेदवाक्ये अनित्यविग्रहवद्देवादेर्नित्यवेदार्थत्वाङ्गीकारे शब्दस्य अर्थेन सह नित्यसंबन्धाभावेन नित्यानित्यसंयोगविरोध इति चेत्, न; अतः प्रभवात् अत एव हि वैदिकाच्छब्दात् देवादिजगत्प्रभवात् उत्पत्तेः । कथं तत्प्रभवत्वं देवादेः । प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्याम्; 'एत इति वै प्रजापतिर्देवानसृजत' इत्यादिका श्रुतिः, 'वेदशब्देभ्य एवादौ' इत्यादिका स्मृतिः । ताभ्यां नित्यशब्दप्रभवत्वं देवादेरवगम्यते । एवं च देवादिव्यक्त्युत्पत्तावपि तन्निष्ठनित्याकृतेर्वेदार्थत्वात्तत्संबन्धो नित्य इत्यविरुद्धम् ॥

नन्वेवमपि 'अतः प्रभवात्' इति देवादेर्वेदप्रभवत्वोक्त्या तदुत्पादकवेदस्यापि प्रभवप्रसङ्गादनित्यत्वमाशङ्क्याह—

अत एव च नित्यत्वम् ॥ २९ ॥

अत एव नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वादेव

वेदस्य नित्यत्वं प्रत्येतव्यम् । कर्त्रस्मरणात्सिद्धमेव वेदनित्यत्वमनेन दृढीकृतमिति बोध्यम् ॥

ननु महाप्रलये आकृतेरप्यनित्यत्वाच्छब्दार्थसंबन्धस्यानित्यत्वविरोधस्तदवस्थ एवेत्याशङ्क्याह––

समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॥ ३० ॥

सुषुप्तिप्रबोधयोरिव सृष्टिप्रलययोरावृत्तावपि प्रलये प्रपञ्चस्य संस्कारात्मना अविद्यायां विद्यमानत्वेन पूर्वकल्पप्रपञ्चसमाननामरूपत्वात् उत्तरकल्पप्रपञ्चस्य आकृतेर्नित्यतया न शब्दार्थसंबन्धस्यानित्यत्वविरोधः । कथं समाननामरूपत्वम् । दर्शनात् स्मृतेश्च । 'धाता यथा पूर्वमकल्पयत्' इति श्रुतौ दर्शनात्; 'यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानि तान्येव तथा भावा युगादिषु' इत्यादिस्मृतेश्च ॥

इत्थमभिहितं देवानामधिकारमाक्षिपति––

मध्वादिष्वसंभवादनधिकारं जैमिनिः ॥ ३१ ॥

ब्रह्मविद्यायां देवादीनामनधिकारं जैमिनिराचार्यो मन्यते । कस्मात्, मध्वादिष्वसंभवात् । 'असौ वा आदित्यो देवमधु' 'आदित्यो ब्रह्मेत्यादेशः' इत्यादिषु मधुब्रह्माध्या-

सेनादित्यदेवतोपासनेषु मनुष्याधिकारकेषु तेषामेवादित्यादीनामधिकारासंभवात्। न ह्येकस्योपास्योपासकभावः संभवति, तस्य भेदनिष्ठत्वात्। तथा चायं प्रयोगः— ब्रह्मविद्या न देवादीनधिकरोति, विद्यात्वान्मधुविद्यावदिति ॥

ननु कचिदनधिकारान्न सर्वत्रानाधिकारोऽस्ति, ब्राह्मणस्य राजसूयानधिकारेऽपि बृहस्पतिसवेऽधिकारादित्याशङ्कयाह—

ज्योतिषि भावाच्च ॥ ३२ ॥

लौकिकयोरादित्यशब्दप्रत्यययोर्ज्योतिर्मण्डले भावात्, तेषामस्मदादिवदिष्टानिष्टप्राप्तिपरिहाररूपचेष्टाया अदर्शनेनाचेतनत्वावधारणात्, तदतिरिक्तस्याचेतनस्य विग्रहादिमतः प्रत्यक्षाद्यगोचरत्वात्, तद्विग्रहादिप्रतिपादकानां मन्त्राणामन्यपरत्वेन स्वार्थे प्रामाण्याभावान्न देवानां विद्याधिकार इति सूत्रद्वयस्य तात्पर्यार्थः ॥

इत्थं पूर्वपक्षे, सिद्धान्तयति—

भावं तु बादरायणोऽस्ति हि ॥ ३३ ॥

तुशब्दो जैमिनिमतनिरासार्थः । बादरायणस्त्वाचार्यो देवादीनां विग्रहवत्त्वेन ब्रह्मविद्यायामधिकारभावं मन्यते । कस्मात्, अस्ति ह्यर्थित्वाद्यधिकारकारणम् । न हि काचिद-

धिकारो नेति सर्वत्र वक्तुं पार्यते, निर्गुणविद्यायां संभवाद्बृहस्पतिसवे ब्राह्मणस्येव । न च विग्रहवत्त्वं नेति वाच्यम् । तदप्यस्ति हि, तत्प्रतिपादकमन्त्राणां मानान्तरविरोधसंवादाभावेन प्रमाणत्वादिति दिक् ॥

पूर्वं यथा 'तद्यो यो देवानाम्....' इति देवशब्दश्रुत्या मनुष्याधिकारनियमापवादेन देवानामधिकार उक्तः, तथेह शूद्रशब्दश्रुत्या द्विजजात्यधिकारनियममपोद्य शूद्रस्याप्यधिकारोऽस्त्विति दृष्टान्तसंगत्येदमाह—

शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥ ३४ ॥

अथ पूर्वपक्षे जातिशूद्रस्यापि ब्रह्मविद्यायां त्रैवर्णिकादविशेषः फलम्, सिद्धान्ते ततो विशेष इति विवेकः। छान्दोग्ये संव-

९. अपशूद्राधिकरणम् ।

र्गविद्यायां श्रूयते—'अहहारे त्वा शूद्र तवैव सह गोभिरस्तु' इति । तत्र श्रूयमाणस्य शूद्रस्य ब्रह्मविद्यायामधिकारोऽस्ति न वेति संदेहे, अस्तीति पूर्वः पक्षः । सिद्धान्तस्तु— अस्य जानश्रुतेः क्षत्रियस्य तदनादरश्रवणात् तस्य हंसस्यानादरश्रवणाद्या शुगुत्पन्ना, सा शूद्रशब्देन सूच्यते हि रैक्वेण स्वस्य सर्वज्ञत्वज्ञापनार्थम् । योगेनापि शूद्रशब्दस्य क्षत्रियपरत्वमाह— तदाद्रवणात् । तं रैक्वं

प्रति जानश्रुतिः विद्याराहित्यजनितया शुचा दुद्रावेति शूद्रो जानश्रुतिरित्युच्यते । अतो न शूद्रस्याधिकार इत्यर्थः ॥

ननु मुख्य एव शूद्रो जानश्रुतिरस्तु, किं जघन्येन योगेनेत्यत आह——

क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥

जानश्रुतिर्न मुख्यशूद्रः । कुतः, क्षत्रियत्वगतेः क्षत्रियत्वस्यावगतेः । तत्कस्मात्, उत्तरत्र संवर्गविद्यावाक्यशेषे चैत्ररथेन प्रसिद्धक्षत्रियेण अभिप्रतारिणा समभिव्याहारात्मकलिङ्गादित्यर्थः । समानजातीयानामेव हि प्रायेण सहचारो भवतीति भावः । अतो न जातिशूद्रस्याधिकार इति सिद्धम् ॥

ननु कस्मान्नाधिकार इत्यत आह——

संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ ३६ ॥

'तं होपनिन्ये' 'अधीहि भगव इति होपससाद' इत्यादिविद्याप्रदेशेषूपनयनादिसंस्कारपरामर्शात् । तर्हि शूद्रस्याप्युपनयनं कल्प्यतामित्यत आह—— तदभावाभिलापाच्च । 'न शूद्रे पातकं किंचिन्न च संस्कारमर्हति' इत्यादिना उपनयनादिसंस्काराभावाभिधानादित्यर्थः ॥

किं च—–

तद्भावनिर्धारणे च प्रवृत्तेः ॥ ३७ ॥

तस्य जाबालस्य सत्यवचनेन शूद्रत्वाभावनिर्धारणे सत्येव गौतमस्य विद्योपदेशे प्रवृत्तिदर्शनात् । अतो न शूद्रस्याधिकार इत्यर्थः ॥

अपि च—–

श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॥ ३८ ॥

स्मृतेः ‘अथास्य वेदमुपश्रृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम्’ ‘तस्माच्छूद्रसमीपे नाध्येतव्यम्’ ‘न शूद्राय मतिं दद्यात्’ ‘द्विजातीनामध्ययनमिज्या दानम्’ इत्यादिस्मृतितो वेदश्रवणस्य तदध्ययनस्य तदर्थयोस्तत्प्रयोजनयोरर्थज्ञानानुष्ठानयोश्च प्रतिषेधात् । अतः कथंचिदपि न शूद्रस्य ब्रह्मविद्यायां विधिपूर्वकाधिकार इति सिद्धम् ॥

समाप्तः प्रासङ्गिकोऽधिकारविचारः । अधुना प्रकृतवाक्यार्थविचारं प्रवर्तयिष्यामः । प्रासङ्गिकत्वान्नाव्यवहितेनास्य
१०. कम्पना- संगत्यपेक्षा । पूर्वम् ‘शब्दादेव प्रमितः’
धिकरणम् । इत्यत्र ब्रह्मवाक्ये जीवानुवादो ब्रह्मज्ञानायेत्युक्तम् । न तथेह ‘यदिदम्’ इति वाक्ये प्राणानुवादो

युक्तः, तस्य स्वरूपतः कल्पितस्य ब्रह्मैक्यायोगादिति प्रत्युदाहरणसंगत्येदमाह---

कम्पनात् ॥ ३९ ॥

अत्र पूर्वपक्षे प्राणोपास्तिः, सिद्धान्ते निर्विशेषब्रह्मधीरिति फलभेदः। कठवल्लीषु श्रूयते---'यदिदं किं च जगत्सर्वं प्राण एजति निःसृतम्' इत्यादि। तत्र 'एजृ कम्पने' इति धातोः कम्पनार्थकत्वात्सर्वजगत्कम्पनहेतुः प्राणः प्रतीयते। स किं वायुविकारः, उत परमात्मेति संदेहे, वायुविकार इति पूर्वः पक्षः। सिद्धान्तस्तु--- 'प्राणस्य प्राणम्...' इति प्राणशब्दस्य परमात्मनि प्रसिद्धेः इह प्राणशब्दवाच्यः परमात्मैव। कुतः, कम्पनात् सर्वस्य सवायुकस्य जगतो जीवनादिचेष्टाहेतुत्वात्। तद्धेतुत्वं च 'न प्राणेन नापानेन....' इत्यादिश्रुतिप्रसिद्धम् ॥

पूर्वं सर्वशब्दश्रुतिसंकोचानुपपत्त्या प्रकरणात्प्राणशब्दं ब्रह्मेत्युक्तम्। न तथेह संप्रसादवाक्ये प्रकरणानुग्राहकं किंचिदस्ति, येन प्रकरणाज्ज्योतिःशब्दितं ब्रह्म स्यादिति प्रत्युदाहरणसंगत्येदमाह---

ज्योतिर्दर्शनात् ॥ ४० ॥

अत्र पूर्वपक्षे आदित्योपास्त्या क्रममुक्तिः, सिद्धान्ते ब्रह्म-

ज्ञानान्मुक्तिरिति फलभेदः । छान्दोग्ये प्रजापतिविद्यायां
११. ज्योतिरधिकरणम् । श्रूयते—'य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य...' इत्यादि । तत्र किं ज्योतिःशब्दितमादित्यादितेजः, उत ब्रह्मेति विशये, आदित्यादितेज इति पूर्वः पक्षः । सिद्धान्तस्तु— ज्योतिरत्र परब्रह्मैव । कुतः, दर्शनात् 'य आत्मापहतपाप्मा' इत्युपक्रमालोचनया ब्रह्मण एव प्रतिपाद्यतयानुवृत्तिदर्शनादित्यर्थः ॥

यथा पूर्वमुपक्रमवशादर्थान्तरे प्रसिद्धोऽपि ज्योतिःशब्दः स्वार्थात्प्रच्यावितः, तथाकाशोपक्रमवशाद्ब्रह्मादिशब्दोऽपि स्वार्थात्प्रच्याव्यतामिति दृष्टान्तसंगत्येदमाह—

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥

अत्र पूर्वपक्षे भूताकाशात्मकब्रह्मोपास्त्या क्रममुक्तिः, सिद्धान्ते ब्रह्मधिया मुक्तिरिति फलभेदः । छान्दोग्ये श्रूयते—
१२. अर्थान्तरत्वादिव्यपदेशाधिकरणम् । 'आकाशो वै नाम नामरूपयोर्निर्वहिता...' इत्यादि । तत्र किमाकाशशब्दितो भूताकाशः, उत परमात्मेति विशये, भूताकाश इति पूर्वः पक्षः । सिद्धान्तस्तु— परमात्मैव आकाशशब्दितः । कस्मात्, अर्थान्तरत्वादिव्यपदेशात् 'ते यदन्तरा' इत्याकाशस्य नामरूपाभ्यामर्थान्तरत्वेन व्यप-

देशात् । आदिशब्देन 'तद्ब्रह्म तदमृतं स आत्मा' इति ब्रह्मत्वादिव्यपदेशो द्रष्टव्यः ॥

पूर्वं नामरूपाभ्यां भेदोक्तेराकाशो ब्रह्मेत्युक्तम्, तन्न; 'प्राज्ञेनात्मना संपरिष्वक्तः...' इत्यत्राभिन्नेऽपि जीवे भेदोपचारादित्याक्षिप्य समाधानादाक्षेपसंगत्येदमाह––

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥

अत्र पूर्वपक्षे जीवानुवादेन कर्मशेषकर्तृस्तुतिः, सिद्धान्ते तदनुवादेन तत्तादात्म्यधीरिति फलभेदः । बृहदारण्यके श्रूयते––'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' इत्यादि । तत्किं जीवानुवादकम्, उत तदनुवादेनासंसारिब्रह्मस्वरूपप्रतिपादकमिति संदेहे, जीवानुवादकमिति पूर्वः पक्षः । सिद्धान्तस्तु––विज्ञानमयसुषुप्त्याद्यवस्थावज्जीवानुवादेन ब्रह्माभेदप्रतिपादकमिदं वाक्यम् । कस्मात्, 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्' 'प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति' इति सुषुप्त्युत्क्रान्त्योरवस्थयोः शारीराद्भेदेन परमात्मनः प्राज्ञशब्देन व्यपदेशादित्यर्थः ॥

१३. सुषुप्त्युत्क्रान्त्यधिकरणम् ।

इतश्च ब्रह्माभेदप्रतिपादकमिदं वाक्यमित्याह––

पत्यादिशब्देभ्यः ॥ ४३ ॥

'सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः' इति पत्यादिशब्दा असंसारित्वप्रतिपादकाः, 'स न साधुना कर्मणा भूयान्' इत्याद्याः संसारित्वनिषेधकाः एतद्वाक्यगताः; तेभ्योऽसंसारिब्रह्मात्मप्रतिपादकमिदं वाक्यमिति समञ्जसम् ॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्व-
प्रकाशिकायां प्रथमाध्यायस्य
तृतीयः पादः ॥

ॐ

चतुर्थः पादः ॥

पूर्वमीक्षत्यधिकरणे गतिसामान्यमशब्दत्वं च प्रतिज्ञाय तत्र वेदान्तानां ब्रह्मणि गतिसामान्यं पादत्रयेण प्रत्यपादि। अधुना प्रधानस्याशब्दत्वमाक्षिप्य समाधीयत इत्याक्षेपसंगत्या चतुर्थपादोऽयमारभ्यते। पूर्वम् 'सुषुप्त्युत्क्रान्त्योर्भेदेन' इत्यत्र प्रसिद्धजीवोक्तिभङ्गेनाप्रसिद्धब्रह्मोक्तिवदप्रसिद्धप्रधानोक्तिपरमेव काठकवाक्यमस्त्विति दृष्टान्तसंगत्येदमधिकरणमारभ्यते—

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥

अत्र पूर्वपक्षे ब्रह्मण्येव वेदान्तानां समन्वय इति नियमाभावः फलम्, सिद्धान्ते तादृङ्नियम इति विवेकः। कठवल्लीषु श्रूयते—'महतः परमव्यक्तमव्यक्तात्पुरुषः परः' इति। तत्र किमव्यक्तशब्देन प्रधानमुच्यते, उत पूर्वप्रकृतं शरीरमिति संशये, सांख्यस्मृतौ महदव्यक्तपुरुषशब्दानां तत्तत्प्रत्यये प्रसिद्धत्वात् आनुमानि-

१. आनुमानिकाधिकरणम्।

कम् अनुमानगम्यं प्रधानमप्येकेषां शाखिनां प्रत्यक्षमव्यक्त-शब्देन पठ्यत इति अशब्दत्वमसिद्धमिति चेदिति पूर्वः पक्षः। सिद्धान्तस्तु— न प्रधानम् । कुतः, शरीररूपकविन्यस्तगृहीतेः 'शरीरं रथमेव तु' इत्यस्मिन्पूर्ववाक्ये शरीरस्य रथरूपकेण विन्यस्तस्य कल्पितस्याव्यक्तशब्देन गृहीतेः ग्रहणात् । कथं तच्छब्दग्राह्यं शरीरमित्यत आह— दर्शयति च । पूर्वापरवाक्यसंदर्भः पर्यालोच्यमान औचित्येन प्रकृतं शरीरमेवाव्यक्त-शब्दग्राह्यं दर्शयतीत्यर्थः ॥

ननु स्थूलशरीरस्य व्यक्तशब्दार्हस्य कथमव्यक्तशब्दार्ह-त्वमित्यत आह—

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥

दर्शयतीत्यनुषङ्गः । तुशब्दः शङ्कानिरासार्थः । स्थूलश-रीरारम्भकं भूतसूक्ष्मं कारणमव्यक्तशब्देन दर्शयति । कुतः, तदर्हत्वात् अव्यक्तशब्दार्हत्वादित्यर्थः । 'गोभिः श्रीणीत मत्सरम्' इत्यादिवत्प्रकृतिवाचकशब्देन विकारो लक्ष्यत इति भावः ॥

ननु भूतसूक्ष्माव्यक्ताङ्गीकारे तस्यैव प्रधानत्वेन सांख्यै-रङ्गीकृतत्वात्तद्वादः प्राप्त इत्यत आह—

तदधीनत्वादर्थवत् ॥ ३ ॥

न स्वतन्त्रप्रधानवादोऽस्माभिरङ्गीकृतः । कस्मात्, तदधीनत्वात् ईश्वराधीनत्वादव्यक्तस्य । तर्हि ईश्वरादेवास्तु जगदुत्पत्तिः, किं तेन ; अत आह— अर्थवत् । 'मायिनं तु महेश्वरम्' इति श्रुतावव्यक्तस्येश्वरसहकारित्वावगमात्प्रयोजनवदव्यक्तमित्यर्थः ॥

अव्यक्तं न प्रधानमित्यत्र हेत्वन्तरमाह—

ज्ञेयत्वावचनाच्च ॥ ४ ॥

प्रधानपुरुषविवेकात्कैवल्यं वदद्भिः सांख्यैर्ज्ञेयत्वेन प्रधानमभिधीयते । न चात्राव्यक्तशब्दमात्रमन्तरेण ज्ञातव्यमव्यक्तमिति वचः समस्ति । अतो ज्ञेयत्वस्य अवचनात् अनभिधानात् नाव्यक्तं प्रधानमित्यर्थः ॥

ननु ज्ञेयत्वावचनमसंगतमित्याशङ्क्याह—

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

'महतः परं ध्रुवं निचाय्य' इत्युत्तरवाक्यमव्यक्तशब्दितं प्रधानं ज्ञेयत्वेन वदतीति चेत्, न । प्राज्ञो हि परमात्मा हि निचाय्यत्वेन निर्दिष्टः, न प्रधानम् । कस्मात्, 'पुरुषान्न परं किंचित्' इत्याद्यात्मप्रकरणादित्यर्थः ॥

इतश्च न प्रधानमत्र ग्राह्यमित्याह—

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥

त्रयाणामेव अग्निजीवपरमात्मनामेव । एवम् उत्तरवाक्यपर्यालोचनया वक्तव्यत्वेनोपन्यासः । तद्विषय एव प्रश्नोऽपि दृश्यते कठवल्ल्याम्—'स त्वमग्निम्' इत्याद्यग्निप्रश्नः; 'येयं प्रेते विचिकित्सा' इति जीवप्रश्नः; 'अन्यत्र धर्मात्' इत्यादि परमात्मप्रश्नः । अतो नाव्यक्तं प्रधानमित्यर्थः ॥

श्रौतोऽव्यक्तशब्दो न सांख्यासाधारणतत्त्वगोचरः, वैदिकशब्दत्वात् महच्छब्दवदित्याह—

महद्वच्च ॥ ७ ॥

'बुद्धेरात्मा महान्परः' इति श्रुतो महच्छब्दो यथा न सांख्याभिमतद्वितीयसत्तामात्रतत्त्ववाची, आत्मशब्दप्रयोगात्, तद्वन्न वैदिकाव्यक्तशब्दोऽपि प्रधानवाची । अतः शरीरमेवाव्यक्तशब्दितमिति सिद्धम ॥

पूर्वमव्यक्तशब्दमात्रेण प्रधानस्याप्रत्यभिज्ञायामप्यत्र त्रिगुणत्वादिलिङ्गोपेतादजाशब्दात्प्रत्यभिज्ञा अस्त्विति प्रत्युदाहरणसंगत्येदमाह—

चमसवदविशेषात् ॥ ८ ॥

अत्र पूर्वपक्षे ब्रह्मणि समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धि-

रिति फलभेदः। श्वेताश्वतरोपनिषदि श्रूयते—‘अजामेकां लोहितशुक्लकृष्णाम्...’ इत्यादि। तत्र किमजाशब्देन प्रधानमुच्यते, उत तेजोबन्नात्मिकावान्तरप्रकृतिरिति संशये, न जायत इत्यजा सांख्यसिद्धा प्रकृतिरिति पूर्वः पक्षः। सिद्धान्तस्तु— न प्रधानस्यासाधारण्येनात्र प्रत्यभिज्ञापकं किंचित्समस्ति, लोहितादिशब्दानां वर्णविशेष एव रूढत्वात्, न रजआदौ। न जायते इत्यजेत्यन्यत्रापि साधारण्यादत्र निर्धारणाभावे दृष्टान्तः—चमसवत्। यथा ‘अर्वाग्बिलश्चमसः’ इत्यादावयं चमस इत्यवधारणं न संभवति, कथंचिदर्वाग्बिलत्वादेः अन्यत्राप्यविशेषात्; एवमजामन्त्रेऽप्यजात्वादेरविशेषान्न प्रधाननिर्णय इति अशब्दं प्रधानमित्यर्थः॥

२. चमसाधिकरणम्।

ननु केयमजा प्रतिपत्तव्येत्यत्राह—

ज्योतिरुपक्रमा तु तथा ह्यधीयत एके॥ ९॥

ज्योतिस्तेज उपक्रमे यस्याः तेजोबन्नलक्षणायाः सा ज्योतिरुपक्रमा। तुशब्दोऽवधारणे। सैवेह निर्धारणीया, न प्रधानम्। कस्मात्, तथा ह्यधीयत एके। हि यस्मात् एके छन्दोगाः तेजोबन्नात्मिकायाः प्रकृतेः ‘यदग्ने रोहितं रूपम्’ इत्यादिना रोहितादिरूपवत्तामधीयते समामनन्ति, तथेह लोहितादिशब्द-

साम्यात्तान्येव तेजोबन्नानि प्रत्यभिज्ञायन्त इति समञ्जसम् ॥

नन्वजाशब्दस्य छागे रूढत्वात्कथं तेजोबन्नात्मकप्रकृतिपरत्वमित्यत आह—

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

चशब्दः शङ्कानिरासार्थः । तेजोबन्नात्मकप्रकृतौ नाजात्वानुपपत्तिः । कुतः, कल्पनोपदेशात् यथा लोके प्रसिद्धामजां भुक्तभोगामेकोऽजस्त्यजति अन्यस्तामनुवर्तते, एवं त्यागभोगयोः कार्यकारणसंघाताद्युपादानतेजोबन्नात्मकप्रकृतेः साम्यद्योतनार्थं कल्पनया अजात्वस्योपदेशात् । यथा मधुभिन्नादित्यस्य 'असौ वादित्यो देवमधु' इति मधुत्वोपदेशः, तद्वदजाभिन्नायाः प्रकृतेः अजात्वोपदेशे न कश्चिद्विरोधः । तस्मान्नात्र प्रधानस्यावकाश इत्यशब्दं प्रधानमिति सिद्धम् ॥

पूर्वमाध्यात्मिकाधिकारे प्रसिद्धच्छागग्रहणायोगात् अजा तेजआदिकेत्युक्तम् । तथा 'यस्मिन्पञ्च पञ्चजनाः' इति मन्त्रे पञ्चजनशब्देन प्रसिद्धमनुष्यग्रहणायोगात्सांख्याभिमतपञ्चविंशतितत्त्वग्रहणमस्त्विति दृष्टान्तसंगत्येदमाह—

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥

अत्र फलं पूर्ववद्द्रष्टव्यम्। बृहदारण्यके श्रूयते—'यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः' इत्यादि। तत्र किं पञ्चजनशब्देन मूलप्रकृत्यादीनि पञ्चविंशतितत्त्वान्युच्यन्ते, उत वाक्यशेषगताः प्राणादय इति संशये, तत्त्वानीति पूर्वः पक्षः। सिद्धान्तस्तु—अस्मिन्मन्त्रे श्रूयमाणया पञ्चविंशतिसंख्यया स्मृतिसिद्धपञ्चविंशतितत्त्वानामुपसंग्रहादपि न प्रधानस्य शब्दवत्त्वम्। कुतः, नानाभावात् तेषां पञ्चानां पञ्चकानामेकपञ्चकपर्याप्तान्यपञ्चकव्यावृत्तधर्मवत्त्वाभावेन नानात्वात्। नानात्वेऽपि कथंचित्पञ्चविंशतिसंख्याङ्गीकारे बाधकान्तरमाह— अतिरेकाच्च। अस्मिन्मन्त्रे श्रूयमाणयोरात्माकाशयोः पञ्चविंशतितत्त्वातिरिक्तत्वात्सप्तविंशतितत्त्वप्राप्तावपसिद्धान्तापातः। तस्मान्नात्र प्रधानादितत्त्वग्रहणमुचितम्॥

३. संख्योपसंग्रहाधिकरणम्।

ननु ते पञ्चत्वसंख्याकाः पञ्चजनाः क इत्यपेक्षायामाह—

प्राणादयो वाक्यशेषात्॥ १२॥

प्राण एव आदिर्येषां प्राणचक्षुःश्रोत्रान्नमनसां ते प्राणादयः पञ्चजनशब्देनोच्यन्ते। कस्मात्, वाक्यशेषात् 'प्राणस्य प्राणमुत चक्षुषश्चक्षुः' इत्यादिवाक्यशेषस्थत्वादित्यर्थः॥

नन्वस्तु माध्यंदिनानां प्राणादिष्वन्नस्याम्नानात्पञ्चसंख्या।

काण्वानां तु तदनाम्नानात्कथं पञ्चसंख्येत्यत आह––

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

एकेषां काण्वानामसत्यन्ने 'तद्देवा ज्योतिषां ज्योतिः' इत्यादिपूर्ववाक्यस्थज्योतिषा पञ्चत्वं पूरणीयम् । अतः प्रधानमशब्दमिति सिद्धम् ॥

इत्थमधिकरणत्रयेण प्रधानस्याशब्दत्वसाधनेन ब्रह्मणि वेदान्तानां समन्वयः साधितः । अधुना तेषामेव परस्परविरुद्धार्थप्रतिपादकत्वेनानिश्चायकत्वादनुमान-

४. कारणत्वाधिकरणम् ।

सिद्धप्रधानपर एवोक्तसमन्वयोऽस्त्वित्याक्षेपसंगत्या, पूर्वं पञ्चत्वसंख्यापूरणमन्त्रेन ज्योतिषा वेति विकल्पस्याविरोधेऽपि प्रकृते कारणे वस्तुनि विकल्पायोगाद्विरोधे सत्यप्रामाण्यं वाक्यानामिति प्रत्युदाहरणलक्षणावान्तरसंगत्या चेदमाह––

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥

अत्र पूर्वोत्तरयोः पक्षयोः समन्वयासिद्धिः, तत्सिद्धिरिति फलभेदः । अत्र जगत्कारणत्वादिवाक्यानि ब्रह्मणि मानं न वेति विशये, तेषां परस्परविरोधदर्शनान्न मानमिति पूर्वः पक्षः । सिद्धान्तस्तु— चशब्दः शङ्कानिरासार्थः । ब्रह्मणः

कारणत्वे विरोधो नास्ति । कुतः, आकाशादिषु यथाव्यपदिष्टोक्तेः यथाभूत ईश्वरः कारणत्वेन व्यपदिष्ट एकस्मिन्वेदान्तवाक्ये तथाभूतस्यैवापरस्मिन्वाक्येऽप्युक्तेरभिधानादित्यर्थः ॥

ननु क्वचिदसतः क्वचित्सत उत्पत्तिश्रवणाद्विरोध इत्याशङ्क्याह—

समाकर्षात् ॥ १५ ॥

'असदेवेदमग्र आसीत्' इत्यनभिव्यक्तनामरूपवाचिना असच्छब्देन सत एव समाकर्षात् नासतः कारणत्वशङ्कावकाशः । अतो जगत्कारणत्ववादिवाक्यसमन्वयो ब्रह्मण्येवेति सिद्धम् ॥

पूर्वमेकवाक्यस्थसच्छब्दबलादसच्छब्दो नीतः । इह तु वाक्यभेदात् 'ब्रह्म ते ब्रवाणि' इति बालाकिवाक्यस्थब्रह्मशब्देन प्राणादिशब्दो ब्रह्मपरत्वेन नेतुमशक्य इति प्रत्युदाहरणसंगत्येदमाह—

जगद्वाचित्वात् ॥ १६ ॥

अत्र पूर्वपक्षे वाक्यस्य प्राणाद्युपासनापरत्वाद्ब्रह्मणि समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः । कौषीतकि-
५. बालाक्य- ब्राह्मणे श्रूयते—'यो वै बालाक एतेषां पुरु-
धिकरणम् । षाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्यः'

इति । तत्र वेदितव्यः कर्ता किं प्राणः, उत जीवः, आहोस्वित्परमात्मेति विशये, 'यस्य वैतत्कर्म' इति चलनात्मककर्मणः प्राणस्यैव संभवात् 'एवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते' इति जीवलिङ्गाच्च प्राणजीवाविति पूर्वः पक्षः। सिद्धान्तस्तु—पुरुषाणां कर्ता परमात्मैव। कुतः, 'ब्रह्म ते ब्रवाणि' इति ब्रह्मण एवोपक्रमात् । क्रियत इति व्युत्पत्त्या कर्मशब्दस्य प्रत्यक्षाद्युपस्थापितजगद्वाचित्वात् । ननु पुरुषाणां जगदन्तर्भावात्तत्कर्तृत्वं किमिति पृथगुच्यत इति चेत्, न। बालाकिना ब्रह्मत्वेनोक्तपुरुषाणामब्रह्मत्वद्योतनाय गोबलीवर्दन्यायेन पृथगुच्यत इति ध्येयम् ॥

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥ १७॥

जीवमुख्यप्राणलिङ्गाच्च न ब्रह्मपरत्वावधारणमिति चेत्, तद्व्याख्यातं प्रतर्दनाधिकरणे 'नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्' इति । प्रतर्दनविचारे कर्मपदस्याविचारादगतार्थता द्रष्टव्या ॥

किं च—

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥

जैमिनिराचार्योऽस्मिन्प्रकरणे जीवपरामर्शमन्यार्थं ब्रह्मप-

तिपत्त्यर्थं यतो मन्यतेऽतो ब्रह्मपरमेवेदं वाक्यम्। कुतो मन्यते, प्रश्नव्याख्यानाभ्याम्। 'क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत्' इत्यादिप्रश्नः, 'यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति' इत्युत्तरं व्याख्यानम्। ताभ्यां यस्मिञ्जीवस्य स्वापागमने भवतः, स एवात्र परमात्मा वेदितव्यतयोपदिष्टः। अपि चैके वाजसनेयिनो बालाक्यजातशत्रुसंवादे 'य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागात्' 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इति प्रश्नोत्तराभ्यां स्पष्टं विज्ञानमयातिरिक्तं परमात्मानमामनन्ति। अत एतत्कौषीतकीवाक्यं जगत्कर्तरि ब्रह्मणि समन्वितमिति सिद्धम् ॥

पूर्वं ब्रह्मोपक्रमसामर्थ्याद्ब्रह्मपरत्वमुक्तम्। तर्हि तद्वदेव मैत्रेयीब्राह्मणस्य 'न वा अरे पत्युः कामाय' इत्यादिजीवोपक्रमसामर्थ्याज्जीवपरत्वमस्त्विति दृष्टान्तसंगत्येदमाह—

वाक्यान्वयात् ॥ १९ ॥

फलं पूर्ववत्। बृहदारण्यके श्रूयते—'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः' इत्यादि। तत्र किं जीवो द्रष्टव्यत्वादि-

६. वाक्यान्वयाधिकरणम्।

रूपेणोपदिश्यते, किं वा परमात्मेति संशये, जीव इति पूर्वः पक्षः। सिद्धान्तस्तु—

परमात्मैवात्र द्रष्टव्यतयोपदिष्ट आत्मा । कुतः, वाक्यान्वयात् उपक्रमादिपर्यालोचनया वाक्यस्य ब्रह्मण्येवान्वयादित्यर्थः ॥

ननु पतिजायादिभोग्यजातेन लिङ्गेन जीवोपक्रमः प्रतीयते; स कथमित्याशङ्क्याह––

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

जीवब्रह्मणोर्हि कार्यकारणयोर्भेदाभेदौ वर्तेते । अत्यन्तभेदे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधप्रसङ्गात् । तथा च तत्प्रतिज्ञासिद्धेरिममभेदांशमादाय जीवोपक्रमणं लिङ्गमित्याश्मरथ्य आचार्यो मन्यते ॥

समाधानान्तरमाह––

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥

संसारदशायामत्यन्तं ब्रह्मणो भिन्नस्य जीवस्य ब्रह्मात्मत्वसाक्षात्कारात्कार्यकारणसंघातादुत्क्रमिष्यतः एवंभावात् परमात्मनैकीभावात्, भविष्यदभेदमादाय जीवोपक्रम इति औडुलोमिराचार्यो मन्यते ॥

नन्विदमप्यसंगतम्, सत्यकार्यकारणसंघातवतः संसारिणोऽत्यन्तं ब्रह्मभिन्नस्य मुक्तिदशायामभेदायोगादित्यरुच्या परमं समाधानमाह––

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

ब्रह्मण एवाविद्याकल्पितभेदेन जीवरूपेणावस्थितेः जीवोपक्रमोऽविरुद्ध इति काशकृत्स्न आचार्यः श्रुतितात्पर्यज्ञो मन्यते । अतो द्रष्टव्ये परब्रह्मणि मैत्रेयीब्राह्मणवाक्यं समन्वितमिति सिद्धम् ॥

पूर्वम् 'जन्माद्यस्य यतः' इति सूत्रे ब्रह्मणो जगत्कारणत्वमभिहितम् । तदधुनात्र विचार्यते । एवं च सामान्यज्ञानस्य विशेषविचारहेतुत्वात्तेन हेतुहेतुमद्भावसंगत्येदमाह—

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥

अत्र पूर्वपक्षे एकविज्ञानात्सर्वविज्ञानप्रतिज्ञाया गौणत्वम्, सिद्धान्ते तन्मुख्यत्वमिति फलभेदः । तत्र किं ब्रह्मणो जगन्निमित्तत्वमात्रम्, उतोपादानत्वमपीति संशये, 'तदैक्षत' इति ईक्षणपूर्वककर्तृत्वश्रवणान्निमित्तत्वमात्रमिति पूर्वः पक्षः। सिद्धान्तस्तु—प्रकृतिश्च ब्रह्म चकारान्निमित्तमपि । कुतः, प्रतिज्ञादृष्टान्तानुपरोधात् 'येनाश्रुतं श्रुतं भवति' इत्याद्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा, 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणम्' इत्यादिदृष्टान्तश्च । तयोः सामञ्जस्यादित्यर्थः ॥

७. प्रकृत्यधिकरणम् ।

किं च—

अभिध्योपदेशाच्च ॥ २४ ॥

'सोऽकामयत' इत्यात्मनो ध्यानोपदेशात्कर्तृत्वम्, 'बहु स्याम्' इति ध्यानोपदेशात्प्रकृतित्वम् इति ॥

प्रकृतित्वे हेत्वन्तरमाह—

साक्षाच्चोभयाम्नानात् ॥ २५ ॥

'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति' इत्याकाशशब्देन साक्षाद्ब्रह्म गृहीत्वा जगदुत्पत्तिप्रलययोरुभयोराम्नानाद्ब्रह्म प्रकृतिरित्यर्थः ॥

नन्वेकस्य कृतिमत्त्वं कृतिविषयत्वं च विरुद्धमित्याशङ्क्याह—

आत्मकृतेः परिणामात् ॥ २६ ॥

'तदात्मानं स्वयमकुरुत' इति आत्मानमिति द्वितीयया कृतिविषयत्वं स्वयमकुरुत इत्यनेन कृतिमत्त्वं चाम्नायते । तथा च ब्रह्मण उपादानत्वं निमित्तत्वं चाविरुद्धम् । कुतः, आत्मकृतेः आत्मसंबन्धिनी कृतिरात्मकृतिः, ततो हेतोः । नन्वात्मनः कर्तृत्वेन पूर्वसिद्धस्य कथं कृतिकर्मत्वमत आह— परिणामात् । परिणामो विवर्तः ; सिद्धस्यापि विवर्तात्मना साध्यत्वात्कर्मत्वोपपत्तिरित्यर्थः ॥

किं च—

योनिश्च हि गीयते ॥ २७ ॥

'यद्भूतयोनिं परिपश्यन्ति' इति प्रकृतिवाचकयोनिशब्देन आत्मा हि यस्माद्गीयते, तस्मात् प्रकृतिः ब्रह्मेत्यतो ब्रह्मणः प्रकृतित्वं कर्तृत्वं च सिद्धम् ॥

इत्थमभिहितेन न्यायेन 'ईक्षतेर्नाशब्दम्' इत्यादिना अशब्दत्वादिहेतुभिः प्रधानकारणवादो यथा निराकृतः, न तथेहाणुस्वभावासत्कारणवादः; तेषामपि कारणत्वबोधकशब्दानां श्रुतत्वादिति प्रत्युदाहरणसंगत्येदमाह—

एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥

अत्र पूर्वपक्षे ब्रह्मण्येव वेदान्तसमन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र वेदान्ता विषयः। तत्र किं

८. सर्वव्याख्यानाधिकरणम्। ब्रह्मण इव परमाणुशून्यादीनामपि क्वचिज्जगत्कारणत्वं श्रुतमस्ति, अथवा सर्वत्र ब्रह्मण एव सर्वकारणत्वं प्रतिनियतमिति संशये, 'अण्व्य इवेमा धानाः' 'असदेवेदमग्र आसीत्' 'स्वभावमेके' इत्यादिषु अण्वादीनामपि कारणत्वं श्रुतमिति पूर्वः पक्षः। सिद्धान्तस्तु—एतेन प्रधानवादनिराकरणे ये हेतवः अशब्दत्वाचेतनत्वैकविज्ञानप्रतिज्ञानुपपत्त्यादयः तेषामण्वादिपक्षेऽपि साम्येन,

सर्वेऽण्वादिकारणवादा निराकृतत्वेन व्याख्याताः । न चासदित्यादिशब्दविरोधः । असच्छब्दस्य अनभिव्यक्तनामरूपपरत्वेनाविरोधात् । सूक्ष्मत्वाच्चात्मन्यणुशब्दो गौणः । स्वभाववादस्तु पूर्वपक्षत्वेनोपन्यस्तः । व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्त्यर्थः । तस्माज्जगत्कारणे सर्वज्ञे जिज्ञास्ये ब्रह्मणि वेदान्तानां समन्वयो नान्यत्रेति सिद्धम् ॥

चतुस्त्रिंशत्परं सूत्रशतकं तु समन्वये ।
अध्याये तद्वदेकोनचत्वारिंशन्मया मताः ॥

ब्रह्मनाम्नि परे धाम्नि प्रत्यपादि समन्वयः ।
व्यत्यन्तसंततेर्यस्मिंस्तदस्मिञ्ज्योतिराततम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रसरस्वतीपादाब्ज-
सेवापरायणेन श्रीसदाशिवेन्द्रसरस्वत्या विरचितायां
श्रीमद्ब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्वप्रकाशिकायां

प्रथमोऽध्यायः ॥

ॐ

द्वितीयोऽध्यायः ॥

इत्थं प्रथमेऽध्यायेऽभिहितसमन्वयस्य स्मृत्यादिविरोधे तन्निरसनमनेन क्रियत इति विषयविषयिभावसंगत्या द्वितीयाध्याय आरभ्यते। अत्र पूर्वमतिदेशाधिकरणे प्रधानवदशब्दत्वमण्वादीनामप्यभिहितम्। अधुना प्रधानस्य वैदिकशब्दवत्त्वाभावेऽपि स्मृतिरूपशब्दवत्त्वमाक्षिप्य परिह्रियत इत्याक्षेपसंगत्येदमाह—

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥

अत्र पूर्वपक्षे स्मृतिविरोधे समन्वयासिद्धिः, सिद्धान्ते तदविरोधे तत्सिद्धिरिति फलभेदः। उक्तसमन्वयः किं सांख्यस्मृत्या विरुध्यते, उत नेति संदेहे, महर्षिप्रणीतप्रधानकारणवादिस्मृतीनामनवकाशरूपदोषप्रसङ्गात्समन्वयो विरुध्यत इति प्रधानानुगुणतया श्रुतयो नेया इति चेदिति पूर्वः पक्षः। सिद्धान्तस्तु— न

१. स्मृत्यधिकरणम्।

समन्वयो विरुध्यते । कुतः, अन्यस्मृत्यनवकाशदोषप्रसङ्गात् चेतनं प्रकृत्य 'तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम' इत्यादिकानां चेतनकारणत्ववादिनीनामन्यासां स्मृतीनामनवकाशदोषः प्रसज्येत । अतः स्मृतिद्वयविरोधे श्रुत्यविरुद्धा स्मृतिः प्रमाणमित्यप्रमाणसांख्यस्मृत्या समन्वयो न विरुध्यत इत्यर्थः ॥

इतश्च सांख्यस्मृतेरनवकाशो न दोष इत्याह—

इतरेषां चानुपलब्धेः ॥ २ ॥

सांख्यस्मृतिप्रसिद्धानामितरेषां महदादितत्त्वानां लोके वेदे चानुपलब्धेश्च सांख्यस्मृतेरप्रामाण्यान्न दोषः । तथा च तदेकदेशप्रधानस्मृतेरप्यप्रामाण्यमिति भावः ॥

उक्तन्यायमन्यत्रातिदिशति—

एतेन योगः प्रत्युक्तः ॥ ३ ॥

अस्यातिदेशत्वान्न पृथक्संगत्यपेक्षा । फलं तु पूर्ववत् । उक्तसमन्वयः किं योगस्मृत्या विरुध्यते न वेति संदेहे,

२. योगप्रत्युक्त्य- श्रुतिसिद्धयोगप्रतिपादकत्वेन प्रामाण्यात्तया धिकरणम् । प्रधानकारणवादिन्या समन्वयो विरुध्यत इति पूर्वः पक्षः । सिद्धान्तस्तु— एतेन सांख्यस्मृतिप्रत्या-

ख्यानेन योगस्मृतिरपि प्रत्युक्ता प्रत्याख्याता द्रष्टव्या । श्रुत्यविरुद्धाष्टाङ्गयोगे तात्पर्यवत्त्वेन प्रामाण्येऽपि तद्विरुद्धप्रधाने तात्पर्याभावादप्रामाण्यमिति भावः ॥

पूर्वं वेदविरुद्धस्मृतेर्मूलाभावादप्रामाण्यमुक्तम् । तर्हि तर्कस्य व्याप्तिपक्षधर्मतयोर्मूलत्वेन लोकसिद्धत्वात्तेन विरोध इति प्रत्युदाहरणसंगत्येदमाह—

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥

अत्र पूर्वोत्तरपक्षयोः समन्वयासिद्धिः, तत्सिद्धिरिति फलभेदः । आकाशादिकं न चेतनप्रकृतिकम्, द्रव्यत्वाद्धटवत्;

३. विलक्षणत्वाधिकरणम् ।

इति तर्केण समन्वयो विरुध्यते न वेति संदेहे, पूर्वः पक्षः— न जगत् चेतनप्रकृतिकम् । कुतः, विलक्षणत्वात् अस्य अचेतनस्य जगतः चेतनाद्विलक्षणत्वात् । यत् यद्विलक्षणं न तत् तत्प्रकृतिकम्; यथा तन्तुविलक्षणो घटो न तन्तुप्रकृतिक इति । ननु ब्रह्मजगतोर्वैलक्षण्यं कुतः— तथात्वं च शब्दात् । तथात्वं वैलक्षण्यम् 'विज्ञानं चाविज्ञानं चाभवत्' इत्यादिश्रुतितोऽवगतमित्यर्थः ॥

ननु 'ते हेमे प्राणा अहंश्रेयसे विवदमानाः' इत्यादिकाभिः श्रुतिभिर्ब्रह्मवत् जगत् चेतनमिवावगम्यत इत्याशङ्क्याह—

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ ५ ॥

उक्तशङ्कानिरासार्थस्तुशब्दः । उक्तश्रुतिभिर्न जगतश्चेतनत्वं प्रत्येतव्यम् । यतः प्राणाद्यभिमानिनीनां देवतानां तत्र व्यपदेशो भवति, न प्राणादिमात्रस्य । कुतः, विशेषानुगतिभ्यां विशेषणं विशेषः अनुगतिश्च ताभ्याम् । 'एता ह वै देवता अहंश्रेयसे विवदमानाः....' इति प्राणानां चेतनवाचिना देवताशब्देन विशेषितत्वात्, 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' इत्यादिमन्त्रार्थवादादिषु सर्वत्र तदभिमानिदेवतानामनुगतिश्रवणाच्च न चेतनं जगत् । तस्मादचेतनस्य जगतो वैलक्षण्यान्न चेतनप्रकृतिकत्वम् ॥

एवं पूर्वपक्षे सिद्धान्तः—

दृश्यते तु ॥ ६ ॥

पूर्वपक्षनिरासार्थस्तुशब्दः । यदुक्तं चेतनविलक्षणं जगन्न तत्प्रकृतिकमिति, तन्न; चेतनात्पुरुषात्तद्विलक्षणानां नखलोमादीनामचेतनानाम्, अचेतनाच्च गोमयाच्चेतनवृश्चिकादीनामुत्पत्तिर्यतो दृश्यतेऽत इत्यर्थः । प्रकृतिविकारयोरत्यन्तसादृश्ये प्रकृतिविकारभावानुपपत्त्या यत्किंचित्सादृश्यं वाच्यम् । तच्च प्रकृतेऽपि जगति स्फुरणाद्यनुवृत्त्या समानमिति भावः ॥

असत्कार्यवादमाशङ्क्य निराचष्टे—

असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ ७ ॥

चेतनस्य नामरूपादिहीनस्याचेतननामादिमज्जगद्धेतुत्वे उत्पत्तेः पूर्वं जगदसदेव स्यादिति चेत्, न। कुतः, प्रतिषेधमात्रत्वात् असत्स्यादिति योऽयं प्रतिषेधः तन्मात्रत्वात्, न तु तस्य प्रतिषेध्यमस्तीत्यर्थः। कार्यसत्तायाः कारणाव्यतिरेकात्स्थितिदशायामिवोत्पत्तेः पूर्वमपि ब्रह्मात्मकमेवेदं जगन्नासदिति भावः ॥

जगद्ब्रह्मणोरुक्तं कार्यकारणत्वममृष्यमाणश्चोदयति—

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ ८ ॥

शुद्धत्वादिगुणकं ब्रह्म जगदुपादानमित्यसमञ्जसम्। कुतः, अपीतौ तद्वत्प्रसङ्गात् अपीतौ प्रलयसमये तद्वत् कार्यवत् कारणस्यापि ब्रह्मणोऽशुद्धत्वादिः प्रसज्येतेत्यर्थः। प्रलयेऽशुद्ध्यादिगुणकं जगत् ब्रह्मणि लीयमानं स्वनिष्ठाशुद्ध्यादिधर्मैर्ब्रह्म दूषयेदिति भावः ॥

एवमाक्षेपे परिहरति—

न तु दृष्टान्तभावात् ॥ ९ ॥

तुरेवकारार्थः। पूर्वोक्तमसमञ्जसं नास्त्येव। कुतः, दृष्टा-

न्तभावात् कार्यं कारणे लीयमानं स्वधर्मेण कारणं न दूषयतीत्यस्मिन्नर्थे शतशो दृष्टान्तानां यथा घटादिकं कार्यं मृदि लीयमानं मृदं स्वधर्मेण न दूषयतीत्येवमादिकानां सत्त्वादित्यर्थः ॥

इत्थं स्वपक्षे दोषान्परिहृत्य तानेव परपक्षे योजयति—

स्वपक्षदोषाच्च ॥ १० ॥

ये दोषाः विलक्षणत्वात् प्रकृतिविकारभावानुपपत्तिः, उत्पत्तेः प्राक् जगतोऽसत्त्वप्रसङ्गः, अपीतौ तद्वत्प्रसङ्ग इति सांख्येनोद्भाविताः ; ते सांख्यपक्षेऽपि समानाः ; शब्दादिहीनप्रधानसकाशाच्छब्दादिमतो विलक्षणस्य जगत उत्पत्त्यङ्गीकारादित्यर्थः । वस्तुतः प्रपञ्चसत्यत्ववादिनः सांख्यस्यैवैते दोषाः, न मेऽनिर्वचनीयवादिन इति भावः ॥

इतश्च न केवलेन तर्केण समन्वयो विरुध्यत इत्याह—

तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॥ ११ ॥

यत्नत एकेन तार्किकेणानुमितोऽप्यर्थोऽन्येन श्रेष्ठतरेणान्यथा नीयत इति केवलस्य तर्कस्य अप्रतिष्ठानादपि अप्रतिष्ठितत्वाच्च न तेन समन्वयविरोधशङ्केत्यर्थः । ननु कस्यचित्तर्कस्याप्रति-

ष्ठितत्वेऽपि कस्यचित्प्रतिष्ठितत्वसंभवात्तेन समन्वयविरोधशङ्का युक्तेत्याक्षिपति—अन्यथानुमेयमिति चेत्। अप्रतिष्ठिततर्कादन्येन प्रकारेण प्रतिष्ठिततर्केण समन्वयविरोधादिकमनुमेयमिति चेत्, अत्र समाधत्ते— एवमपि। अन्यत्र तर्कस्य प्रतिष्ठितत्वेऽपि प्रकृते लिङ्गादिहीने ब्रह्मणि वेदनिरपेक्षस्य तर्कस्याप्रतिष्ठितत्वदोषादनिर्मोक्षप्रसङ्गः। यद्वा महतां कपिलकणादादीनां परस्परविप्रतिपन्नैः आगमनिरपेक्षैस्तर्कैस्तत्त्वनिर्णयाभावादनिर्मोक्षप्रसङ्गः। तस्मादागमविरोधितर्कोऽप्रमाणमिति न तेन विरोध इति सिद्धम् ॥

उक्तन्यायमन्यत्रातिदिशति—

एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १२ ॥

अस्यातिदेशत्वान्न पृथक्संगत्यपेक्षा। फलं तु पूर्ववत्। ब्रह्म न जगदुपादानं विभुत्वाद्व्योमवत् इत्यादितार्किकाभि-

४. शिष्टापरिग्रहाधिकरणम्।

मतन्यायेन ब्रह्मकारणत्वबोधकः समन्वयो विरुध्यते न वेति संदेहे, विरुध्यत इति पूर्वः पक्षः। सिद्धान्तस्तु— एतेन मन्वादिभिः शिष्टैः केनचित्सत्कार्यवादाद्यंशेन परिगृहीतप्रधानवादनिराकरणप्रकारेण शिष्टापरिग्रहाः शिष्टैः केनचिदप्यंशेनापरिगृहीता अण्वादिकार-

णवादाः व्याख्याताः निरस्ता द्रष्टव्याः । अतस्तार्किकन्यायस्य वेदबाधितत्वान्न तेन विरोध इति सिद्धम् ॥

पूर्वं ब्रह्मणि तर्कस्याप्रतिष्ठितत्वेऽपि जगद्भेदे प्रत्यक्षस्य प्रतिष्ठितत्वाद्विरुध्यत एवेति प्रत्युदाहरणसंगत्येदमाह—

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ १३ ॥

फलं तु पूर्ववत् । अद्वितीयब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयः प्रत्यक्षेण विरुध्यते न वेति संदेहे, अद्वितीयब्रह्मणो जगदुपादानत्वे भोक्तृभोग्यप्रपञ्चस्य सर्वस्य ब्रह्मात्मकत्वेन भोग्यशब्दादेर्भोक्त्रात्मकत्वापत्तेः भोक्तुर्भोग्यात्मकत्वापत्तेः प्रत्यक्षसिद्धः परस्परविभागो न स्यात् । अतः प्रत्यक्षेण समन्वयो विरुध्यत इति चेदिति पूर्वः पक्षः । सिद्धान्तस्तु— स्याल्लोकवत् । एकब्रह्मोपादानकत्वेऽपि भोक्तृभोग्यप्रपञ्चस्य परस्परं विभागः स्यात्, लोकवत्; यथा लोके मृदात्मना अभिन्नानां घटादीनां परस्परं भेदोऽस्ति तद्वत् । अतः कल्पितभेदसत्त्वान्न प्रत्यक्षविरोध इति सिद्धम् ॥

(५. भोक्त्रापत्त्यधिकरणम् ।)

पूर्वं परिणामवादमालम्ब्यापाततः स्याल्लोकवदिति समाधानमभिहितम् । अधुना विवर्तवादमाश्रित्य परमं समाधानमभिधीयत इत्येकफलकत्वसंगत्येदमाह—

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १४ ॥

फलं तु पूर्ववत् । अद्वैतब्रह्मवादिसमन्वयो भेदग्राहिप्रत्यक्षेण विरुध्यते न वेति संदेहे, विरुध्यत इति पूर्वः पक्षः ।

६. आरम्भणाधिकरणम् । सिद्धान्तस्तु—तत् तस्मात्कारणात् ब्रह्मणः, कार्यस्य जगतोऽनन्यत्वं पृथक्सत्ताराहित्यम् । कुतः, आरम्भणशब्दादिभ्यः 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' 'ब्रह्मैवेदं सर्वम्' इत्यादिशब्देभ्यः ॥

ब्रह्मव्यतिरेकेण कार्यस्याभावेऽनुमानमाह—

भावे चोपलब्धेः ॥ १५ ॥

कारणस्य ब्रह्मणो भावे सत्त्वे कार्यस्योपलब्धेः, मृदि सत्यां घटस्येव । न हि मृद्व्यतिरेकेण घटो नाम कश्चिदुपलभ्यते । अतः कारणव्यतिरेकेण कार्यं नास्तीत्यर्थः ॥

कारणव्यतिरेकेण कार्यस्याभावे श्रुतार्थापत्तिं प्रमाणान्तरमाह—

सत्त्वाच्चावरस्य ॥ १६ ॥

अवरस्य कार्यस्योत्पत्तेः प्राक्कारणानन्यत्वेन सत्त्वात् 'ब्रह्म

वा इदमग्र आसीत्' इत्यादौ सत्त्वश्रवणात् उत्पत्त्यनन्तरमप्य-नन्यत्वं सिद्धमित्यर्थः ॥

प्रागुत्पत्तेः कारणात्मना कार्यस्य सत्त्वमाक्षिप्य समाधत्ते—

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॥ १७ ॥

'असद्वा इदमग्र आसीत्' इत्यादिना प्रागुत्पत्तेरसद्व्यपदेशान्न कार्यस्य कारणात्मना सत्त्वमिति चेत्, न ह्यत्यन्तासत्त्वाभिप्रायेणायमसत्त्वव्यपदेशः । किंतु व्याकृतत्वरूपधर्मापेक्षया अव्याकृतत्वं धर्मान्तरम्, तेनायमसत्त्वव्यपदेशः । कुतः, वाक्यशेषात् 'तत्सदासीत्' इति वाक्यशेषात् । अतः कारणादनन्यत्वं कार्यस्य सिद्धमित्यर्थः ॥

किं च—

युक्तेः शब्दान्तराच्च ॥ १८ ॥

मृदात्मना पूर्वं घटस्यासत्त्वे मृदेव घटार्थिना नोपादीयेत, असत्त्वाविशेषाद्यत्किंचिदेवोपादीयेत, इत्येवमाद्याया युक्तेः, 'सदेव सोम्येदमग्र आसीत्' इत्येवमादौ विद्यमानसच्छब्दान्तराच्च प्रागुत्पत्तेः कार्यस्य कारणानन्यत्वं सत्त्वं चेति सिद्धम् ॥

ननु मृद्घटौ भिन्नौ विलक्षणप्रतीतिविषयत्वात् घटपटवत् इत्युक्ते हेतोर्व्यभिचारमाह—

पटवच्च ॥ १९ ॥

यथा संवेष्टितप्रसारितपटस्य विलक्षणप्रतीतिविषयत्वेऽपि न भेदस्तथा मृद्घटयोरित्यर्थः ॥

ननु कार्यमुपादानाद्भिन्नम्, भिन्नकार्यकरत्वात्संमतवत् इत्युक्ते, हेतोर्व्यभिचारमाह—

यथा च प्राणादि ॥ २० ॥

यथा च प्राणायामादिना निरुद्धः प्राणापानादिर्जीवनमात्रं कार्यं निष्पादयति, अनिरुद्धस्त्वाकुञ्चनप्रसारणादिकं कार्यं निर्वर्तयति, नैतावता प्राणादेर्भेदोऽस्ति । तस्मात्कार्यकारणयोरनन्यत्वादद्वैतब्रह्मसमन्वये न कश्चिद्विरोध इति सिद्धम् ॥

पूर्वं कार्यस्य कारणादनन्यत्वमेकविज्ञानप्रतिज्ञासिद्धये समर्थितम् । तर्हि तेनैव न्यायेन जीवब्रह्मणोरप्यभेदाज्जीवधर्मा हिताकरणादयो ब्रह्मणि प्रसज्येरन्नित्याक्षेपसंगत्येदमाह—

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥

फलं तु पूर्ववत् । यदि ब्रह्म जगज्जनयेत्, न तर्हि स्वानिष्टं

जनयेदिति तर्केण जीवाभिन्नं ब्रह्म जगदुपादानमिति ब्रुवन्सम-
७. इतरव्यपदेशाधिकरणम् । न्वयो विरुध्यते न वेति संदेहे, पूर्वः पक्षः— इतरव्यपदेशात् इतरस्य जीवस्य तत्त्वमस्यादिना ब्रह्मत्वव्यपदेशात्, इतरस्य ब्रह्मणो वा 'अनेन जीवेनात्मनानुप्रविश्य' इत्यादिना शारीरत्वव्यपदेशात्, ब्रह्मणः स्रष्टृत्वे जीवस्यैव स्रष्टृत्वात् हिताकरणादिदोषप्रसक्तिः नऽव्यत्यासेन अहितजरामरणादिबहुविधानर्थकरणरूपदोषस्य प्रसक्तिर्ब्रह्मणः— इत्यतस्तस्याभ्रान्तचेतनत्वेनानिष्टजगज्जनकत्वायोगादुक्तसमन्वयो विरुध्यत इत्यर्थः ॥

एवं पूर्वपक्षे सिद्धान्तः—

अधिकं तु भेदनिर्देशात् ॥ २२ ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । यतः शारीरादधिकं सर्वज्ञं सर्वशक्ति ब्रह्म जगदुपादानं स्रष्टृ चेति ब्रूमः, अतो न हिताकरणादिदोषप्रसक्तिः । कुतः, भेदनिर्देशात् 'आत्मा वा अरे द्रष्टव्यः' इत्यादिना कल्पितभेदस्य व्यपदेशात् । न हि ब्रह्मणो नित्यमुक्तस्य हितमहितं वा किंचित्समस्ति, येन हिताकरणादिदोषः प्रसज्येत । अतः कल्पितभेदमादायैव सर्वस्यासांकर्योपपत्तिरिति तात्पर्यम् ॥

नन्वेकरूपब्रह्मणो जगत्कारणत्वे कार्यवैचित्र्यं न स्यादिति

दोषं दृष्टान्तेन परिहरति—

अश्मादिवच्च तदनुपपत्तिः ॥ २३ ॥

एकपृथिवीजन्यानां यथा अश्मनां वज्रवैडूर्यादिभेदेन वैचित्र्यम्, तथा ब्रह्मकार्याणां स्वरूपवैचित्र्यं युज्यते। अतस्तदनुपपत्तिः तस्योक्तदोषस्यानुपपत्तिः। तस्मात् जीवाभिन्नब्रह्मवादिसमन्वयो न विरुध्यत इति सिद्धम् ॥

पूर्वम् औपाधिकजीवभेदाद्धिताकरणादिदोषो नास्तीत्युक्तम्। संप्रत्युपाधितोऽपि ब्रह्मणो विभक्तं करणादिकं नास्ति, ब्रह्मनानात्वाभावादिति प्रत्युदाहरणसंगत्येदमाह—

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २४ ॥

फलं तु पूर्ववत्। न ब्रह्म उपादानं कर्तृ वा, असहायत्वात्संमतवदिति न्यायेन असहायाद्ब्रह्मणो जगत्सर्गं

८. उपसंहारदर्शनाधिकरणम्।

ब्रुवन्समन्वयो विरुध्यते न वेति संदेहे, उपसंहारदर्शनात् लोके कुलालस्य कर्तुः दण्डचक्राद्युपसंहारदर्शनात्, मृदो वा उपादानस्य स्वभिन्नकुलालादिसहायदर्शनात्, तदुभयविलक्षणस्य ब्रह्मणो न जगत्कर्तृत्वमुपादानत्वं वा संभवति। अतः समन्वयो विरुध्यत इति चेदिति पूर्वः पक्षः। सिद्धान्तस्तु— क्षीरवद्धि हिशब्दो

हेत्वर्थः । यथा लोके क्षीरं बाह्यसाधनान्यनपेक्ष्य दध्याकारेण परिणमते, तद्वद्ब्रह्मापि । श्रुतिरपि ब्रह्मणोऽसहायस्य कार्यकारित्वं दर्शयति 'न तस्य कार्यं करणं च विद्यते' इति ॥

ननु चेतनत्वे सति असहायत्वं हेतुः । अतो न क्षीरे व्यभिचार इत्याशङ्क्य चेतनदृष्टान्तेन तस्य व्यभिचारमाह—

देवादिवदपि लोके ॥ २५ ॥

लोक्यतेऽनेनेति लोकः शब्दो मन्त्रार्थवादेतिहासपुराणादिः, तस्मिन् यथा देवाः पितर ऋषय इत्येवमादयश्चेतनाः स्वसिद्धिसामर्थ्यात्साधनान्तरं बाह्यमनपेक्ष्य संकल्पमात्रेणैव नानाविधकार्यकर्तार उपलभ्यन्ते, तद्वद्ब्रह्माप्यसहायमेव जगदुपादानं कर्तृ चेति तद्वादिसमन्वयो न विरुध्यत इति सिद्धम् ॥

पूर्वं क्षीरादिदृष्टान्तकथनेन ब्रह्मणः परिणामित्वभ्रमोत्पत्तेः तन्निरसनमनेन क्रियत इति कार्यकारणभावसंगत्येदमाह—

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २६ ॥

पूर्वाधिकरणस्य भ्रमोत्पादकत्वमेव कारणत्वम्, एतस्य कार्यत्वमिति बोध्यम् । फलं तु पूर्ववत् । सावयवस्यैव नाना-

९. कृत्स्नप्रसक्त्य- कारेण परिणाम इति न्यायेन निरवयवाधिकरणम् । ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो विरुध्यते

न वेति संदेहे, पूर्वः पक्षः— सिद्धान्ती प्रष्टव्यः— किं ब्रह्म निरवयवं परिणमते सावयवं वा । आद्ये, कृत्स्नस्य ब्रह्मणः कार्याकारेण परिणामप्रसक्तिः, ततश्च कार्यातिरिक्तं ब्रह्म न स्यात् । द्वितीये तु, कृत्स्नप्रसक्तिर्नास्ति, एकांशपरिणामेऽप्यपरांशस्थितिसंभवात् । तथा 'निष्कलम्' इत्यादि निरवयवत्वशब्दकोपः । उभयपक्षेऽप्यनित्यत्वप्रसङ्ग इति ब्रह्मणः उपादानत्ववादिसमन्वयो विरुध्यत इति ॥

सिद्धान्तस्तु—

श्रुतेस्तु शब्दमूलत्वात् ॥ २७ ॥

तुः पूर्वपक्षनिरासार्थः । न तावत्कृत्स्नप्रसक्तिः । कुतः, श्रुतेः ब्रह्मणो जगदुपादानत्वश्रवणात् । 'तावानस्य महिमा' इत्यादौ कार्यव्यतिरेकेण सत्ताश्रवणात् । एवं च विवर्तवादः श्रुत्यैव स्फुटीकृतः । न हि परिणामवादे कार्यव्यतिरेकेण सत्ता समस्ति । अतः कार्यव्यतिरेकेण ब्रह्मणोऽवस्थानश्रुतेर्नोक्तदोषावकाशः । ननु उक्तयुक्तिबाधितत्वाच्छ्रुतिर्वा कथं कार्यव्यतिरेकेण ब्रह्मणः सत्तां बोधयेदित्यत आह–– शब्दमूलत्वात् ब्रह्मणः शब्दैकप्रमाणकत्वात्, यथाशब्दं कार्योपादानत्वं तदतिरेकेण सत्त्वं चाविरुद्धमित्यर्थः ॥

जगतो ब्रह्मविवर्तत्वेन स्वप्नप्रपञ्चवन्मायिकत्वात्तदुपादान-

त्वेऽपि ब्रह्मणो न कृत्स्नप्रसक्त्यादिदोषः स्वप्नसाक्षिण इवेत्याह—

आत्मनि चैवं विचित्राश्च हि ॥ २८ ॥

हि यस्माद्धेतोः एकस्मिन्नात्मनि स्वप्नदृशि निरवयवे विचित्राः सृष्टयः श्रूयन्ते 'न तत्र रथा न रथयोगाः' इत्यादौ, यथा च लोके मायाविनि स्वरूपानुपमर्देनैव हस्त्यश्वादिविचित्राः सृष्टयो दृश्यन्ते एवमेकस्मिन्नपि ब्रह्मणि विविधसृष्टिरित्यर्थः॥

यश्चोभयोः समो दोष इति न्यायेन कृत्स्नप्रसक्त्यादीनामनुद्भाव्यत्वं दर्शयति—

स्वपक्षदोषाच्च ॥ २९ ॥

सांख्यादयोऽपि निरवयवं प्रधानं जगत्परिणामीत्यङ्गीचक्रुः । तथा च कृत्स्नप्रसक्त्यादिदोषः समानः । अणुवादिनोऽपि परमाणुद्वयसंयोगेन द्व्यणुकादिसृष्टिमुररीचक्रुः । स संयोगः किं व्याप्यवृत्तिः, अव्याप्यवृत्तिर्वा । आद्ये दृष्टविरोधः । द्वितीये सावयवत्वं विना अव्याप्यवृत्तिसंयोगानुपपत्तिः, निरवयवत्वव्याकोप इत्यादिदोषः समानः । ब्रह्मवादे स दोषो न समस्ति । तस्मादुपपन्नो ब्रह्मकारणवादः ॥

पूर्वोक्तविचित्रकार्यशक्तिमत्त्वविषयशङ्कानिरासेन समर्थना-

त्मकत्वात् विषयविषयिभावसंगत्येदमाह—

सर्वोपेता च तद्दर्शनात् ॥ ३० ॥

फलं तु पूर्ववत् । अशरीरस्य न मायेति न्यायेन माया-शक्तिमतो ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो विरुध्यते न वेति संदेहे, विरुध्यत इति पूर्वः पक्षः । सिद्धान्तस्तु— सर्वोपेता सर्वशक्तियुक्ता परा देवता । कुतः, तद्दर्शनात् तस्य सर्वशक्तियोगस्य 'सर्वकर्मा सर्वकामः....' इत्यादिश्रुतौ दर्शनादित्यर्थः ॥

१०. सर्वोपेताधिकरणम् ।

पूर्वपक्षमनुभाष्य दूषयति—

विकरणत्वान्नेति चेत्तदुक्तम् ॥ ३१ ॥

सर्वशक्तियुक्तानामपि देवादीनां चक्षुरादिकरणवतामेव विचित्रकार्यकर्तृत्वमवगम्यते । ब्रह्मणः 'अचक्षुष्कमश्रोत्रम्....' इत्यादिना विकरणत्वावगमान्न कर्तृत्वमिति चेत्, अत्र यदुत्तरं वक्तव्यं तत्पूर्वमेव 'न विलक्षणत्वात्....' 'देवादिवदपि लोके' इत्यादावुक्तम् । अथवा 'अपाणिपादो जवनो ग्रहीता' इत्यादिश्रुत्या उत्तरमुक्तम् । अतः श्रुत्येकसमधिगम्यत्वान्न तर्केण विरोधशङ्कावकाश इति ॥

पूर्वं श्रुत्यवष्टम्भेन सर्वशक्तिमतो ब्रह्मणः कर्तृत्वमवादि ।

तदाक्षिप्य समाधानादाक्षेपसंगत्येदमाह—

न प्रयोजनवत्त्वात् ॥ ३२ ॥

फलं पूर्ववत्। ब्रह्म न फलेन विना सृजति, अभ्रान्तचेतनत्वात्संमतवत् इति न्यायेन अवाप्तसमस्तकामाद्ब्रह्मणो जगत्सर्गं

११. प्रयोजनवत्त्वाधिकरणम्।

ब्रुवन्समन्वयो विरुध्यते न वेति संदेहे, पूर्वः पक्षः— न ब्रह्मणो जगत्कर्तृत्वं संभवति, नित्यतृप्तत्वेन प्रयोजनाभिसंधिरहितत्वात्; प्रेक्षावत्प्रवृत्तेः प्रयोजनवत्त्वाभ्युपगमात्समन्वयो विरुध्यत इति ॥

सिद्धान्तस्तु—

लोकवत्तु लीलाकैवल्यम् ॥ ३३ ॥

तुः पूर्वपक्षनिरासार्थः। यथा लोके राजतदमात्यादीनां फलं विनैव केवललीलारूपाः प्रवृत्तयो दृश्यन्ते, यथा वोच्छ्वासादयः स्वभावादेवोत्पद्यन्ते, तथा ब्रह्मणोऽपि विचित्रकार्यरचना लीलाकैवल्यं केवललीलामात्रम्, न फलसापेक्षम्। कथंचिद्राजादीनां फलसंभवेऽपि नित्यतृप्तस्य ब्रह्मणो लीलामात्रमेतदित्यभिप्रायः ॥

पूर्वं मायामय्या लीलया ब्रह्मणः स्रष्टृत्वमवादि। तदाक्षि-

ण्य समाधानादाक्षेपसंगत्येदमाह—

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति ॥ ३४ ॥

१२. वैषम्यनैर्घृण्याधिकरणम् ।

फलं पूर्ववत् । यो यो विषमसृष्टिकर्ता स स सावद्य इति न्यायेन निरवद्याद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो विरुध्यते न वेति संदेहे, ब्रह्म किं प्राणिकर्मसापेक्षं जगत्कर्तृ, निरपेक्षं वा । आद्ये, अनीश्वरत्वप्रसङ्गः । द्वितीये, वैषम्यनैर्घृण्ये प्रसज्येयाताम् । कांश्चित्तिर्यगादीनत्यन्तदुःखिन उत्पादयति, कांश्चिन्मनुष्यादीन्सुखदुःखसाधारणान्, कांश्चिद्देवादीन्नित्यसुखिन इति वैषम्यम्, सर्वसंहर्तृत्वाच्च नैर्घृण्यम् । ततश्च तस्य सावद्यत्वं प्रसज्येत । अतो निरवद्यस्य ब्रह्मणो न जगत्कर्तृत्वमिति पूर्वः पक्षः । सिद्धान्तस्तु— न ब्रह्मणो वैषम्यनैर्घृण्ये स्याताम् । कस्मात्, सापेक्षत्वात् प्राणिकर्मसापेक्षत्वात् । कर्मानपेक्षत्वे हि वैषम्यादिदोषः स्यात् । न च सापेक्षत्वेऽनीश्वरत्वप्रसङ्गः, भृत्यादिसेवानुसारेण फलदातृ राज्ञो राजत्वदर्शनात् । ननु कस्मात् ब्रह्मणः कर्मसापेक्षत्वमत आह— तथाहि दर्शयति । 'एष ह्येव साधु कर्म कारयति' इत्याद्या श्रुतिरित्यर्थः ॥

सापेक्षत्वमाक्षिप्य समाधत्ते—

न कर्माविभागादिति चेन्नानादित्वात् ॥ ३५ ॥

'सदेव सोम्येदमग्र आसीदेकमेव' इत्यादिना सृष्टेः प्रागविभागावधारणान्न तदानीं कर्मास्ति । ततः कर्मापेक्षया विषमा सृष्टिरित्यसंगतमिति चेत्, न; अनादित्वात् संसारस्य बीजाङ्कुरवद्धेतुहेतुमद्भावोपपत्तेरित्यर्थः ॥

ननु कुतः संसारस्यानादित्वमित्याह—

उपपद्यते चाप्युपलभ्यते च ॥ ३६ ॥

संसारस्यानादित्वमुपपद्यते च । अन्यथा अकस्मादेव सृष्ट्यङ्गीकारे मुक्तस्यापि पुनर्जन्मप्रसङ्गात् पूर्वपूर्वसृष्टिसादृश्यानुपपत्तेश्च । उपलभ्यते च संसारस्यानादित्वम् 'धाता यथापूर्वमकल्पयत्' 'न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा' इति श्रुतिस्मृत्योरित्यर्थः ॥

पूर्वं विषमसृष्टिप्रयोजककर्मणः सत्त्वाद्ब्रह्मणो विषमसृष्टिहेतुत्वमुक्तम् । तद्वदुपादानत्वप्रयोजकगुणवत्त्वस्याभावान्नोपादानत्वमिति प्रत्युदाहरणसंगत्येदमाह—

सर्वधर्मोपपत्तेश्च ॥ ३७ ॥

फलं पूर्ववत् । यन्निर्गुणम्, तन्नोपादानं यथा गन्ध इति

न्यायेन निर्गुणाद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो विरुध्यते न
१३. सर्वधर्मोपपत्त्यधिकरणम्। वेति संदेहे, विरुध्यत इति पूर्वः पक्षः। सिद्धान्तस्तु— जगत्कारणत्वसर्वज्ञत्वादयः कारणधर्मा ये विद्यन्ते, तेषां सर्वेषां पूर्वोक्तप्रकारेण ब्रह्मण्येवोपपत्तेर्ब्रह्मैव जगत्कारणमित्यर्थः। अयं भावः— यन्निर्गुणं तन्नोपादानमिति व्याप्तौ किं परिणामित्वाभावो व्यापकः, उत विवर्तोपादानत्वाभावः। नाद्यः, इष्टत्वात्। न द्वितीयः, आरोपितनित्यत्वोपादाने जात्यादौ व्यभिचारात्। अतो निर्गुणत्वेऽपि ब्रह्मणो न विवर्तोपादानत्वं विरुद्धम्— इति। तस्मान्न कथंचिदपि समन्वयस्य विरोध इति सिद्धम्॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्व-
प्रकाशिकायां द्वितीयाध्यायस्य
प्रथमः पादः॥

ॐ

द्वितीयः पादः ॥

इत्थं मुमुक्षोः सम्यग्ज्ञानोत्पादके त्रय्यन्तसमन्वये परपरिकल्पितदोषनिरासेन स्वपक्षः स्थापितः । अधुना मुमुक्षोः निर्दोषे अद्वैतदर्शने निर्विचिकित्सप्रवृत्तिसिद्धये परमतदूषणप्रधानः पादोऽयमारभ्यते । एवं च समन्वयविरोधनिरासेन स्वपक्षस्थापनपरप्रथमपादेनास्य परमतनिरासनपरस्य पादस्य उपजीव्योपजीवकभावः संगतिः । सर्वधर्मोपपत्तेश्चेत्यनेन ब्रह्मणि कारणधर्माणामुपपत्तिरुक्ता ; तेषां प्रधान एवोपपत्तिः किं न स्यादित्याक्षिप्य समाधीयत इत्याक्षेपलक्षणावान्तरसंगत्या इदमधिकरणमारभते——

रचनानुपपत्तेश्च नानुमानम् ॥ १ ॥

अत्र पूर्वपक्षे सांख्ययुक्तिविरोधात् समन्वयासिद्धिः, सिद्धान्ते तदविरोधात् तत्सिद्धिरिति फलभेदः । प्रधानमचेतनं जगदुपादानमिति सांख्यसिद्धान्तोऽत्र विषयः । स किं प्रमाणमूलो भ्रान्तिमूलो

१. रचनानुपपत्त्यधिकरणम् ।

वेति संदेहे, जगत् सुखदुःखमोहात्मकवस्तूपादानकम्, तदन्वितत्वात् मृदन्वितघटादिवत्; इत्यनुमानेन यत्सुखाद्यात्मकं सिद्धम्, तदेव त्रिगुणात्मकं प्रधानम्। अतः प्रामाणिकः सांख्यसिद्धान्त इति पूर्वः पक्षः। सिद्धान्तस्तु— नोक्तानुमानसिद्धं प्रधानं जगदुपादानम्। कुतः, रचनानुपपत्तेः अचेतनात् स्रष्टव्यज्ञानशून्यात् प्रधानात् अनेकविधविचित्रजगद्रचनानुपपत्तेरित्यर्थः। लोके विचित्रप्रासादादिरचनायाः बुद्धिकुशलशिल्प्यादिकार्यत्वदर्शनादिति भावः। सूत्रे चशब्देन हेतोः स्वरूपासिद्धिं समुच्चिनोति। सुखादीनामान्तरत्वप्रतिपत्तेः तदन्वितत्वं जगतोऽसिद्धम्। तस्मान्न प्रामाणिकः सांख्यसिद्धान्त इति ॥

यत्तु 'शक्तितः प्रवृत्तेश्च' इति, तत्राह—

प्रवृत्तेश्च ॥ २ ॥

लोके हि अचेतनरथादिप्रवृत्तेः चेतनाधीनत्वदर्शनात्, प्रधानस्य साम्यावस्थाप्रच्युतिरूपप्रवृत्तेश्चेतनप्रेरणमन्तरेण अनुपपत्तेरित्यर्थः ॥

अन्यत्र व्यभिचारमाशङ्क्य परिहरति—

पयोम्बुवच्चेत्तत्रापि ॥ ३ ॥

ननु अचेतनस्य स्वयं प्रवृत्तिर्दृश्यते । यथा क्षीरं वत्सविवृद्धये स्वयमेव प्रवर्तते, यथा वा जलं स्वयमेव स्यन्दते, तद्वत् प्रधानमपि स्वयमेव प्रवर्तत इति चेत्, तत्रापि परमात्मैव प्रेरकः श्रूयते 'योऽप्सु तिष्ठन्' इत्यादिना । तथा च पयोम्बुनोः पक्षत्वान्न व्यभिचार इति भावः ॥

ननु एवमपि धर्माद्यपेक्षया प्रधानस्य प्रवृत्तिः स्यादित्याशङ्क्याह—

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ४ ॥

सांख्यमते गुणाः साम्येनावस्थिताः प्रधानम्, तद्व्यतिरेकेण सहकार्यन्तरस्यानवस्थितेः ; पुरुषस्य तु असङ्गोदासीनत्वेन प्रवृत्तौ निवृत्तौ वा अनपेक्षत्वाभ्युपगमादित्यर्थः ॥

ननु सहकार्यभावेऽपि प्रवृत्तिरन्यत्र दृष्टेत्यत आह—

अन्यत्राभावाच्च न तृणादिवत् ॥ ५ ॥

तृणादिकं निमित्तान्तरनिरपेक्षमेव क्षीराकारेण परिणमते, तद्वत् प्रधानमपीति चेत्, न । कुतः, अन्यत्राभावात् धेन्वादेरन्यत्र बलीवर्दादौ तृणादेः क्षीरभावस्याभावादित्यर्थः । धेन्वादिसापेक्षमेव तृणादिकं क्षीरं भवति । निरपेक्षत्वे बलीवर्दादावपि क्षीरभावप्रसङ्गादिति भावः ॥

प्रधानस्य स्वतः प्रवृत्तिमुपेत्यापि दूषयति—

अभ्युपगमेऽप्यर्थाभावात् ॥ ६ ॥

प्रधानस्य स्वतःप्रवृत्त्यभ्युपगमेऽपि पुरुषार्थस्यापेक्षाभावप्रसङ्गादित्यर्थः । न चेष्टापत्तिः ; प्रधानमचेतनं चेतनस्य पुरुषार्थं साधयितुमेव प्रवर्तत इति स्वाभ्युपगमविरोधादिति भावः ॥

ननु पुरुष एव स्वयमप्रवर्त्तमानोऽपि प्रधानप्रवर्तकः स्यादित्याशङ्क्याह––

पुरुषाश्मवदिति चेत्तथापि ॥ ७ ॥

लोके यथा पङ्गुः पुरुषः स्वयमप्रवर्तमानोऽपि अन्यमन्धं प्रवृत्तिशक्तिमन्तं प्रवर्तयति, यथा वा अयस्कान्तोऽश्मा संनिधिमात्रेणायः प्रवर्तयति, एवं पुरुषः प्रवर्तक इति चेत्, तथापि प्रधानस्य पुरुषप्रेर्यत्वे स्वातन्त्र्याभ्युपगमविरोधः, पुरुषस्य प्रवर्तकत्वे कौटस्थ्यहानिरित्यादिदोषाणामनिर्मोक्षः । ब्रह्मणस्त्वाविद्यकं प्रवर्तकत्वमिति न कौटस्थ्यहानिः ॥

अपि च––

अङ्गित्वानुपपत्तेश्च ॥ ८ ॥

सांख्यमते गुणत्रयसाम्यावस्था प्रकृतिः ; सा कूटस्था वा, विकारिणी वा । आद्ये परस्परानपेक्षाणां गुणानां साम्यावस्था-

प्रच्युत्यभावेन अङ्गाङ्गित्वानुपपत्तेः कार्यानुदयप्रसङ्गः। द्वितीये स्वतः प्रच्युतिः, उतान्यतः; नाद्यः, सदा कार्यप्रसङ्गात्; न द्वितीयः, पुरुषस्यौदासीन्याभ्युपगमहानेः। अतः प्रच्युत्यभावेन अङ्गाङ्गिभावानुपपत्तेः कार्याभावप्रसङ्ग इत्यर्थः॥

गुणानामनपेक्षस्वभावत्वात् न प्रच्युतिरित्यत्रासिद्धिमाशङ्क्य परिहरति—

अन्यथानुमितौ च ज्ञशक्तिवियोगात्॥ ९॥

न वयमनपेक्षस्वभावान्कूटस्थान्गुणाननुमिमीमहे; अपि तु अन्यथा प्रकारान्तरेण गुणानन्योन्यसापेक्षान्; एवमनुमितौ न प्रागुक्तदोषप्रसक्तिरिति चेत्, न; ज्ञशक्तिवियोगात् गुणानां ज्ञानशक्तिरहितत्वादित्यर्थः। स्वतःप्रच्युत्यभावेन अङ्गाङ्गिभावानुपपत्तेः कार्यानुदयप्रसङ्गस्तदवस्थ एवेति भावः॥

इतश्चासंगतं सांख्यमतमित्याह—

विप्रतिषेधाच्चासमञ्जसम्॥ १०॥

सांख्या हि क्वचिन्महतः पञ्चतन्मात्रसर्गं संगिरन्ते, क्वचिदहंकारात्, क्वचिदेकादशेन्द्रियाणि, क्वचिद्बाह्येन्द्रियाणि त्वगिन्द्रियेऽन्तर्भाव्य सप्तेन्द्रियाणीति। एवं च परस्परविप्रतिषेधादसमञ्जसं सांख्यमतम्। तस्मान्न सांख्यसिद्धान्तो

भ्रान्तिमूल एवेति सिद्धम् ॥

पूर्वं प्रपञ्चस्य प्रधाननिष्ठाशब्दत्वादिगुणानन्वयात् प्रधानानुपादानकत्ववत् ब्रह्मगुणचेतनत्वानन्वयात् ब्रह्मोपादानकत्वं न स्यादिति दृष्टान्तसंगत्येदमाह—

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥

स्वपक्षदोषनिरासस्य स्मृतिपादसंबन्धेऽपि उक्तावान्तरसंगतिलाभादिहेदमधिकरणं लिखितमिति बोद्धव्यम् । फलं पूर्व-

२. महद्दीर्घाधिकरणम् ।

वत् । चेतनाद्ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयोऽत्र विषयः । स किं कारणगुणाः कार्ये स्वसमानजातीयगुणारम्भका इति न्यायेन विरुध्यते, न वेति संदेहे, विरुध्यत इति पूर्वः पक्षः । सिद्धान्तस्तु— ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमाणुभ्याम्, महद्दीर्घवत् । चशब्दार्थकवाशब्दात् ह्रस्वाणुवच्च, चेतनात् ब्रह्मणोऽचेतनं जगद्भवतीति योजना । एतदुक्तं भवति— वैशेषिका हि ह्रस्वाणोर्द्व्यणुकान्महद्दीर्घं च त्र्यणुकं जायते; द्व्यणुकनिष्ठह्रस्वत्वाणुत्वे त्र्यणुके स्वसमानजातीयह्रस्वत्वाणुत्वे नारभेते; किं तु द्व्यणुकगतत्रित्वसंख्या त्र्यणुके महत्त्वादिकमारभते । एवं परिमण्डलात् परमाणोः अणु द्व्यणुकं जायते; परमाणुगतं पारिमाण्डल्यं परिमाणं द्व्यणुके तादृशं पारिमाण्डल्यं नार-

भते; किं तु परमाणुगतद्वित्वसंख्या द्व्यणुके ह्रस्वत्वादिकमारभते—इति प्रक्रियां प्रदर्शयन्ति। इत्थं प्रदर्शयतां वैशेषिकाणां कारणगुणाः कार्ये स्वसमानजातीयगुणारम्भका इति न्यायाभासं वदतां कथं न लज्जा भवेत्, व्यभिचारस्य स्फुटत्वात्। अतः समन्वयो न विरुध्यत इति सिद्धम्। 'एतेन शिष्टापरिग्रहाः....' इत्यस्यायं प्रपञ्च इत्यपौनरुक्त्यम्॥

प्रासङ्गिकाव्यवहितेनास्य न संगत्यपेक्षा। व्यवहितेन तु—पूर्वं प्रधानस्य चेतनानधिष्ठितत्वात्कारणत्वाभावे उक्ते; तर्हि चेतनाधिष्ठिताः परमाणवः कारणं जगत इति प्रत्युदाहरणसंगत्येदमाह—

उभयथापि न कर्मातस्तदभावः॥ १२॥

अत्र पूर्वपक्षे वैशेषिकसिद्धान्तविरोधे समन्वयासिद्धिः, सिद्धान्ते तदविरोधे तत्सिद्धिरिति फलभेदः। परमाणुप्रक्रियया जगदुत्पत्तिरिति वैशेषिकराद्धान्तोऽत्र विषयः। स किं प्रमाणमूलः, भ्रान्तिमूलो वेति संदेहे, प्रमाणमूल इति पूर्वः पक्षः। सिद्धान्तस्तु— वैशेषिकाः खलु कर्मणा प्राक्सृष्टेर्निश्चलयोः परमाण्वोः संयोगे द्व्यणुकाद्युत्पत्तिरित्याचक्षते। तस्य कर्मणः किंचिन्निमित्तमभ्युपगम्यते वा, न वा। आद्ये, कर्म-

३. परमाणुजगदकारणत्वाधिकरणम्।

निमित्तत्वेन प्रसिद्धं जीवप्रयत्नाभिघातादिकमङ्गीकर्तव्यम् । न हि तत्संभवति, सृष्ट्युत्तरकालीनत्वात् तस्य । द्वितीये कर्मानुत्पत्तिः । अत उभयथापि न कर्म, अदृष्टस्याचेतनस्य स्वतः कर्माभिमुख्यायोगात् । अतः कर्माभावात्, तदभावः द्व्यणुकादिक्रमेण सृष्ट्युत्पादस्याभाव इति दिक् । तस्माद्वैशेषिकसिद्धान्तो भ्रान्तिमूल इति सिद्धम् ॥

किं च—

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ १३ ॥

तदभाव इत्यनुषङ्गः । तस्य द्व्यणुकादिसृष्ट्युत्पादस्याभावः । कुतः, परमाणुद्व्यणुकानां समवायाभ्युपगमात् । अस्त्वभ्युपगमः, किं तेन— साम्यादनवस्थितेः । यथैव हि अणुभ्यामत्यन्तभिन्नं सत् द्व्यणुकं समवायेन ताभ्यां संबध्यते, एवं समवायोऽपि समवायिभ्योऽत्यन्तभिन्नः सन् अन्येन समवायेन समवायिभिः संबध्येत, अत्यन्तभेदसाम्यात् ; ततश्च तस्यान्योन्यः समवायः कल्पनीय इत्यनवस्थानात् । एवं च समवायासिद्धौ समवेतद्व्यणुकादिसृष्ट्यसिद्धिः स्यादित्यर्थः ॥

अपि च—

नित्यमेव च भावात् ॥ १४ ॥

परमाणूनां प्रवृत्तिस्वभावत्वे प्रवृत्तेः नित्यमेव भावात् प्रलयाभावप्रसङ्गः । निवृत्तिस्वभावत्वे निवृत्तेः नित्यमेव सत्त्वात् सृष्ट्यभावप्रसङ्ग इत्यर्थः ॥

इत्थं परमाणूनां कारणत्वं निराकृत्य निरवयवत्वादिकं निराकर्तुमाह—

रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ १५ ॥

वैशेषिकमते जगत्कारणपरमाणूनां रूपादिमत्त्वात् निरवयवत्वाणुत्वनित्यत्वविपर्ययः सावयवत्वादिः प्रसज्येत, लोके रूपादिमतः पटादेस्तथा दर्शनादित्यर्थः ॥

किं च—

उभयथा च दोषात् ॥ १६ ॥

वैशेषिकमते परमाणवः किमुपचितानुपचितगुणात्मकाः कल्प्यन्ते, न वा । आद्ये, अणुत्वव्याघातः, उपचितानुपचितगुणात्मकपृथिव्यादेः स्वरूपोपचयदर्शनात् । द्वितीये, तत्कार्यपृथिव्यादिषु रूपाद्यनुपलम्भप्रसङ्ग इति उभयथापि दोषादनुपपन्नः परमाणुकारणवादः ॥

अपि च—

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १७ ॥

परमाणुकारणवादस्य केनाचिदप्यंशेन कैश्चिदपि शिष्टैः अपरिग्रहात् तत्रात्यन्तमनपेक्षा श्रेयोर्थिभिः कर्तव्या। अतो वैशेषिकराद्धान्तो भ्रान्तिमूल एवेति सिद्धम् ॥

एवमर्धवैनाशिकवैशेषिकमतनिराकरणानन्तरं पूर्णवैनाशिकमतं बुद्धिस्थमिदानीं निराक्रियत इत्यवान्तरसंगत्येदमाह—

समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ १८ ॥

फलं पूर्ववत्। चत्वारः खलु बुद्धमुनेर्विनेया वैभाषिकसौत्रान्तिकविज्ञानवादिसर्वशून्यवाद्याख्याः। तत्रादौ वैभाषि-

४. समुदायाधिकरणम्।

कसौत्रान्तिकयोः बाह्यास्तित्वाविशेषात् तन्मतमेकीकृत्य तत्किं प्रमाणमूलं भ्रान्तिमूलं वेति संदेहे, पृथिव्यादीनि चत्वारि भूतानि भौतिकानि विषयेन्द्रियाणि च परमाणुपुञ्जस्वरूपाणि; तत्र बाह्यः पृथिव्यादिसमुदायः परमाणुहेतुक एव; आध्यात्मिको रूपादिसमुदायो रूपविज्ञानवेदनासंज्ञासंस्कारलक्षणपञ्चस्कन्धहेतुकः— इति तन्मतं प्रामाणिकमिति पूर्वः पक्षः। सिद्धान्तस्तु— उभयहेतुकेऽपि समुदाये परमाणुहेतुके बाह्यसमुदाये स्कन्धहेतुके आध्यात्मिकसमुदाये च, तदप्राप्तिः तस्य समुदायस्याप्राप्तिः; अचेतनानां परमाणूनां स्कन्धानां च स्वतःसमुदायायोगात्, अन्यस्य च स्थिरस्य चेतनस्य

समुदायकर्तुरनभ्युपगमात् । अतः तन्मतं भ्रान्तिमूलमिति सिद्धम् ॥

ननु संहन्तुश्चेतनस्याभावेऽपि संघात उपपद्यत इत्याशङ्क्य परिहरति—

इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥ १९ ॥

अविद्या संस्कारो विज्ञानमित्येवंजातीयकानामविद्यादीनाम् इतरेतरप्रत्ययत्वात् इतरेतरकारणत्वात् घटीयन्त्रवदनिशमावर्तमानेषु अविद्यादिषु अर्थादाक्षिप्तः संघात उपपद्यत इति चेत्, न; उत्पत्तिमात्रनिमित्तत्वात् अविद्यादीनामितरेतरकारणत्वेऽपि उत्पत्तिमात्रे निमित्तत्वात् तवाभिमतो हेत्वधीनः कारणसमुदायाधीनश्च कार्योत्पादो न संभवति, संहन्तुः स्थिरस्य चेतनस्यानङ्गीकारादित्यर्थः ॥

सर्वक्षणिकत्ववादिनां हेत्वधीनोऽपि कार्योत्पादो न संभवतीत्याह—

उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥

कार्यकाले विद्यमानस्यैव मृदादेः कारणत्वं दृश्यते । न तु नष्टस्य । भवन्मते तु उत्तरस्य कार्यक्षणस्य उत्पादे पूर्वस्य

कारणक्षणस्य निरोधात् विनाशाङ्गीकारादित्यर्थः ॥

ननु निर्हेतुक एव कार्योत्पादोऽस्तु; तथा च नोक्तदोष इत्याशङ्कयाह—

असति प्रतिज्ञोपरोधो यौगपद्य-
मन्यथा ॥ २१ ॥

असति हेतौ कार्योत्पत्त्यङ्गीकारे पूर्वं ज्ञानचक्षुरालोकविषयेषु चतुर्षु हेतुषु सत्सु कार्यं नीलादिविज्ञानं जायते इत्यस्याः प्रतिज्ञाया उपरोधः स्यात्। अन्यथा कार्यं सहेतुकमित्यङ्गीकृत्य कार्यपर्यन्तं हेतोः स्थित्यङ्गीकारे, हेतुफलयोः यौगपद्यम् एकस्मिन्काले स्थितिः स्यादित्यर्थः। एवं च क्षणिकत्वप्रतिज्ञाहानिरिति भावः ॥

इत्थं समुदायः कार्यकारणत्वं क्षणिकत्वं च असिद्धमित्यभिधाय अधुनाभ्युपगमान्तरं प्रत्याह—

प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्ति-
रविच्छेदात् ॥ २२ ॥

वैनाशिकाः खलु भावानां बुद्धिपूर्वकनाशोऽबुद्धिपूर्वकनाश आकाशश्चेति त्रितयमपि अवस्तु निरुपाख्यमित्याचक्षते। तत्र आकाशं परस्तात् प्रत्याख्यास्यति; नाशद्वयमधुना प्रत्याचष्टे।

प्रतिसंख्याप्रतिसंख्यानिरोधौ बुद्धिपूर्वकाबुद्धिपूर्वकनाशौ तयोः संतानसंतानिषु अप्राप्तिः असंभवः । कुतः, अविच्छेदात् न तावन्निरोधद्वयस्य संतानगोचरत्वम्, संतानस्याविच्छेदात् । नापि संतानिप्रतियोगिकत्वम्, संतानिनां घटादीनां क्षणिकत्वेन बुद्धिपूर्वकनाशायोगात् । नाप्यबुद्धिपूर्वकसमूलनाशस्त्वदभ्युपगतः संभवति, मूलस्य मृदादेः प्रत्यभिज्ञायमानत्वात् । तस्मान्निरोधद्वयस्यानुपपत्तिरित्यर्थः ॥

प्रतिसंख्यानिरोधान्तर्भूतमविद्यानिरोधं निरस्यति—

उभयथा च दोषात् ॥ २३ ॥

क्षणिकेषु स्थिरत्वादिभ्रान्तिः अविद्या । तस्याः किं सम्यग्ज्ञानान्नाशः, स्वतो वा । नाद्यः, निर्हेतुकनाशाभ्युपगमहानिप्रसङ्गात्; न द्वितीयः, सम्यग्ज्ञानोपदेशानर्थक्यादिति उभयथापि दोषादसंगतं सौगतमतमित्यर्थः ॥

इत्थं निरोधद्वयस्य निरुपाख्यत्वं निरस्य, आकाशस्य तन्निरस्यति—

आकाशे चाविशेषात् ॥ २४ ॥

'आत्मन आकाशः संभूतः' इति श्रुत्या शब्दगुणत्वेन चाकाशेऽपि पृथिव्यादिवद्वस्तुत्वप्रतिपत्तेरविशेषात् न निरुपाख्यत्वमित्यर्थः ॥

अधुना आत्मनः क्षणिकत्वं निराचष्टे—

अनुस्मृतेश्च ॥ २५ ॥

अनुभवमनु उत्पद्यमाना स्मृतिः अनुस्मृतिः, तद्बलात् आत्मनोऽनुभवितुः न क्षणिकत्वमित्यर्थः । अन्यस्यानुभूते विषये अन्यस्य स्मरणायोगादिति भावः ॥

कारणाभावात्कार्योत्पत्तिरिति पक्षमवशिष्टं निराचष्टे—

नासतोऽदृष्टत्वात् ॥ २६ ॥

असतोऽभावात्कार्योत्पत्तिर्न युक्ता । कुतः, अदृष्टत्वात् निरुपाख्यात् नरविषाणादेः कार्योत्पत्तेरदृष्टत्वात् । दृष्टत्वादिति वा छेदः । सत एव मृदादेर्दृष्टत्वादित्यर्थः ॥

अधुना प्रवृत्तिमात्रमपि न युक्तमित्याह—

उदासीनानामपि चैवं सिद्धिः ॥ २७ ॥

अभावाद्भावोत्पत्तिरित्यङ्गीकारे उदासीनानां तत्तत्कार्यसाधनेषु अप्रवर्तमानानामपि पुंसां स्वस्वाभिमतकार्यसिद्धिः स्यात् । अतो वैभाषिकसौत्रान्तिकयोर्मतं भ्रान्तिमूलमेवेति सिद्धम् ॥

पूर्वं क्षणिकबाह्यार्थवादिमतनिराकरणमकारि । तदुपजीव्य क्षणिकविज्ञानमात्रवादी प्रत्यवतिष्ठत इति उपजीव्योपजी-

वकभावसंगत्येदमाह—

नाभाव उपलब्धेः ॥ २८ ॥

फलं पूर्ववत् । विज्ञानातिरिक्तबाह्यपदार्थस्याभाव इति विज्ञानवादिसिद्धान्तोऽत्र विषयः । स किं प्रमाणमूलः, भ्रान्तिमूलो वेति संदेहे, प्रमाणमूल इति पूर्वः पक्षः । सिद्धान्तस्तु— विज्ञानव्यतिरिक्तानामभावो न संभवति । कुतः, उपलब्धेः विज्ञानातिरिक्तानामर्थानां घटः पटः इत्याद्यनुभवसिद्धत्वादित्यर्थः ॥

९. अभावाधिकरणम् ।

ननु जाग्रद्दशायामुत्पन्नाः सर्वे प्रत्यया निरालम्बनाः, प्रत्ययत्वात् स्वप्नगन्धर्वनगरादिप्रत्ययवत् ; इत्याशङ्क्य बाधितविषयत्वमुपाधिरित्याह—

वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥

स्वप्नादिप्रत्ययस्य जाग्रत्प्रत्ययस्य च अन्योन्यं बाधितविषयत्वाबाधितविषयत्वरूपवैधर्म्यात् न स्वप्नादिदृष्टान्तेन निरालम्बनत्वं जाग्रत्प्रत्ययस्येत्यर्थः । चशब्देन दृष्टान्ते साध्यवैकल्यं सूचितं स्वप्ने प्रातिभासिकविषयाणां सत्त्वादिति । बाह्यार्थानामभावे घटज्ञानं पटज्ञानमिति ज्ञानवैचित्र्यं न स्यादिति सूत्रद्वयस्य तात्पर्यम् ॥

ननु अर्थानामभावेऽपि वासनाभिस्तद्वैचित्र्यं स्यादित्यत आह—

न भावोऽनुपलब्धेः ॥ ३० ॥

वासनानां न भावो न सद्भावः। कस्मात्, अनुपलब्धेः त्वत्पक्षे बाह्यार्थानामनुपलब्धेरित्यर्थः। बाह्यार्थानुभवस्य च वासनां प्रति कारणत्वात् कारणाभावे कार्याभावः। किं च त्वत्पक्षे वासनानां संस्काराभिधानानामाश्रयासंभवादनुपपत्तिरिति भावः ॥

ननु अहमित्यालयप्रत्यय एवाश्रय इत्यत आह—

क्षणिकत्वाच्च ॥ ३१ ॥

आलयविज्ञानस्य क्षणिकत्वाङ्गीकारान्नाश्रयत्वमित्यर्थः ॥

अधिकरणद्वयार्थमुपसंहरति—

सर्वथानुपपत्तेश्च ॥ ३२ ॥

पश्यनातिष्ठनेत्याद्यपशब्दप्रयोगात् ग्रन्थतोऽनुपपन्नमिदं मतम्; उक्तक्रमेणार्थतोऽनुपपन्नमेवेति सर्वथानुपपत्तेः नादरणीयं श्रेयोर्थिभिः भ्रान्तिमूलं सौगतमतमिति सिद्धम्। सर्वशून्यवादिनिरासपरत्वेनापि एतानि 'नाभाव उपलब्धेः' इत्यादिसूत्राणि योजयितव्यानि ॥

एवं मुक्तकच्छानां बौद्धानां मते निरस्ते, मुक्ताम्बराणां मतं बुद्धिस्थम् । एवं च बुद्धिसंनिधिलक्षणसंगत्येदमाह––

नैकस्मिन्नसंभवात् ॥ ३३ ॥

फलं पूर्ववत् । दिगम्बरमतं प्रमाणमूलं भ्रान्तिमूलं वेति संदेहे, स्यादस्ति स्यान्नास्ति इत्यादिसप्तभङ्गीनयम् अस्तित्वनास्तित्वादिविरुद्धधर्मद्वयमादाय सर्वेषु पदार्थेषु योजयन्तो दिगम्बराः पदार्थमात्रस्यानेकरूपत्वमाचक्षत इति तन्मतं प्रमाणमूलमिति पूर्वः पक्षः । सिद्धान्तस्तु–– नैकस्मिन्नसंभवात् एकस्मिन् परमात्मरूपे वस्तुनि विरुद्धधर्माणामसंभवात्, वस्तुनोऽनेकरूपत्वं नास्तीत्यर्थः । यदस्ति तदस्त्येव न नास्ति, यन्नित्यं तन्नित्यमेव नानित्यम्, यथा प्रत्यगात्मा वस्तुभूतः । एवं प्रपञ्चस्यापि त्वन्मते वस्तुभूतत्वान्नानेकरूपत्वसंभवः । अस्मन्मते तु प्रपञ्चो न सन् नासन्; किंतु अनिर्वचनीय एवेति सर्वव्यवहारसंभव इति भावः ॥

६. एकस्मिन्नसंभवाधिकरणम् ।

दिगम्बराणां देहपरिमाण एवात्मेति यन्मतम्, तद्दूषयति–

एवं चात्माकार्त्स्न्यम् ॥ ३४ ॥

यथैकत्र विरुद्धधर्मासंभवो दोषः स्याद्वादे प्रसक्तः, एवमा-

त्मनो जीवस्य अकार्त्स्न्यं परिच्छिन्नत्वमपरो दोषः स्यादित्यर्थः । तथा च परिच्छिन्नत्वादात्मनो घटादिवत् अनित्यत्वं स्यात् । देहपरिमाणत्वे मनुष्यात्मनः कर्मवशात् गजशरीरे कृत्स्ने, कृत्स्नस्यात्मनः पुत्तिकाशरीरे वा प्रवेशो न स्यादिति भावः ॥

ननु आत्मनः सावयवत्वाङ्गीकारात्क्रमेण प्रवेशोऽस्त्वित्याशङ्क्याह—

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥

पर्यायेणाप्यवयवगमनागमनाभ्यां तत्तत्स्थूलसूक्ष्मशरीरपरिमाणत्वस्य आत्मन्यविरोध इति, न च । कुतः, विकारादिभ्यः आत्मनः सावयवत्वेन तत्तच्छरीरप्राप्त्या वृद्धिह्रासवत्त्वाङ्गीकारे विकारित्वप्रसक्त्या अनित्यत्वे बन्धमोक्षाभ्युपगमो बाध्येतेत्यर्थः ॥

किं च—

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ३६ ॥

अन्त्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्य नित्यत्वेनावस्थितेः तत्पूर्वयोरुभयोरपि आद्यमध्यमपरिमाणयोः नित्यत्व-

प्रसङ्गात् त्रयाणामाद्यमध्यमान्त्यपरिमाणानामविशेषः साम्यं स्यात्। अतः सौगतमतवदार्हतमतमपि अप्रामाणिकमिति सिद्धम्॥

पूर्वं सत्त्वासत्त्वयोरेकत्र विरोधादसंभव इत्युक्तम्। तर्हि तद्वदुपादानत्वकर्तृत्वयोरेकत्र विरोधादसंभव इति दृष्टान्तसंगत्येदमाह—

पत्युरसामञ्जस्यात्॥ ३७॥

फलं पूर्ववत्। केवलमधिष्ठाता ईश्वरो जगतो नोपादानमिति माहेश्वरराद्धान्तोऽत्र विषयः। स किं प्रमाणमूलः, भ्रा-

७. पत्यधिकरणम्।

न्तिमूलो वेति संदेहे, प्रमाणमूल इति पूर्वः पक्षः। सिद्धान्तस्तु— पत्युरीश्वरस्य जगदुपादानप्रधानादिप्रेरकत्वेन जगन्निमित्तमात्रत्वं न संभवति। कुतः, असामञ्जस्यात् ईश्वरस्य जगत्सर्जने प्रवृत्तौ रागादिदोषप्रसङ्गात् असामञ्जस्यं स्यात्, प्रवृत्तेः रागादिपूर्वकत्वेन लोके दृष्टत्वात्, दृष्टानुसारित्वात् कल्पनायाः। अस्माकं तु श्रुत्यनुसारित्वादनिर्वचनीयवादित्वाच्च न दोष इति भावः॥

अपि च—

संबन्धानुपपत्तेश्च॥ ३८॥

प्रेर्यप्रधानादिभिः प्रेरकस्येश्वरस्य संबन्धो वाच्यः, असं-

बद्धस्य प्रेरकत्वायोगात् । न च संबन्धः संभवति, निरवयवत्वात् युतसिद्धत्वाच्च संयोगसमवाययोरनुपपत्तेरित्यर्थः । सिद्धान्ते तु अविद्याप्रेरकत्वं कल्पिततादात्म्येनोपपद्यत इति भावः ॥

किं च—

अधिष्ठानानुपपत्तेश्च ॥ ३९ ॥

लोके कुलालस्य मृदादिप्रेरकत्वं दृष्टम्, न हीश्वरस्य प्रधानादिप्रेरकत्वं संभवति; प्रधानस्य रूपादिहीनत्वेन तद्विषयकाधिष्ठानस्य प्रेरणाया अनुपपत्तेरित्यर्थः । सिद्धान्ते तु न दृष्टापेक्षा, श्रुत्येकशरणत्वादिति भावः ॥

एतद्विधान्तरेणाक्षिप्य परिहरति—

करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥

करणानीन्द्रियाणि अप्रत्यक्षाण्यपि यथा जीवेन प्रेर्यन्ते, एवं प्रधानमप्रत्यक्षमपि ईश्वरेण प्रेर्यत इति चेत्, न । कुतः, भोगादिभ्यः दोषेभ्यः जीवस्य भोगार्थमिन्द्रियप्रेरकत्ववदीश्वरस्य प्रेरकत्वे तद्भोगादयः प्रसज्येरन्नित्यर्थः ॥

किं च—

अन्तवत्त्वमसर्वज्ञता वा ॥ ४१ ॥

प्रधानजीवेश्वराणां या संख्या यच्च परिमाणं तदुभयमपि ईश्वरेण परिच्छिद्यते न वेति संदेहे, आद्ये परिच्छिन्नसंख्यापरिमाणवत्त्वात् त्रयाणां घटवदन्तवत्त्वं विनाशित्वं स्यात्; द्वितीये ईश्वरस्यासर्वज्ञत्वं स्यात्। अतो माहेश्वरराद्धान्तो भ्रान्तिमूल एवेति सिद्धम् ॥

एवं केवलाधिष्ठातैवेश्वर इति वेदासंगतमते निरस्ते । निमित्तं प्रकृतिश्चेश्वर इति भागवतमतस्य वेदसंगतत्वात् जीवोत्पत्त्यंशे प्रमाणमूलत्वं स्यादिति प्रत्युदाहरणसंगत्येदमाह––

उत्पत्त्यसंभवात् ॥ ४२ ॥

फलं पूर्ववत् । वासुदेवः खलु परमात्मा जगदुपादानं निमित्तं च । तस्मात् संकर्षणाख्यो जीव उदेति; तस्मात् प्रद्युम्नाख्यं मनो जायते; तस्मात् अनिरुद्धाख्योऽहंकारो जायत इति भागवतराद्धान्तोऽत्र विषयः। स किं प्रमाणमूलो भ्रान्तिमूलो वेति संदेहे, प्रमाणमूल इति पूर्वः पक्षः । सिद्धान्तस्तु–– भवतु वेदाविरुद्धांशे प्रमाणमूलत्वम् , न तत् वेदविरुद्धजीवोत्पत्त्यंशे । कुतः, वासुदेवात् जीवस्योत्पत्तेरसंभवात्। यद्युत्पत्तिरङ्गीक्रियते, तर्हि घटवदनित्यत्वापत्त्या भगवत्प्राप्तिरूपमोक्षस्त्वदभ्युपगतः कस्य स्यात् । अतो भ्रान्तिमूलो भागवतसिद्धान्तः ॥

८. उत्पत्त्यसंभवाधिकरणम् ।

इत्थं जीवजन्म निरस्य ततो मनोजन्म निरस्यति—

न च कर्तुः करणम् ॥ ४३ ॥

कर्तुः देवदत्तादेः सकाशात् करणस्य कुठारादेः उत्पत्त्यदर्शनात् जीवात्कर्तुः करणं मनो जन्यत इत्येतदसंगतमित्यर्थः ॥

ननु वासुदेवात् न संकर्षणस्य जन्म, नापि संकर्षणात् प्रद्युम्नस्येत्यत्रेष्टापत्तिमाशङ्कयाह—

विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥

संकर्षणादीनां त्रयाणां वासुदेववद्विज्ञानादिभावे वा विज्ञानैश्वर्यबलवन्निर्दोषनिरवद्यस्वरूपत्वेऽपि तदप्रतिषेधः तस्योत्पत्त्यसंभवरूपदोषस्य प्रकारान्तरेण अप्रतिषेध इत्यर्थः । किं वासुदेवादयश्चत्वारोऽपीश्वराः, उत संकर्षणादयस्त्रयो वासुदेवतुल्याः । आद्ये भगवानेक एव वासुदेव इति स्वसिद्धान्तहानिः, द्वितीये उत्पत्त्यसंभवदोषस्तदवस्थ एवेति भावः ॥

अपि च—

विप्रतिषेधाच्च ॥ ४५ ॥

क्वचित् ज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि वासुदेवस्य गुणा इति, क्वचिच्च उक्तगुणा एव वासुदेव इति गुणगुणिनोर्भेदमभेदं च वर्णयन्ति । तथा च परस्परं विप्रतिषेधात् अप्रामा-

णिकमिदं भागवतमतमित्यर्थः । तस्मादेवं सांख्यवैशेषिकसौगतार्हतमाहेश्वरभागवतमतानां भ्रान्तिमूलत्वेन तैर्मतैः निरवद्यादद्वैतात् ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो न विरुध्यत इति सिद्धम् ॥

यत्साक्षात्कृतये सर्ववेदान्तानां समन्वये ।
परास्तः परराद्धान्तविरोधस्तदहं परम् ॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्व-
प्रकाशिकायां द्वितीयाध्यायस्य
द्वितीयः पादः ॥

ॐ

तृतीयः पादः ॥

पूर्वस्मिन्पादे श्रुतिविरुद्धत्वात् परपक्षाणामनपेक्षत्वमभाणि। तर्हि श्रुतीनामप्यन्योन्यविरुद्धत्वात् ब्रह्मकारणवादस्यापि अनपेक्षत्वं स्यादिति शङ्कानिरासार्थं परं पादद्वयमारभ्यते। एवं च पूर्वपादेनास्य पादद्वयस्य दृष्टान्तसंगतिः शङ्काव्याजेन दर्शिता। पादान्तरत्वात् पूर्वाधिकरणेनास्याधिकरणस्य न संगत्यपेक्षा—

न वियदश्रुतेः ॥ १ ॥

अत्र पूर्वपक्षे श्रुतीनां मिथोविरोधादप्रामाण्यम्, सिद्धान्ते विरोधाभावात्प्रामाण्यमिति फलभेदः। एवं सर्वेषु चाधिकरणेषु पादद्वयगतेषु पूर्वोत्तरपक्षयोः फलं द्रष्टव्यम्। अत्रादौ सृष्टिवाक्यानामविरोधं प्रतिपादयितुमाकाशमाश्रित्य विचार्यते। किमाकाशस्योत्पत्तिरस्ति, उत नेति संदेहे, यद्यस्ति तर्हि छान्दोग्ये आकाशवायू विना 'तत्तेजोऽसृजत' इति तेजआदिका सृष्टिः श्रूयते; तैत्तिरीयके

१. वियदधिकरणम्।

तु— ‘आत्मन आकाशः संभूतः’ इति आकाशादिका । तथा चानयोर्वाक्ययोर्विरोध इति पूर्वः पक्षः। सिद्धान्तस्तु— एकदेशिमतेन न वियत् आकाशः उत्पद्यते । कस्मात्, अश्रुतेः आकाशस्योत्पत्तिप्रतिपादकवाक्यस्याश्रवणात् । यद्यपि ‘आत्मन आकाशः संभूतः’ इति श्रुतिरस्ति, तथापि सा गौणीति गूढाभिसंधिः ॥

ततश्च आकाशस्योत्पत्तेरनभ्युपगमादेव न विरोध इति ग्रन्थाभिसंधिमजानानः शङ्कते—

अस्ति तु ॥ २ ॥

तुशब्दः पक्षान्तरपरिग्रहे । छान्दोग्ये आकाशस्योत्पत्त्यभावेऽपि सा श्रुतिः तैत्तिरीयकेऽस्तीत्यर्थः । तथा च विरोधस्तदवस्थ एवेति शङ्कितुराशयः ॥

एकदेशी स्वाभिप्रायं प्रकटयति—

गौण्यसंभवात् ॥ ३ ॥

न ह्याकाशस्योत्पत्तिश्रुतिर्मुख्या, किं तु गौणी । कुतः, असंभवात् आकाशोत्पत्तौ समवायिकारणादिसामग्र्यभावात्, विभुत्वेन नित्यत्वानुमानाच्च आकाशोत्पत्तेरसंभवादित्यर्थः ॥

किं च—

शब्दाच्च ॥ ४ ॥

'वायुश्चान्तरिक्षं चैतदमृतम्' इत्याकाशे अमृतशब्ददर्शनात् नाकाशस्योत्पत्तिरित्यर्थः ॥

ननु एकस्मिन्वाक्ये एकस्य संभूतशब्दस्य गौणत्वं मुख्यत्वं च विरुध्यत इत्यत आह—

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥

यथा एकस्मिन्नेव प्रकरणे विषयभेदात् 'अन्नं ब्रह्म' इत्यत्र ब्रह्मशब्दो गौणः 'आनन्दो ब्रह्म' इत्यत्र मुख्यः, तथा प्रकृतेऽपि विषयभेदादेकस्य गौणत्वं मुख्यत्वं च स्यादित्यर्थः ॥

इदमेकदेशिमतं दूषयन् सिद्धान्तयति—

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥

औपनिषदात् ब्रह्मणः सर्वस्य वस्तुजातस्य अव्यतिरेकात् एकविज्ञानात् सर्वविज्ञानप्रतिज्ञाया अहानिर्भवति। यद्याकाशस्योत्पत्तिर्न स्यात्, तर्हि सा प्रतिज्ञा हीयेत। अतस्तत्सिद्धये आकाशस्योत्पत्तिरङ्गीकर्तव्या। किं च शब्देभ्यः 'सदेव सोम्येदमग्र आसीत्' 'ऐतदात्म्यमिदं सर्वम्' इत्यादिशब्देभ्यः कार्यकारणाभेदपरेभ्यः प्रतिज्ञासिद्धिरवगम्यते। न चैवमप्या-

काशस्योत्पत्तौ पूर्वोक्तविरोधस्तदवस्थ एवेति वाच्यम्। छान्दोग्यश्रुतिः तैत्तिरीयकश्रुत्यनुसारेण आकाशं वायुं च सृष्ट्वा 'तत्तेजोऽसृजत' इति विपरिणम्यत इति नानयोर्विरोधः। यत्तु सामग्र्यभावादिति, तन्न; श्रौतस्य ब्रह्मण एव वियत्सामग्रीत्वात् ॥

यच्च नित्यत्वानुमानाच्चेति, तच्चानुमानेनैव दूषयति—

यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥

तुशब्द आकाशोत्पत्त्यसंभवशङ्काव्यावृत्त्यर्थः। यतः यावद्विकारजातं विभागो दृश्यते, न त्वविकारे ब्रह्मणि; लोके घटादेर्विकारस्यैव विभक्तत्वदर्शनात्। यथा चायं प्रयोगः— आकाशादिः पराधीनसत्ताकः, स्वसमानसत्ताकविभागवत्त्वात् घटादिवत्— इति। तथा च परोक्ताविभक्तत्वहेतोरसिद्धिर्द्रष्टव्या। अमृतशब्दप्रयोगस्तु आपेक्षिकः। अत आकाशस्य ब्रह्मकार्यत्वं सिद्धम् ॥

उक्तन्यायमन्यत्रातिदिशति—

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

अतिदेशत्वान्न पृथक्संगत्यपेक्षा। अत्र वायोरुत्पत्तिरस्ति न वेति संदेहे, छान्दोग्ये वायोरुत्पत्तिर्न श्रूयते; तैत्तिरीयके च

२. मातरिश्वाधिकरणम् । श्रूयते । तथा च पूर्ववदनयोर्वाक्ययोर्विरोधप्राप्तौ तत्परिहाराय उत्पत्तिर्गौणी वाच्या। 'सैषानस्तमिता देवता यद्वायुः' इति लयप्रतिषेधाच्च न वायोरुत्पत्तिरिति पूर्वः पक्षः। सिद्धान्तस्तु— एतेन आकाशस्योत्पत्तिमत्त्वव्याख्यानेन वायुरप्याकाशावच्छिन्नब्रह्मजन्यत्वेन व्याख्यातः। लयप्रतिषेधस्त्वापेक्षिकः, अन्यथा प्रतिज्ञाहान्यादेः समानत्वादिति भावः ॥

पूर्वमसंभावितोत्पत्तिकयोरपि वियत्पवनयोरुत्पत्तिरस्तीति श्रुतिबलादुक्तम् । तद्वत् ब्रह्मान्तराद्ब्रह्मोत्पत्तिः श्रुतिबलादस्त्विति दृष्टान्तसंगत्येदमाह—

असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥

अत्र 'न चास्य कश्चिज्जनिता न चाधिपः' इत्यादीनां ब्रह्मणो नित्यत्वप्रतिपादकश्रुतीनाम् 'त्वं जातो भवसि विश्वतोमुखः' इति श्रुत्या विरोधोऽस्ति न वेति संदेहे, विरोध इति पूर्वः पक्षः। सिद्धान्तस्तु—

३. असंभवाधिकरणम् ।

सतः सदात्मकस्य ब्रह्मणः उत्पत्त्यसंभवः । कुतः, अनुपपत्तेः सत्सामान्यात् सत्सामान्यस्योत्पत्त्यनुपपत्तेः, विशेषस्यैव हि घटादेर्मृत्सामान्यजन्यत्वदर्शनात् । जन्मश्रुतिश्च औपाधिकविषया । अतो नित्यं ब्रह्मेत्यविरोधः ॥

पूर्वत्र सामान्यात् सामान्योत्पत्तिर्मा भूत्; इह सामान्यात् ब्रह्मणो विशेषस्य तेजस उत्पत्तिरस्त्विति प्रत्युदाहरणसंगत्येदमाह—

तेजोऽतस्तथा ह्याह ॥ १० ॥

'वायोरग्निः' इति तेजसो वायुजन्यत्वप्रतिपादकतैत्तिरीयकश्रुतेः 'तत्तेजोऽसृजत' इति तेजसो ब्रह्मजन्यत्वप्रतिपादकच्छान्दोग्यश्रुत्या विरोधोऽस्ति न वेति संदेहे, विरोधोऽस्तीति पूर्वः पक्षः। वायोरपि ब्रह्मकार्यत्वेन तेजः प्रत्युपादानत्वासंभवात् ब्रह्ममात्रजन्यत्वं तेजस इत्यविरोध इत्येकदेशिमतम्। परमसिद्धान्तस्तु—तेजः अतः अस्माद्वायोर्जायते; हि यतः, तथा वायुजन्यत्वम् 'वायोरग्निः' इति श्रुतिराह। न च तर्ह्येतस्य छान्दोग्यश्रुत्या विरोधस्तदवस्थ इति वाच्यम्। वायोर्ब्रह्मजन्यत्वेन वायुभावापन्नब्रह्मजन्यत्वस्य छान्दोग्यश्रुत्यर्थस्यैव 'वायोरग्निः' इति श्रुतेरप्यर्थत्वेनैकार्थत्वादविरोध इति ॥

४. तेजोऽधिकरणम्।

पूर्वं तेजसो वायुजन्यत्वं कथितम्। अथ अप्पृथिव्योः क्रमेण बुद्धिस्थत्वात् बुद्धिसंनिधिलक्षणसंगत्या तावदधिकरणद्वयमाह—

आपः ॥ ११ ॥

'अतस्तथा ह्याह' इत्यनुवर्तते । 'अग्नेरापः' इति श्रुतेः 'तदपोऽसृजत' इत्यपां ब्रह्मजन्यत्वश्रुत्या विरोधोऽस्ति न

५. अबधिकरणम् । वेति संदेहे, विरोधोऽस्तीति पूर्वः पक्षः । अपामग्निदाह्यत्वात् न तज्जन्यत्वमित्यविरोध इत्येकदेशिसिद्धान्तः । परमसिद्धान्तस्तु—– आपः अतस्तेजसो जायन्ते ; हि यस्मात्, तथा तेजोजन्यत्वम्, 'अग्नेरापः' इति श्रुतिराह । न हि त्रिवृत्कृतयोरिवात्रिवृत्कृतयोः अप्तेजसोः दाह्यदाहकभावः संभवति, विरोधाभावात् । अतः पूर्ववत्तेजोभावापन्नब्रह्मजन्यत्वेन अनयोरैकार्थ्यान्न विरोध इति ॥

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥

'अद्भ्यः पृथिवी' इति पृथिव्याः अब्जन्यत्वश्रुतेः 'ता अन्नमसृजन्त' इत्यन्नस्याब्जन्यत्वश्रुत्या विरोधोऽस्ति न वेति

६. पृथिव्यधिकाराधिकरणम् । संदेहे, अन्नशब्दस्य ओदनादौ प्रसिद्धत्वेन पृथिवीवाचकत्वाभावाद्विरोध इति पूर्वः पक्षः । सिद्धान्तस्तु— पृथिव्येवात्रान्नशब्देनोच्यते ; न ओदनादि । कुतः, अधिकाररूपशब्दान्तरेभ्यः 'तत्तेजोऽसृजत' इति महाभूतोत्पत्त्यधिकारात्, 'यत्कृष्णं तदन्नस्य' इति पृथिवीत्वज्ञापककृष्णरूपस्य श्रवणात्, 'अद्भ्यः पृथिवी' इति पृथिव्या एव तज्जन्यत्वप्रतिपादकशब्दान्तरस्य

सत्त्वाच्च । अतोऽनयोरैकार्थ्येनैकवाक्यत्वात् अविरोध इति सिद्धम् ॥

इत्थमुत्पत्तिक्रमेण महाभूतश्रुतीनामविरोधः प्रत्यपादि । अधुना तानि भूतान्याश्रित्यान्यद्विचार्यत इति आश्रयाश्रयिभावसंगत्येदमाह—

तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १३ ॥

अत्र ब्रह्मणः सर्वसृष्टिकर्तृत्वप्रतिपादकश्रुतेः भूतानां भौतिकस्रष्टृत्वप्रतिपादकश्रुत्या विरोधोऽस्ति न वेति संदेहे, ७. तदभिध्यानाधिकरणम् । 'आकाशाद्वायुः' इत्यादिना भूतानां स्वस्वकार्योत्पत्तौ स्वातन्त्र्यश्रवणात् तत्प्रतिपादकश्रुत्या विरोधोऽस्तीति पूर्वः पक्षः । सिद्धान्तस्तु— स एव परमेश्वरः तत्तत्कार्यगोचरेक्षणात्मकाभिध्यानादेवेक्षिता भूताधिष्ठाता तत्तत्कार्यं सृजति । कस्मात्, तल्लिङ्गात् तस्य परमात्मनः सर्वनियन्तृत्वरूपलिङ्गस्य 'यः पृथिव्यां तिष्ठन्' इत्यादिना श्रुतत्वात् । अतो भूतानां परमेश्वराधिष्ठितानामेव स्रष्टृत्वप्रतिपादकत्वेन अनयोरेकवाक्यत्वात् अविरोध इति ॥

इत्थं भूतानामुत्पत्तिक्रमे चिन्तिते लयक्रमो बुद्धिस्थः स्यात्, सोऽत्र प्रसङ्गाद्विचार्यत इति प्रसङ्गसंगत्येदमाह—

विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ १४ ॥

अस्य प्रासाङ्गिकविचारस्य अद्वैतब्रह्मध्यानं फलम् । अत्र किं भूतानां श्रुतोत्पत्तिक्रमेणैव लयक्रमः, उत सोपानपरम्परा-

८. विपर्यया-धिकरणम्। रूढस्य व्युत्क्रमेणावरोहणवत् व्युत्क्रमेणैव लयक्रम इति संदेहे, कल्प्यापेक्षया क्लृप्तस्य लघुत्वात् श्रुतोत्पत्तिक्रमेणैवेति पूर्वः पक्षः । सिद्धान्तस्तु— अत उत्पत्तिक्रमात् विपरीतक्रमेणैव लयक्रमः, स्वकारणे कार्याणां लयदर्शनात्। उपपद्यते च व्युत्क्रमेणैव लयक्रमः। इतरथा सति कार्ये कारणस्य नाशः स्यात्; तच्चानिष्टमित्यर्थः ॥

भूतोत्पत्तिलयक्रमविचारस्य यत्प्रयोजनम्, तदेव करणोत्पत्तिक्रमविचारस्येत्येकप्रयोजनकत्वसंगत्येदमाह—

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ १५ ॥

पूर्वोक्तक्रमः करणोत्पत्तिक्रमेण विरुध्यते न वेति संदेहे, विज्ञायते अनेन इति विज्ञानशब्देन बुद्धिः इन्द्रियाणि च गृह्यन्ते। संशयात्मकमन्तःकरणं मनः। तानी-

९. अन्तराविज्ञा-नाधिकरणम्। न्द्रियबुद्धिमनांसि भूतानामात्मनश्च अन्तरा अन्तराले तल्लिङ्गात् तस्याः सृष्टेर्गमकात् 'एतस्माज्जायते प्राणः' इत्यादिगमकवाक्यादनुक्रम्यन्ते। तथा च आत्मनः सकाशादिन्द्रियबुद्धिमनांसि, तेभ्यश्च भूतानि इत्यनेन क्रमेण विरुध्यत

इति चेत् इति पूर्वः पक्षः। सिद्धान्तस्तु— नाविशेषात् इन्द्रियबुद्धिमनसां भौतिकत्वेन भूतोत्पत्तिक्रमादिन्द्रियाद्युत्पत्तिक्रमस्य अविशेषात् येन क्रमेण भूतोत्पत्तिः, तेनैव क्रमेण भौतिकोत्पत्तिरित्यतो न विरुध्यत इत्यर्थः । 'एतस्माज्जायते' इत्यादिश्रुतिश्च सर्वेषामात्मनः सकाशादुत्पत्तिमात्रं ब्रूते, न क्रममिति भावः । तस्मान्न केनापि वाक्येन भूतसृष्टिवाक्यानां विरोध इति सिद्धम् ॥

इत्थं पूर्वाधिकरणेषु तत्पदार्थब्रह्मसिद्ध्यै भूतकरणोत्पत्तिश्रुतिविरोधो निरस्तः । संप्रति आपादसमाप्तेस्त्वंपदार्थशुद्ध्यै जीवविषयश्रुतिविरोधो निरस्यते । तत्र यथा पूर्वं करणोत्पत्तिश्रुत्या भूतश्रुतेरविरोध इत्युक्तम्, न तथेह जीवोत्पत्तिशास्त्रेणाविरोधः; तदुत्पत्तौ भूतोत्पत्तिक्रमभङ्गस्यावश्यकत्वादिति प्रत्युदाहरणावान्तरसंगत्येदमाह—

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ १६ ॥

अत्र 'न जीवो म्रियते' इति जीवनित्यत्वशास्त्रस्य जीवोत्पत्तिनाशनिमित्तकजातेष्ट्यादिशास्त्रेण विरोधोऽस्ति न वेति संदेहे, देवदत्तो जातो मृतश्चेति लौकिकव्यपदेशानुगृहीतजातकर्मादिशास्त्रेण विरोधोऽस्तीति पूर्वः पक्षः । सिद्धान्तस्तु—

योऽयं लौकिकः तद्व्यपदेशः तयोः जन्ममरणयोः व्यपदेशः, स
१०. चराचर- चराचरव्यपाश्रयः स्थावरजङ्गमदेहविषयो
व्यपाश्रया- मुख्यः ; जीवे तु भाक्तो गौणः स्यात्। कुतः,
धिकरणम । जन्ममरणव्यपदेशस्य तद्भावभावित्वात्
देहोत्पत्तिनाशान्वयव्यतिरेकानुविधायित्वादित्यर्थः । देहप्रादुर्भावाद्यपेक्षयैव जातकर्मादिविधानमिति न तेन शास्त्रेण जीवनित्यत्वशास्त्रस्य विरोध इति भावः ॥

इत्थं देहोत्पत्तिनाशयोः सतोः जीवस्य जन्मनाशौ मा भूताम् ; कल्पाद्यन्तयोः जीवस्य जन्मनाशौ किं न स्याताम् ——इति प्रत्युदाहरणसंगत्येदमाह——

नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥

अत्राविकृतस्यैव ब्रह्मणो जीवभावेन प्रवेशवाक्यस्य जीवस्य परस्मादात्मनः 'सर्व एत आत्मनो व्युच्चरन्ति' इत्यु-
११. आत्माधि- त्पत्तिवादिवाक्येन विरोधोऽस्ति न वेति सं-
करणम् । देहे, अस्तीति पूर्वः पक्षः । सिद्धान्तस्तु——
आत्मा जीवः नोत्पद्यते । कुतः, अश्रुतेः उत्पत्तिप्रकरणेषु जीवोत्पत्तेरश्रुतेः, ताभ्यः 'स वा एष महानज आत्मा....' 'अजो नित्यः....' इत्यादिश्रुतिभ्यो जीवस्य नित्यत्वावगमाच्चेत्यर्थः । औपाधिकजन्मालम्बनं जीवजनिवाक्यमिति न तेन

प्रवेशवाक्यस्य विरोध इति भावः ॥

पूर्वसिद्धजीवानुत्पत्तिमुपजीव्य उत्तरसिद्धान्तोत्थानात् हेतु-हेतुमद्भावसंगत्येदमाह—

ज्ञोऽत एव ॥ १८ ॥

अत्र 'आत्मैवास्य ज्योतिः' इत्यादिस्वयंज्योतिष्ट्वश्रुतेः 'पश्यंश्चक्षुः' इत्याद्यागन्तुकज्ञानवत्त्वश्रुत्या विरोधोऽस्ति न वेति संदेहे, अस्तीति पूर्वः पक्षः । सिद्धान्तस्तु— जीवो ज्ञः स्वयंज्योतिःस्वरूपः । कुतः, अत एव अनुत्पत्तिमत्त्वादेवेत्यर्थः । 'पश्यंश्चक्षुः' इत्यादिश्रुतिः आगन्तुकवृत्त्यभिप्रायेति न तया स्वयंज्योतिष्ट्वश्रुतेर्विरोध इति भावः ॥

१२. ज्ञाधिकरणम् ।

इत्थं जीवस्य ब्रह्माभेदयोग्यत्वाय नित्यत्वं स्वप्रकाशत्वं चाभिधाय, अधुना स्वप्रकाशत्वादिवत् बहिष्ठमपरिच्छिन्नत्वम-णुत्वनिरासेन साधयतीत्यान्तरबहिर्भावसंगत्येदमाह—

उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥

अत्र 'सर्वव्यापी' इति सर्वगतत्वश्रुतेः 'एषोऽणुरात्मा' इत्यणुत्वश्रुत्या विरोधोऽस्ति न वेति संदेहे, अस्तीति पूर्वः

१३. उत्क्रान्ति-गत्यधि-करणम् । पक्षः । कस्मात्, जीवस्य 'अस्माच्छरीरादुत्क्रामति' 'चन्द्रमसमेव ते सर्वे गच्छन्ति' 'तस्माल्लोकात्पुनरेति' इत्युत्क्रान्तिगत्यागतीनां श्रवणात् अणुर्जीवः । अतोऽस्ति विरोध इत्यर्थः ॥

अपि च—

स्वात्मना चोत्तरयोः ॥ २० ॥

यद्यप्युत्क्रान्तिर्देहस्वाम्यनिवृत्तिरूपा विभुत्वे संभवति, तथापि उत्तरयोः गत्यागत्योः स्वात्मना जीवात्मना संबद्धत्वात्ते आत्मनोऽणुत्वे संभवत इत्यर्थः ॥

तर्हि सर्वगतत्वश्रुतिविरोध इत्याशङ्क्य समाधत्ते—

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २१ ॥

नायं जीवोऽणुः अतच्छ्रुतेः अनणुत्वश्रुतेः 'सर्वव्यापी' इत्यादिना सर्वगतत्वश्रुतेरिति चेत्, न; इतराधिकारात् इतरस्य ब्रह्मणः सर्वेषु वेदान्तेषु प्रधानतया ज्ञेयत्वेन प्रकृतत्वात् तस्यैव सर्वगतत्वश्रुतिः, न जीवस्येत्यर्थः ॥

जीवस्याप्यणुत्वश्रुतिरस्तीत्याह—

स्वशब्दोन्मानाभ्यां च ॥ २२ ॥

'एषोऽणुरात्मा' इति स्वस्याणुत्वस्य वाचकः एतच्छब्दः ;

'वालाग्रशतभागस्य' इत्यादि उन्मानम्; उद्धृत्य सर्वेभ्यः स्थूलपरिमाणेभ्यः मानम् उन्मानम्, अत्यन्तापकृष्टपरिमाणमिति यावत्; ताभ्यां जीवोऽणुरेवेत्यर्थः ॥

ननु आत्मनोऽणुत्वे जाह्नवीतोयनिमग्नस्य देहव्यापिशैत्योपलब्धिविरोध इत्यत आह—

अविरोधश्चन्दनवत् ॥ २३ ॥

यथा चन्दनबिन्दुः शरीरैकदेशस्थः शरीरव्यापि सुखं जनयति, तथा जीवोऽपि देहव्यापिनं शैत्याद्युपलम्भं करिष्यतीत्यविरोध इत्यर्थः ॥

दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमाशङ्क्य परिहरति—

अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २४ ॥

नात्र चन्दनदृष्टान्तः, अवस्थितिवैषम्यात्; प्रत्यक्षेण चन्दनबिन्दोरेकदेशेऽवस्थितिः ज्ञायते, जीवस्य तु नैवमित्यतुल्यत्वादिति चेत्, न। कुतः, अभ्युपगमात् जीवाणुत्वस्य । तत् कस्मात्, हृदि हि; यस्मात् अल्पपरिमाणे हृदि जीवः पठ्यते 'हृद्यन्तर्ज्योतिः' इत्यादौ, तस्मात् जीवस्याणुत्वमभ्युपगम्यत इति न दृष्टान्तवैषम्यमित्यर्थः ॥

ननु सावयवतया चन्दनबिन्दोः सर्वशरीरव्यापकत्वम्, न तथा जीवस्याणोः सावयवत्वम्; येन शरीरव्यापित्वं स्यादित्यपरितुष्टया पक्षान्तरमाह—

गुणाद्वा लोकवत् ॥ २५ ॥

आत्मनोऽणुत्वेऽपि तन्निष्ठज्ञानगुणस्य व्यापकत्वाङ्गीकारात् व्यापकगुणाद्व्यापिकार्यं भविष्यति। लोकवत् यथा लोके गृहनिष्ठप्रदीपस्याल्पत्वेऽपि प्रभात्मकगुणवशात् गृहव्यापिप्रकाशादिकार्यं संभवति, तद्वदित्यर्थः ॥

ननु गुणिव्यतिरेकेण गुणस्य वृत्तेरन्यत्रादर्शनात्, तत्कथमित्याशङ्क्याह—

व्यतिरेको गन्धवत् ॥ २६ ॥

यथा गुणस्यापि सतो गन्धस्य गुणिव्यतिरेकेण वृत्तिः, पुष्पपेटिकातो दूरे पर्यटतः पुंसो गन्धोपलम्भदर्शनात्; तद्वत् गुणिव्यतिरेको ज्ञानस्येत्यर्थः ॥

अधुना ज्ञानेनैवात्मनो देहव्याप्तिरित्यत्र श्रुतिमाह—

तथा च दर्शयति ॥ २७ ॥

हृदयायतनत्वमणुपरिमाणत्वं चात्मनोऽभिधाय, तस्यैव

'आ लोमभ्य आ नखाग्रेभ्यः' इति श्रुतिः ज्ञानेन समस्तशरीर-व्यापित्वं दर्शयतीत्यर्थः ॥

तत्रैव हेत्वन्तरमाह—

पृथगुपदेशात् ॥ २८ ॥

'प्रज्ञया शरीरं समारुह्य' इत्यात्मज्ञानयोः कर्तृकरण-भावेन पृथगुपदेशात् गुणद्वारा अस्य शरीरव्यापित्वं गम्यते । तथा च व्यापकं ज्ञानम्, जीवस्तु अणुः इत्यणुत्वश्रुत्या सर्व-तत्त्वश्रुतेर्विरोध इति पूर्वः पक्षः ॥

सिद्धान्तस्तु—

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥

तुः पूर्वपक्षव्यावर्तकः । नैवाणुर्जीवः, सर्वगतस्यैव ब्रह्मणो जीवभावेन प्रवेशश्रवणात् तादात्म्योपदेशाच्च । कथं तर्हि जीवे अणुत्वव्यपदेशः, तद्गुणसारत्वात् तस्याः बुद्धेः गुणाः अणुत्वो-त्क्रान्तिगत्यागतिसुखदुःखादयः ते गुणाः सारं प्रधानं यस्य जीवस्य स तथा तस्य भावः तत्त्वं तस्मात्, तद्व्यपदेशः अणुत्वादिव्यपदेशः, न स्वाभाविकः । प्राज्ञवत् यथा प्राज्ञस्य परमात्मनः सगुणोपासनेषु दहराद्युपाधिवशात् अणुत्वादिकं व्यपदिश्यते, तद्वदित्यर्थः ॥

ननु आत्मन्यणुत्वादिसंसारस्य बुद्ध्युपाधिकत्वे कदाचित् बुद्ध्या वियोगे संसारो न स्यादित्यत आह—

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥

बुद्धिसंयोगस्य यावत् आत्मनः सम्यग्दर्शनेन संसारो न निवर्तते, तावद्भावित्वान्नोक्तदोषः । तत् कस्मात्, तद्दर्शनात् देहवियोगेऽपि तस्य बुद्धिसंयोगस्य 'स समानः सन्नुभौ लोकावनुसंचरति' इत्यादिश्रुतौ दर्शनादित्यर्थः ॥

ननु सुषुप्तौ ब्रह्मसंपत्तिकार्यनाशयोरभ्युपगमात् न बुद्धिसंयोगस्य यावदात्मभावित्वमित्यत आह—

पुंस्त्वादिवत्तस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥

यथा बाल्ये पुंस्त्वादेः सत एव यौवनेऽभिव्यक्तिः, तद्वत् तस्य बुद्धिसंयोगादेः सुषुप्तौ सूक्ष्मात्मना सत एव अभिव्यक्तिसंभवात् यावदात्मभावित्वं न विरुध्यत इत्यर्थः ॥

ननु बुद्ध्यपरपर्यायान्तःकरणे किं प्रमाणम्, यत्प्रयुक्तः संसारः स्यादित्यत आह—

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतर-
नियमो वान्यथा ॥ ३२ ॥

इदमन्तःकरणमवश्यमभ्युपगन्तव्यम् । अन्यथा अनभ्युपगमे सर्वेषामिन्द्रियाणां स्वस्वविषयसंनिधानदशायां नित्योपलब्धिप्रसङ्गः युगपत्सर्वविषयोपलब्धिप्रसङ्गः, मनोव्यतिरिक्तज्ञानसामग्र्याः सत्त्वात्; यदि सत्यामपि सामग्र्यां ज्ञानाभावः, तदा नित्यानुपलब्धिप्रसङ्गः कस्याप्युपलब्धिर्न स्यात् । अथवा एकस्योपलब्धिमितरेषामनुपलब्धिमिच्छता ज्ञानसामग्रीमध्ये अन्यतरस्य आत्मनः इन्द्रियस्य वा नियमः शक्तिप्रतिबन्धोऽङ्गीकर्तव्यः । स न संभवति, निर्धर्मक आत्मनि शक्तेरभावात् । नापीन्द्रियस्य, शक्तेरान्तरत्वेन तद्धर्मत्वायोगात् । तस्माद्व्यासङ्गस्थले इच्छैव नियामिका । तस्याश्च मनोधर्मत्वेन तदन्यथानुपपत्त्या 'कामः संकल्पः' इत्यादिश्रुत्या च सिद्धमन्तःकरणम्, तत्प्रयुक्तश्च आत्मन्यणुत्वादिसंसार इति । तस्मादौपाधिकाणुत्वश्रुत्या न वास्तवसर्वगतत्वश्रुतेर्विरोध इति सिद्धम् ॥

इत्थं च अणुत्वं पराणुद्य सर्वगतत्वं स्वयंज्योतिष्ट्वादिवत् बहिष्ठं प्रतिष्ठापितम् । अधुना ततो बहिष्ठं कर्तृत्वं बुद्धिकर्तृत्वव्यासेधेन साधयतीत्यान्तरबहिर्भावसंगत्येदमाह—

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

अत्र तद्गुणसारत्वस्यैव प्रपञ्चनात् अत्र मिथः श्रुत्योः विरोधपरिहारौ न विचारयितव्यौ ; किं तु आत्मनः कर्तृ-

१४. कर्त्रधिकरणम्। त्वाकर्तृत्वे। तत्र किं बुद्धिः कर्त्री, उत जीव इति संदेहे, परिणामित्वात् बुद्धिरिति पूर्वः पक्षः। सिद्धान्तस्तु—आत्मैव कर्ता न बुद्धिः। कुतः, कर्तुरपेक्षितोपायबोधकविधिशास्त्रस्य अर्थवत्त्वात्। यदि बुद्धिः कर्त्री, फलभोक्ता चात्मेत्युच्येत, तर्हि तादृशविधिशास्त्रमनर्थकमापद्येत। अतो न केवलबुद्धेः कर्तृत्वम्, अपि तु आत्मन इति ॥

किं च—

विहारोपदेशात् ॥ ३४ ॥

'स्वे शरीरे यथाकामं परिवर्तते' इति जीवप्रकरणे स्वप्नावस्थायां विहारस्य संचरणस्य उपदेशात्, अकर्तुः संचरणायोगात् आत्मनः कर्तृत्वमित्यर्थः ॥

किं च—

उपादानात् ॥ ३५ ॥

'प्राणानां विज्ञानेन विज्ञानमादाय' इत्यात्मनो ग्रहणशक्त्युपादानश्रवणात्, अकर्तुरुपादानायोगात् आत्मनः कर्तृत्वमित्यर्थः ॥

अपि च—

व्यपदेशाच्च क्रियायां न चेन्निर्देश-विपर्ययः ॥ ३६ ॥

'विज्ञानं यज्ञं तनुते' इत्यादौ लौकिकवैदिकक्रियायां विज्ञानशब्दवाच्यस्यात्मनः कर्तृत्वव्यपदेशात् यदि विज्ञानशब्दो बुद्धिपरः जीवपरो न चेत्, तर्हि निर्देशविपर्ययः स्यात्; बुद्धेः करणत्वेन विज्ञानमिति कर्तृत्वनिर्देशस्य विज्ञानेनेति करणत्वविपर्ययः स्यादित्यर्थः ॥

ननु स्वतन्त्रस्यात्मनः कर्तृत्वेऽनिष्टं न कुर्यात् इष्टमेव कुर्यादित्यत आह—

उपलब्धिवदनियमः ॥ ३७ ॥

यद्वदुपलब्धौ स्वतन्त्रोऽप्यात्मा इष्टमनिष्टं चोपलभते, तद्वत् इष्टमनिष्टं च संपादयतीति अनियम इत्यर्थः ॥

इतश्चात्मन एव कर्तृत्वं न बुद्धेरित्याह—

शक्तिविपर्ययात् ॥ ३८ ॥

बुद्धेः कर्तृत्वे करणशक्तिविपर्ययात् करणशक्तिर्हीयेतेति यावत् ॥

ज्ञानसाधनविध्यन्यथानुपपत्त्यापि आत्मनः कर्तृत्वं स्वीकार्यमित्याह—

समाध्यभावाच्च ॥ ३९ ॥

आत्मनोऽकर्तृत्वे 'आत्मा वा अरे द्रष्टव्यः' इत्यादौ विहितस्य ब्रह्मसाक्षात्कारसाधनस्य समाधेरभावप्रसङ्गात् आत्मनः कर्तृत्वसिद्धिः ॥

इत्थं सर्वगतत्वाद्बहिष्ठं कर्तृत्वं प्रतिष्ठापितम् । अधुना तत् अध्यस्तमात्मनीति प्रतिपादयतीत्युपजीव्योपजीवकभावसंगत्येदमाह—

यथा च तक्षोभयथा ॥ ४० ॥

अत्र 'असङ्गो ह्ययं पुरुषः' इत्यसङ्गत्वश्रुतेः कर्तुरिष्टसाधनबोधकविधिवाक्येन विरोधोऽस्ति न वेति संदेहे, पूर्वो-

१५. तक्षाधिकरणम् ।

क्तशास्त्रार्थवत्त्वादिहेतुभिः कर्तृत्वस्य स्वाभाविकतया तत्प्रतिपादकविधिशास्त्रेण विरोधोऽस्तीति पूर्वः पक्षः । सिद्धान्तस्तु— न स्वाभाविकमात्मनः कर्तृत्वम्, अपि तु औपाधिकम् । यथा लोके उभयथा तक्षा वास्यादीनि करणान्यपेक्ष्य कर्ता सन् दुःखी भवति, अनपेक्ष्य तु स्वरूपेणाकर्ता सुखी भवति, तथात्मापि बुद्ध्यादिकरणान्यपेक्ष्य कर्ता संसरति, अनपेक्ष्य तु स्वभावतोऽकर्ता

परमानन्दघन एव भवति । विधिशास्त्रं तु कर्तृत्वं विना अनुपपन्नं तत्साधयति, न तु तस्य स्वाभाविकत्वमपीति न तेनासङ्गत्वश्रुतेर्विरोध इति सिद्धम् ॥

औपाधिकं कर्तृत्वमुपजीव्य तत् ईश्वरायत्तमिति साधयितुं पूर्वोक्तसंगत्यैवेदमाह—

परात्तु तच्छ्रुतेः ॥ ४१ ॥

१६. परायत्ताधिकरणम् ।

अत्र च 'एष ह्येव साधु कर्म कारयति' इत्यादिश्रुतेः विध्यादिशास्त्रेण विरोधोऽस्ति न वेति संदेहे, रागद्वेषादिवशात् स्वत एवात्मनः कर्तृत्वसंभवात् तत्प्रतिपादकविध्यादिशास्त्रेण विरोधोऽस्तीति पूर्वः पक्षः । सिद्धान्तस्तु— सौत्रतुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । न स्वतो जीवस्य कर्तृत्वादिसिद्धिः ; किं तु परात् परस्मादीश्वरात् कर्माध्यक्षादविद्यातिमिरान्धस्य कर्तृत्वादिसंसारसिद्धिः, तदनुग्रहे तु विज्ञानेन मोक्षसिद्धिर्भविष्यति । कुतः, तच्छ्रुतेः 'एष ह्येव साधु कर्म कारयति' इत्यादिकायाः श्रुतेः तस्येश्वरस्य हेतुकर्तृत्वमवसीयत इत्यर्थः ॥

ननु ईश्वरस्य कारयितृत्वे वैषम्यनैर्घृण्ये स्यातामित्यत आह—

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धा-वैयर्थ्यादिभ्यः ॥ ४२ ॥

तुरुक्तशङ्कानिरासार्थः। जीवेन कृतो यः प्रयत्नो धर्माधर्मलक्षणः तदपेक्ष एवेश्वरोऽन्यस्मिन्नपि जन्मनि धर्मादिकं कारयति तदपेक्षश्च सुखादिफलं प्रयच्छतीति न वैषम्यनैर्घृण्ये प्रसज्येते । अनादित्वात्संसारस्य पूर्वजन्मकृतधर्माद्यपेक्षा युक्तैव। ननु कस्मात्तदपेक्षत्वमत आह— विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ईश्वरस्य कर्मापेक्षत्वे 'ज्योतिष्टोमेन यजेत' 'ब्राह्मणो न हन्तव्यः' इति द्वयोर्विहितप्रतिषिद्धयोः अवैयर्थ्यं भवति, अन्यथा विधिनिषेधशास्त्रमनर्थकमेव स्यात् । एवं च ईश्वराधीनकर्तृत्वप्रतिपादकविध्यादिशास्त्रेण 'एष ह्येव साधु कर्म....' इत्यादिशास्त्रस्य न विरोध इति सिद्धम् ॥

इत्थं नित्यत्वं स्वप्रकाशत्वं व्यापित्वमकर्तृत्वं च आत्मनोऽभिधाय, तदनन्तरं तस्य ब्रह्माभेदयोग्यस्य ब्रह्मैक्यं साधयतीति हेतुहेतुमद्भावसंगत्येदमाह—

अंशो नानाव्यपदेशादन्यथा चापि दाश-कितवादित्वमधीयत एके ॥ ४३ ॥

अत्र 'तत्त्वमसि' इत्याद्यभेदश्रुतिजातस्य 'य आत्मनि

तिष्ठन्' इत्यादिभेदश्रुतिजातेन विरोधोऽस्ति न वेति संदेहे,

१७. अंशाधिकरणम् । जीवेश्वरयोः पूर्वोक्तोपकार्योपकारकभावस्य स्वामिभृत्यवत् भेदाधीनसंबन्धसापेक्षत्वात् तदभेदश्रुतिजातेन विरोधोऽस्तीति पूर्वः पक्षः । सिद्धान्तस्तु—जीवः ईश्वरस्य अंश इव अंशः, न तु स्वाभाविकोंऽशः ; तस्य 'निष्कलम्' इत्यादिना निरंशत्वश्रवणात् । अतः कल्पितांशो जीवः । कुतः पुनर्जीवेश्वरयोरंशांशिभावः, 'य आत्मनि तिष्ठन्' इत्यादिना तयोर्नानाव्यपदेशात् नानात्वस्य च व्यपदेशात्, अन्यथा चापि अनानात्वस्य चापि व्यपदेशात् । तथा हि एके शाखिनः आथर्वणिकाः 'ब्रह्म दाशा ब्रह्म दासा ब्रह्मैवेमे कितवाः' इति दाशकितवादित्वमधीयते । दाशाः कैवर्ताः, दासाः भृत्याः, कितवाः द्यूतकृतः, तद्भावमामनन्ति इत्यतोऽनानात्वस्याभेदस्य च व्यपदेशः । तत्र भेदवादिश्रुतिजातस्य प्रत्यक्षसिद्धभेदानुवादेनाभेदपरत्वात् कल्पितभेदवानंशो जीव इति ॥

किं च—

मन्त्रवर्णाच्च ॥ ४४ ॥

'पादोऽस्य विश्वा भूतानि' इति मन्त्रवर्णात् परमेश्वरस्याविद्याकल्पितपादोंऽशो भूतशब्दवाच्यो जीव इति गम्यते ॥

किं च—

अपि च स्मर्यते ॥ ४५ ॥

'ममैवांशो जीवलोके जीवभूतः सनातनः' इति भगवद्गीतासु च ईश्वरस्याविद्याकल्पितांशो जीव इति स्मर्यते ॥

ननु जीवस्येश्वरांशत्वे तद्दुःखेनेश्वरस्य दुःखित्वं स्यादित्यत आह—

प्रकाशादिवन्नैवं परः ॥ ४६ ॥

यथा जीवोऽविद्यावेशवशाद्देहाद्यात्मभावमिव गतः तत्कृतेन दुःखेन दुःख्यहमित्यभिमन्यते, नैवं परः ईश्वरः । प्रकाशादिवत् यथा सौरः चान्द्रमसो वा प्रकाशो नभो व्याप्य वर्तमानो वक्रकाष्ठाद्युपाधिकृतवक्रभावमिवापन्नोऽपि न वस्तुतो वक्रभावमापद्यते, तद्वत् । जीवोऽपि न परमार्थतो दुःखित्वमभिमन्यत इत्यर्थः ॥

स्मरन्ति च ॥ ४७ ॥

'तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः । न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा ॥' इत्यादिभिः व्यासादय ईश्वरस्य सांसारिकदुःखासंस्पर्शित्वं स्मरन्तीत्यर्थः ॥

ननु 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिना आत्मभेदमात्रनिषेधात्, कथं मित्रं सेव्यं शत्रवः परिहर्तव्या इत्याद्यनुज्ञापरि-

हारौ स्यातामित्यत आह—

अनुज्ञापरिहारौ देहसंबन्धा-
ज्ज्योतिरादिवत् ॥ ४८ ॥

उक्तावनुज्ञापरिहारौ सर्वत्रात्मनोऽखण्डैकरसत्वेऽपि देह-तादात्म्यसंबन्धात्संगच्छेते । ज्योतिरादिवत् यथा ज्योतिषोऽग्नेरेकत्वेऽपि श्मशानसंबन्ध्यग्निः परिहार्यो नेतरः, तद्वदात्मापीत्यर्थः ॥

ननु एवमपि स्वाम्येकत्वात् कर्मफलसंकरो दुर्वार इत्यत आह—

असंततेश्चाव्यतिकरः ॥ ४९ ॥

कर्मफलसंबन्धस्याव्यतिकरः असंकरः । कुतः, असंततेः उपाधिपरिछिन्नस्यात्मनः सर्वैः शरीरैरसंबन्धादित्यर्थः ॥

किं च—

आभास एव च ॥ ५० ॥

आभास एवैष जीवः परस्य आत्मनः सूर्यप्रतिबिम्बवत् । ततश्च यथैकस्मिन् प्रतिबिम्बे कम्पमाने प्रतिबिम्बान्तरं न कम्पते, तथा एकस्मिन् जीवे कर्मफलसंबन्धिनि न जीवान्तरस्य तत्संबन्ध इति संकरः सुपरिहरः । स्वाभाविकात्मनानात्ववादे तु कर्मफलसंकरो दुर्वार इति दिक् ॥

ननु नानात्ववादे अदृष्टनियमात् कर्मफलनियम इति चेत् तत्राह—

अदृष्टानियमात् ॥ ५१ ॥

सांख्यमते प्रधानसमवेतमदृष्टम्, तस्य सर्वात्मसाधारण्यात् स दोषस्तदवस्थः; न्यायमतेऽप्यदृष्टहेतुमनःसंयोगस्य सर्वात्माविशेषात् इदमस्यादृष्टम् इदमस्य नेत्येवंरूपस्य अदृष्टनियमस्याभावात् फलानियम इत्यर्थः ॥

ननु अहमिदं फलं प्राप्नवानीत्याद्यभिसंध्यादयः प्रत्यात्मनियताः सन्तः स्वप्रयोज्यादृष्टनियमहेतवो भविष्यन्तीत्यत आह—

अभिसंध्यादिष्वपि चैवम् ॥ ५२ ॥

अभिसंध्यादिष्वपि साधारणमनःसंयोगसाध्येषु अदृष्टनियमहेतुत्वाभाव इत्युक्तदोषस्तदवस्थः ॥

प्रदेशादिति चेन्नान्तर्भावात् ॥ ५३ ॥

ननु आत्मनां विभुत्वेऽपि स्वस्वशरीरावच्छिन्न एवात्मप्रदेशे मनःसंयोग इति भवत्यभिसंध्यादिनियम इति चेत्, न । सर्वात्मनां सर्वशरीरेष्वन्तर्भावात् अस्यात्मन इदं शरीरमिति नियमाभावात् प्रदेशकल्पना न संभवतीत्युक्तसंकर-

स्तदवस्थ एव । अस्मत्पक्षे जीवभेदस्याविद्यकत्वेन न संकरः । तथा च अविद्यानिमित्तजीवभावव्युदासेन ब्रह्मभावमेव जीवस्य प्रतिपादयतः तत्त्वमस्यादिश्रुतिजातस्य आविद्यकभेदानुवादिश्रुतिजातेन न विरोध इति सिद्धम् । तदेवं भूतभोक्तृविषयश्रुतीनां मिथो विरोधव्यासेधेन प्रामाण्याद्ब्रह्मणि समन्वयः सिद्ध इत्यतिशोभनम् ॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्वप्रकाशिकायां द्वितीयाध्यायस्य
तृतीयः पादः ॥

ॐ

चतुर्थः पादः ॥

इत्थं पूर्वपादे भूतभोक्तृश्रुतिबिरोधं विधूय, अधुना भौतिकेन्द्रियादिश्रुतिविरोधं परिहर्तुं पादान्तरमवतारयन्, पूर्वाधिकरणे कर्तृस्वरूपावधारणेन बुद्धिस्थानां तदुपकरणानामिन्द्रियाणाम् उत्पत्तिं साधयतीति बुद्धिस्थसंगत्येदमाह—

तथा प्राणाः ॥ १ ॥

१. प्राणोत्पत्त्यधिकरणम्।

अत्र च 'एतस्माज्जायते प्राणो मनः....' इत्यादीन्द्रियोत्पत्तिश्रुतेः 'ऋषयो वाव तेऽग्रेऽसदासीत्' इत्यादिप्रागुत्पत्तेरिन्द्रियसद्भावश्रुत्या विरोधोऽस्ति न वेति संदेहे, विरोधोऽस्तीति पूर्वः पक्षः । सिद्धान्तस्तु— तथा प्राणाः तथा 'एतस्माज्जायते....' इत्युदाहृतवाक्यस्थाकाशादिवत् प्राणा इन्द्रियाणि जायन्ते, उत्पत्तिश्रुतेरविशेषादित्यर्थः ॥

ननु सृष्टेः प्राक् इन्द्रियसद्भावश्रवणात् उत्पत्तिश्रुतिर्गौणी इति चेत् तत्राह—

गौण्यसंभवात् ॥ २ ॥

गौण्या उत्पत्तिश्रुतेरसंभवो गौण्यसंभवः तस्मात्, अन्यथा एकविज्ञानप्रतिज्ञा हीयेतेत्यर्थः । सद्भावश्रुतिस्तु हिरण्यगर्भात्मकावान्तरप्रकृतिविषया इति न तया उत्पत्तिश्रुतेर्विरोध इति भावः ॥

इन्द्रियोत्पत्तिर्मुख्या इत्यत्र हेत्वन्तरमाह––

तत्प्राक्श्रुतेश्च ॥ ३ ॥

तत् तत्र 'एतस्माज्जायते' इत्यादिवाक्ये जन्मवाचिपदस्य खवाय्वादिषु मुख्यस्य तदपेक्षया प्राचीनेषु प्राणादिषु श्रुतेः श्रवणादित्यर्थः ॥

ननु 'तत्तेजोऽसृजत' इति भूतमात्रश्रवणात् तत्कथमित्याशङ्क्याह––

तत्पूर्वकत्वाद्वाचः ॥ ४ ॥

यद्यपि 'तत्तेजोऽसृजत' इति भूतमात्रोत्पत्तिः पठ्यते, तथापि 'अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्' इति मनःप्राणसहिताया वाचः ब्रह्मप्रकृतिकतेजोबन्नपूर्वकत्वाभिधानात् अस्त्युत्पत्तिश्रुतिरित्यतो न विरोध इति सिद्धम् ॥

इत्थमिन्द्रियाणामुत्पत्तिं प्रसाध्य तेभ्यो जीवस्य विवेकार्थं तदाश्रितसंख्यां निर्णेतुकामः आश्रयाश्रयिभावसंगत्येदमाह—

सप्त गतेर्विशेषितत्वाच्च ॥ ५ ॥

'सप्त प्राणाः प्रभवन्ति तस्मात्' इति इन्द्रियाणि सप्त संकीर्त्यन्ते; क्वचिदष्टौ; क्वचिन्नव; क्वचिद्दश; क्वचिदेकादश; इत्येवं

२. सप्तगत्यधिकरणम्। सप्तत्वाष्टत्वादिसंख्याश्रुतीनां परस्परविरोधोऽस्ति न वेति संदेहे, अस्तीति पूर्वपक्षे एकदेशिसिद्धान्तः— सप्तेन्द्रियाणि। कुतः, गतेः श्रुत्या सप्तत्वावगतेः 'सप्त वै शीर्षण्याः प्राणाः' इति शीर्षण्यत्वेन विशेषितत्वाच्च। अष्टत्वादिसंख्याश्रवणं तु एकस्यैवान्तःकरणस्य वृत्तिभेदाभिप्रायमिति न श्रुतीनां विरोध इति॥

तदेकदेशिमतं दूषयति—

हस्तादयस्तु स्थितेऽतो नैवम् ॥ ६ ॥

तुरेकदेशिमतनिरासार्थः। 'हस्तौ वै ग्रहः' इत्यादिना हस्तादयो व्यतिरिक्ताः प्राणाः श्रूयन्ते। सप्तत्वसंख्यायामसंभावितान्तर्भावे सप्तत्वातिरेके स्थिते, सप्तत्वसंख्या एकादशत्वसंख्यायामन्तर्भावयितुं शक्यते। अतो नैवं मन्तव्यम्—'सप्तैव प्राणाः' इति। एवं सूत्रद्वयं योजनीयम्— सप्तैवेन्द्रियाणि,

‘प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति’ इति प्राणादि सप्तानामेव गतेः श्रवणात् । ननु सर्वशब्दश्रवणात् कथं सप्तानामेवेति तत्राह— विशेषितत्वाच्च ‘स यत्रैष चाक्षुषः पुरुषः....’ इत्यादिना चक्षुरादिसप्तानामेवोत्क्रान्तौ विशेषितत्वात् । अतः सर्वशब्दस्य प्रकृतापेक्षत्वात् सप्तैवोत्क्रामन्ति इति प्राप्ते, उच्यते— हस्तादयोऽप्यपरे प्राणा उत्क्रामन्ति ‘दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्ति अथ रोदयन्ति’ इत्येकादशानां प्राणानामुत्क्रान्तिश्रवणात् सर्वेषामेवोत्क्रमणे स्थिते सति, नैवं यत्सप्तैवेति । तस्मान्न श्रुतीनां मिथो विरोध इति सिद्धम् ॥

ननु इन्द्रियाणामुत्क्रान्तिर्न संभवति, तेषामपरिच्छिन्नाहंकारजन्यत्वेन विभुत्वादित्याक्षेपसंगत्येदमाह—

अणवश्च ॥ ७ ॥

अत्रोत्क्रान्त्यादिश्रुतेः ‘प्राणाः सर्वेऽनन्ताः’ इति इन्द्रियविभुत्वश्रुत्या विरोधोऽस्ति न वेति संदेहे, विरोधोऽस्तीति पूर्वः

३. प्राणाणुत्वाधिकरणम् ।

पक्षः । सिद्धान्तस्तु— इमे प्राणा अणवः परिच्छिन्नाः, इन्द्रियाग्राह्यत्वेन सूक्ष्मत्वात् । विभुत्वश्रुतेरुपासनापरत्वात् न तयोत्क्रान्त्यादिश्रुतेर्विरोध इति सिद्धम् ॥

इत्थं मुख्यप्राणातिरिक्तप्राणानां सृष्ट्यादिकं शिष्ट्वा मुख्येऽपि प्राणे प्रथमाधिकरणन्यायमतिदिशति—

श्रेष्ठश्च ॥ ८ ॥

अतिदेशत्वात् न पृथक्संगत्यपेक्षा। अत्र 'एतस्माज्जायते प्राणः' इति मुख्यप्राणोत्पत्तिश्रुतेः 'आनीदवातम्' इति

४. प्राणश्रैष्ठ्याधिकरणम्।

सृष्टेः प्राक् महाप्रलये प्राणसद्भावश्रुत्या विरोधोऽस्ति न वेति संदेहे, अस्तीति पूर्वः पक्षः। सिद्धान्तस्तु— इन्द्रियवत् श्रेष्ठोऽपि प्राणो ब्रह्मणो जायते। अतः 'आनीदवातम्' इति श्रुतौ आनीच्छब्दः कारणसद्भावं दर्शयति, अवातं प्राणरहितमिति विशेषणात्। न तया श्रुत्या प्राणोत्पत्तिश्रुतेर्विरोध इति सिद्धम्॥

उत्पत्तिचिन्तानन्तरमुत्पत्तिमतः प्राणस्य स्वरूपं चिन्त्यत इति प्रसङ्गसंगत्येदमाह—

न वायुक्रिये पृथगुपदेशात् ॥ ९ ॥

तत्र मुख्यः प्राणः किं वायुरेव, उत इन्द्रियव्यापारः, आहोस्वित् वायुविशेष इति संदेहे, 'यः प्राणः स वायुः'

५. वायुक्रियाधिकरणम्।

इति 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति प्राणभेदाभेदश्रुत्योरुभयोः

विरोधे, मुख्यार्थत्वासंभवेन स्तोककल्पनानुरोधात् भेदश्रुतेर्गौणत्वे वायुरेव प्राण इत्येकः पूर्वः पक्षः। भेदश्रुत्यवष्टम्भेऽपि धर्मिभेदाद्धर्मभेदो लघीयानिति न्यायेन तु सर्वेन्द्रियव्यापार एव प्राण इत्यपरः पूर्वः पक्षः। सिद्धान्तस्तु— न वायुक्रिये मुख्यप्राणो न वायुः, नापि क्रिया इन्द्रियव्यापारः; किं तु वायुविशेष एव। कुतः, 'सवायुना ज्योतिषा' इति पृथगुपदेशात्, तथा 'एतस्माज्जायते प्राणः' इत्यादिना करणेभ्यः पृथगुपदेशात्। न हि इन्द्रियव्यापारस्यैव सत इन्द्रियेभ्यः पृथगुपदेशो युज्यते। तस्माद्वायुविशेषोऽयमध्यात्मभावापन्नः पञ्चवृत्तिः प्राणः। ततश्च न श्रुत्योर्विरोध इति सिद्धम्॥

इन्द्रियव्यापारः प्राणो न चेत्, तर्हि तस्येन्द्रियवत् करणत्वानङ्गीकारात् जीववत् स्वातन्त्र्यं स्यादित्यत आह—

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः॥ १०॥

तुः उक्तशङ्कानिरासार्थः। न जीववत्प्राणः स्वतन्त्रः, किंतु चक्षुरादिवत् जीवं प्रति करणभूतः। कुतः, तत्सहशिष्ट्यादिभ्यः तैः चक्षुरादिभिः सह प्राणसंवादादिषु प्राणस्य शिष्टेः शासनात्, सजातीयानामेव सहशासनस्य युक्तत्वात्। अचेतनत्वभौतिकत्वादिहेतुसंग्रह आदिशब्दार्थः॥

ननु प्राणस्य जीवोपकरणत्वं चेत्, तर्हि विषयान्तरं स्वरूपान्तरवत् प्रसज्येतेत्यत आह—

अकरणत्वाच्च न दोषस्तथाहि दर्शयति ॥ ११ ॥

अकरणत्वान्न प्राणस्य विषयान्तरापेक्षा दोषः, इन्द्रियान्तरेष्वसंभावितासाधारणदेहादिधारणाख्यव्यापारस्य निर्वाहकत्वात्। तथाहि, प्राणस्यासाधारणो व्यापारः 'तान्वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत्पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि' इति श्रुतिर्दर्शयतीत्यर्थः ॥

न केवलं देहधारणमेवास्यासाधारणम्, अपि त्वन्यदपीत्याह—

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ १२ ॥

यथा मनः अनेकवृत्त्याख्यासाधारणव्यापारापेक्षया अनेकधा व्यपदिश्यते, एवमुच्छ्वासनिश्वाससर्वशरीरक्रियोत्क्रान्त्याख्याश्चत्वारो व्यापाराः, भक्षितान्नादिरसानां समत्वेन सर्वाङ्गेषु नयनं पञ्चमो व्यापारः। तानपेक्ष्य पञ्चवृत्तिः प्राणो व्यपदिश्यते क्रमेण प्राणोऽपानो व्यान उदानः समान इति। तदसाधारणव्यापारापेक्षया जीवोपकरणत्वं मनोवदिति सिद्धम् ॥

इत्थं मुख्यप्राणस्योत्पत्तिं स्वरूपं चाभिधाय, परिमाणमतिदेशेनाह—

अणुश्च ॥ १३ ॥

प्राणस्यान्तरङ्गस्वरूपकथनानन्तरं बहिरङ्गपरिमाणमतिदिश्यत इति अन्तरङ्गबहिरङ्गलक्षणा संगतिः पूर्वेणास्य बोध्या ।

६. श्रेष्ठाणुत्वाधिकरणम् । उत्क्रान्त्यादिश्रुतेः 'सम एभिस्त्रिभिर्लोकैः' इत्यादिप्राणविभुत्वश्रुतेश्च मिथो विरोधोऽस्ति न वेति संदेहे, अस्तीति पूर्वः पक्षः । सिद्धान्तस्तु— चक्षुरादिवत् प्राणोऽप्यणुः परिच्छिन्नः सूक्ष्मश्च । 'सम एभिः' इति श्रुतिः सकलवायुपरा, न आध्यात्मिकप्राणमात्रपरेत्यनयोर्न विरोध इति सिद्धम् ॥

प्राणस्याध्यात्माधिदैवतविभागेन अणुत्वविभुत्वनिरूपणप्रसङ्गेनाध्यात्मिकानामिन्द्रियाणामाधिदैविकाद्यधिष्ठितानां चेष्टामाचष्ट इति प्रसङ्गसंगत्येदमाह—

ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १४ ॥

अत्र 'आदित्यश्चक्षुर्भूत्वा' इत्यादीन्द्रियाणां देवताधीनचेष्टावत्त्वश्रुतेः 'चक्षुषा हि रूपाणि पश्यति' इति श्रुत्या विरो-

७. ज्योतिराद्यधिकरणम् । धोऽस्ति न वेति संदेहे, अस्तीति पूर्वः पक्षः । सिद्धान्तस्तु— ज्योतिरादिभिः आदित्यादिदेवताभिः अधिष्ठीयते प्रेर्यते इत्यधिष्ठानम् अधिष्ठितमेव

वागादिकं चेष्टते । कुतः, तदामननात् तस्य देवताधिष्ठितत्वस्य 'आदित्यश्चक्षुः' इत्यादिश्रुत्याभिधानात् । 'चक्षुषा हि' इति श्रुतौ तु देवताधिष्ठितत्वानिषेधात् न तयैतस्या विरोध इति सिद्धम् ॥

ननु देवतानामेवाधिष्ठातृत्वं चेत्, तर्हि भोक्तृत्वं प्रसज्येतेत्यत आह—

प्राणवता शब्दात् ॥ १५ ॥

प्राणवता जीवेनैव इन्द्रियाणां स्वस्वामिभावः संबन्धः । ततश्च इन्द्रियसाध्यभोगभाक्त्वं जीवस्यैव, न देवतानाम् । कुतः, शब्दात्, 'स चाक्षुषः पुरुषो दर्शनाय चक्षुः' इत्यादिश्रुतेः इत्यर्थः ॥

किं च—

तस्य च नित्यत्वात् ॥ १६ ॥

तस्य जीवस्य स्वकर्मार्जिते कार्ये कर्तृत्वेन भोक्तृत्वेन च नित्यत्वात्, न देवतानां भोक्तृत्वमस्मिन् शरीरे इत्यविरोध इति सिद्धम् ॥

ननु सत्सु इन्द्रियेषु तदधिष्ठातृदेवताचिन्ता; तान्येव प्राणव्यापारव्यतिरेकेण न सन्तीत्याक्षेपसंगत्येदमाह—

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥

अत्र 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति मुख्यप्राणादिन्द्रियाणां तत्त्वान्तरत्वश्रुतेः 'त एतस्यैव सर्वे रूपमभवन्' इति प्राणात्मकत्वश्रुत्या विरोधोऽस्ति न वेति संदेहे, अस्तीति पूर्वः पक्षः । सिद्धान्तस्तु— श्रेष्ठात् मुख्यप्राणात् अन्यत्र अन्ये ते प्रकृता वागादयः इन्द्रियाणीत्युच्यन्ते, न प्राणाः । कुतः, 'एतस्माज्जायते' इत्यादौ तस्य भेदस्य व्यपदेशात् इन्द्रियाणां प्राणात्मकत्वश्रुतेर्गौणत्वेन न तया विरोधः ॥

८. इन्द्रियाधिकरणम् ।

किं च—

भेदश्रुतेः ॥ १८ ॥

वागादीन्द्रियप्रकरणमुपसंहृत्य 'अथ हेममासन्यं प्राणमूचुः' इति भिन्नप्रकरणे प्राणस्येन्द्रियेभ्यो भेदेन श्रवणात् न प्राणव्यापारत्वमिन्द्रियाणाम्, तत्त्वान्तरत्वमित्यर्थः ॥

किं च—

वैलक्षण्याच्च ॥ १९ ॥

सुषुप्त्यवस्थायां प्राणस्य स्थितिः नेन्द्रियाणामित्यादिबहुवैलक्षण्यात् तत्त्वान्तरत्वम् । तस्मान्नानयोर्विरोध इति सिद्धम् ॥

पूर्वं नामरूपभेदेन प्राणेन्द्रिययोर्भेद इत्युक्तम्। तत्प्रसङ्गेन नामरूपव्याकरणं किंकर्तृकमिति विचार्यते इति प्रसङ्गसंगत्येदमाह—

संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २० ॥

उत्पद्यमानव्यापाररूपोत्पत्तिविषयश्रुतिविप्रतिषेधपरिहारानन्तरम् उत्पादकव्यापाररूपोत्पादनविषयश्रुतिविप्रतिषेधः परि-

९. संज्ञामूर्तिक्लृप्त्यधिकरणम्।

ह्रियते। तत्र अत्रिवृत्कृतभूतानामुत्पादनं पारमेश्वरमेव; त्रिवृत्कृतभौतिकोत्पादने तु श्रुतिविप्रतिपत्तिः दृश्यते। 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति जीवकर्तृकत्वश्रुतेः 'आकाशो ह वै नाम नामरूपयोर्निर्वहिता' इति परमेश्वरकर्तृकत्वश्रुतेश्च मिथो विरोधोऽस्ति न वेति संदेहे, अस्तीति पूर्वः पक्षः। सिद्धान्तस्तु—सौत्रतुशब्दः पूर्वपक्षनिरासार्थः। 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति त्रिवृत्कुर्वतः परमेश्वरस्यैव संज्ञामूर्तिक्लृप्तिः नामरूपव्याक्रिया भवितुमर्हति। कस्मात्, 'सेयं देवता' इत्युपक्रम्य 'व्याकरवाणि' इति व्याकरणस्य परदेवताकर्तृकत्वोपदेशात्। न च 'अनेन जीवेन' इति विशेषणात् जीवकर्तृकत्वम्, अल्पमेधसो जीवस्य महीमहीधर-

महोदधिव्याकरणे सामर्थ्याभावात् 'अनेन जीवेन' इत्यस्य सन्निहितानुप्रविश्येत्यनेन संबन्धाच्च नानयोर्विरोध इति ॥

इत्थं बाह्यं त्रिवृत्करणमभिधाय आध्यात्मिकं परं त्रिवृत्करणमभिधातुमाह—

मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥

भूमेरन्नात्मिकायाः त्रिवृत्कृतायाः कार्यं भौमं मांसादि । आदिशब्देन पुरीषमनसी गृह्येते । तदाह श्रुतिः—'अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः' इति । एवम् इतरयोः अप्तेजसोः यथाशब्दं कार्यमवगन्तव्यम्—मूत्रं लोहितं प्राणश्चापां कार्यम्, अस्थि मज्जा वाक् तेजस इति ॥

ननु सर्वेषां त्रिवृत्करणाविशेषात् इयं पृथिवी इमा आपः इदं तेजः, इत्यसाधारणः पृथग्व्यवहारः कथं संगच्छते, कथं वाध्यात्मिकव्यवहारः— इदं मांसादि पृथिवीकार्यम् इदं जलस्य इदं तेजस इति; तत्राह—

वैशेष्यात्तु तद्वादस्तद्वादः ॥ २२ ॥

तुशब्दः शङ्कानिरासार्थः । सर्वेषां पृथिव्यादीनां त्रिवृत्करणाविशेषेऽपि, वैशेष्यात् स्वभागाधिक्यात्, तद्वादः पृथिव्या-

दिवादः संगच्छते । तद्वाद इति पदाभ्यासः अध्यायपरिसमाप्त्यर्थः । तदेवं सर्वासां श्रुतीनामविरोधे प्रामाण्यात् निरवद्याद्वितीये ब्रह्मणि सिद्धः समन्वय इत्यतिशोभनम् ॥

मिथस्त्रय्यन्तवाक्यानामविरोधे प्रमात्वतः ।
सिद्धः समन्वयो यस्मिंस्तदस्मि ब्रह्म चिद्घनम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रसरस्वतीपादाब्ज-
सेवापरायणेन श्रीसदाशिवेन्द्रसरस्वत्या विरचितायां
श्रीमद्ब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्वप्रकाशिकायां
द्वितीयोऽध्यायः ॥

ॐ

तृतीयोऽध्यायः ॥

पूर्वस्मिन्नध्याये ब्रह्मणि समन्वयस्य स्मृतिन्यायश्रुतिविरोधव्यासेधेनानध्यवसायलक्षणाप्रामाण्यप्रतिक्षेपे तार्तीयविचारो भवतीति हेतुहेतुमद्भावसंगत्यायमध्याय आरभ्यते। पूर्वं जीवोपकरणभूतभौतिकजन्म निरूपितम्। तदुपजीव्य तदुपहितस्य जीवस्य संसारप्रकारं वैराग्यार्थं निरूपयितुं देहान्तरारम्भे भूतसूक्ष्मसंपरिष्वक्तस्यैव परलोकगमनमित्याह—

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

अत्र पूर्वपक्षे निराधारप्राणादिगमनासंभवान्न वैराग्यम्, सिद्धान्ते तत्संभवाद्वैराग्यमिति फलभेदः। स जीवः किं

१. तदन्तरप्रतिपत्त्यधिकरणम्।

देहान्तरारम्भकैः अपञ्चीकृतभूतभागैरसंपरिष्वक्तो गच्छति, उत संपरिष्वक्त इति संदेहे, मानाभावात् असंपरिष्वक्त इति पूर्वः पक्षः। सिद्धान्तस्तु— तदन्तरप्रतिपत्तौ देहान्तर-

प्रतिपत्तौ तदारम्भकभूतैः संपरिष्वक्तः रंहति गच्छति। कुतः, प्रश्ननिरूपणाभ्याम् 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति प्रश्नः, द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वा 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति निरूपणं प्रतिवचनम्, ताभ्यामित्यर्थः ॥

नन्वेवमद्भिः संपरिष्वक्तो गच्छतीति गम्यते, कथं तदितरभूतपरिष्वङ्गसिद्धिः; तत्राह—

त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ २ ॥

त्रिवृत्करणश्रुत्या अपामितरभूतद्वयमेलनेन त्र्यात्मकत्वात्। कथं तर्हि श्रुतावप्शब्दः भूयस्त्वात् तेजआद्यपेक्षया अपां देहे भूयस्त्वादित्यर्थः ॥

प्राणगतेश्च ॥ ३ ॥

प्राणानाम् 'तमुत्क्रामन्तम्' इत्यादिना भूताश्रितानामेव गतेः श्रवणात् तत्संपरिष्वङ्गसिद्धिः ॥

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥

'मृतस्याग्निं वागप्येति वातं प्राणः' इत्यादिना अग्न्यादिषु गतिश्रुतेः लयश्रवणात् न जीवेन वागादयो गच्छन्तीति चेत्,

न । वागादिलयश्रुतेः 'ओषधीर्लोमानि...' इतिवत् भाक्तत्वादित्यर्थः ॥

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

द्युलोकादिपञ्चाग्निषु प्रथमे द्युलोकाग्नौ 'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति' इति श्रद्धाया आहुतित्वश्रवणात् अपामश्रवणात् कथं पुरुषवचस्त्वमिति चेत्, न । हि यतः 'आपो हास्मै श्रद्धां संनमन्ते....' इति श्रद्धाशब्देन तद्धेतवस्ता एवापो लक्ष्यन्ते। अतः प्रश्ननिरूपणयोरुपपत्तेरित्यर्थः ॥

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥

श्रद्धाशब्दितानामपां पुरुषवचस्त्वेऽपि तद्वेष्टितत्वं जीवस्य न युज्यते, अबादिवज्जीवस्याश्रुतत्वादिति चेत्, न । कुतः, 'अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति' इत्यादिवाक्यशेषेण इष्टापूर्तकर्मकारिणां प्रतीतेरित्यर्थः ॥

ननु इष्टादिकारिणां धूमादिमार्गेण चन्द्रलोकं गतानाम् 'तद्देवानामन्नं तं देवा भक्षयन्ति' इति देवैर्भक्ष्यत्वं श्रूयते । अतः कथं तेषां स्वकर्मफलोपभोगसिद्धिरित्यत आह—

भाक्तं वानात्मवित्त्वात्तथाहि दर्शयति ॥ ७ ॥

वाशब्दः चोदितदोषनिरासार्थः । तेषाम् इष्टादिकारिणाम् अन्नत्वं भाक्तमेव, न मुख्यम्; अन्यथा 'स्वर्गकामो यजेत' इतिश्रुतिव्याकोपः स्यात् । अतः तेषामनात्मवित्त्वात् देवोपभोग्यत्वमेवान्नत्वम् । तथाहि दर्शयति 'अथ योऽन्यां देवतामुपास्ते' इत्यादिश्रुतिरित्यर्थः । तस्मात्परलोकभोगार्थं भूतसंपरिष्वक्तस्य रंहणमिति सिद्धम् ॥

पूर्वं कर्मसमवेतानामपां पञ्चमाहुतौ पुरुषात्मना परिणामश्रवणं हेतुमाश्रित्य अबादिभूतपरिवेष्टितस्य जीवस्य रंहणमुक्तम्, तदयुक्तम्; स्वर्गादवरोहतां जीवानां कर्माभावेन तत्समवेतानामपामप्यभावादित्याक्षेपसंगत्येदमाह—

कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥

२. कृतात्ययाधिकरणम् ।

अत्र पूर्वपक्षे अवरोहतां कर्माभावेन तदनुगुणतिर्यगादियोनिप्राप्त्ययोगान्न कर्मफलेषु वैराग्यम्, सिद्धान्ते कर्मणः सत्त्वाद्वैराग्यमिति फलभेदः । एवं हि स्वर्गिणामवरोहणं श्रूयते— 'तस्मिन्याव-

त्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते’ इत्यादि । तत्र किं स्वर्गादवरोहन्तः सानुशयाः, उत निरनुशया इति संदेहे, निरनुशया इति पूर्वः पक्षः । सिद्धान्तस्तु— कृतस्य स्वर्गप्रापककर्मजातस्य भोगेन अत्यये नाशे अनुशयवान् अनुशयशब्देनामुष्मिकफलप्रापककर्मातिरिक्तं कर्मोच्यते तद्वानेवावरोहति । कुतः, दृष्टस्मृतिभ्याम् ‘तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्...’ इत्याद्या दृष्टा प्रत्यक्षा श्रुतिः, ‘प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशकालकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते’ इति स्मृतिः, ताभ्यामनुशयवन्त एवावरोहन्तीति गम्यते । ते च येन मार्गेण चन्द्रलोकमारूढाः तेनैवावरोहन्ति किं तद्विपरीतेनेत्याकाङ्क्षायामाह— यथेतमनेवं च । यथेतं यथागतं धूमादिमार्गेण अनेवं च तद्विपर्ययेण वक्ष्यमाणाभ्रादिमार्गेणावरोहन्तीत्यर्थः ॥

चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥

ननु ‘रमणीयचरणाः’ इति श्रुतिः चरणाद्योन्यापत्तिं दर्शयति, नानुशयात् । अन्यच्चरणमन्योऽनुशय इति नानुशयसिद्धिरिति चेत्, न । यतः कार्ष्णाजिनिराचार्य इयं चरणश्रुतिरनुशयोपलक्षणार्थेति मन्यते ॥

आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

ननु चरणश्रुतेर्मुख्याचारार्थपरित्यागेन अनुशयार्थकत्वे आनर्थक्यमिति चेत्, न। इष्टादिकर्मणामाचारनिर्वर्त्यत्वेन चरणापेक्षत्वात् चरणश्रुतेरर्थवत्त्वमित्यर्थः ॥

वस्तुतः कर्मचरणयोर्न भेद इत्याह—

सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥

बादरिस्त्वाचार्यः सुकृतदुष्कृते एव चरणशब्देनोच्येते इति मन्यते, लोके इष्टादिकारिणि 'धर्मं चरति' इति कर्मचरणयोरभेदेन प्रयोगदर्शनात्। अतः इष्टादिकारिणां चन्द्रलोकं गतानां पुनरवरोहार्थमनुशयोऽस्तीति सिद्धम् ॥

पूर्वम् इष्टादिकारिण एव चन्द्रलोकं गच्छन्तीत्युक्तम्, तदयुक्तम्; अनिष्टादिकारिणोऽपि गच्छन्त्वित्याक्षेपसंगत्येदमाह—

अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥

३. अनिष्टादिकार्याधिकरणम्।

अत्र पूर्वपक्षेऽनिष्टादिकारिणामविशेषेण चन्द्रलोकगतेरिष्टादिकरणं व्यर्थम्, सिद्धान्ते पापिनां चन्द्रलोकगत्यभावात् तदर्थमिष्टादिकरणं सार्थकमिति फलभेदः। अत्र पापिनां चन्द्रलोकगतिरस्ति

न वेति संदेहे, पूर्वः पक्षः—अनिष्टादिकारिणामपि चन्द्रलोकगमनम् 'ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' इति श्रुतम्। अतो धर्मिण एव चन्द्रलोकं गच्छन्तीत्येतदसंगतमित्यर्थः ॥

एवं पूर्वपक्षे सिद्धान्तः—

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥

तुशब्दः पूर्वपक्षनिरासार्थः । संयमने यमालये स्वपापानुरूपा यामीर्यातना अनुभूय पुनरिमं लोकं प्रत्यवरोहन्ति इत्येवंभूतावेव तेषां पापिनामारोहावरोहौ भवतः । कुतः, तद्गतिदर्शनात् 'अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे' इति श्रुतौ यमवशत्वलक्षणतद्गतेर्दर्शनादित्यर्थः ॥

स्मरन्ति च ॥ १४ ॥

मन्वादयः शिष्टाः पापिनां नरकभोगं स्मरन्ति । अतश्च धर्मिणामेव चन्द्रलोकगमनं नान्येषामित्यर्थः ॥

अपि च सप्त ॥ १५ ॥

अपि च सप्त रौरवादयो नरकाः पापफलभूमित्वेन स्मर्यन्ते पौराणिकैः; तान् पापिनः प्राप्नुवन्ति, न चन्द्रलोकमित्यर्थः ॥

ननु पापिनो यामीर्यातना अनुभवन्तीति यदुक्तम्, तदसंगतम्; रौरवादौ चित्रगुप्तादीनामधिष्ठातृत्वस्मरणादित्यत आह—

तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥

तत्रापि च रौरवादिषु तस्यैव यमस्याधिष्ठातृत्वव्यापाराद-विरोधः, चित्रगुप्तादीनां यमप्रयुक्तत्वादिति भावः ॥

उपासकानामर्चिरादिमार्गः, केवलकर्मिणां धूमादिमार्ग इति श्रुतिस्मृत्यादिषु व्यवस्था । तथा च एतन्मार्गद्वयभ्रष्टानां पापिनां तृतीयमार्गोक्तेरपि न तेषां चन्द्रलोकप्राप्तिरित्याह—

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

'अथैतयो पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति....' इत्यादौ एतयोरिति पदस्यार्थः सूत्रे विद्याकर्मणोरितीति । कुतः, विद्याकर्मणोरेव देवयानपितृयानात्मकमार्गद्वयसाधनत्वेन प्रकृतत्वात्, प्रकृतवाचकत्वमेतच्छब्दस्य युक्तमित्यर्थः। सूत्रे तुशब्देन 'चन्द्रमसमेव ते सर्वे

गच्छन्ति' इति श्रुतिप्रयुक्तशङ्कानिरासः। कुतः, सर्वशब्दस्य पुण्यपुरुषमात्रपरत्वादिति भावः॥

ननु 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति संख्यानियमेन देहप्राप्त्यभिधानात्तदर्थं पापिनां चन्द्रलोकगमनमङ्गीकर्तव्यमित्यत आह—

न तृतीये तथोपलब्धेः॥ १८॥

तृतीये मार्गे प्रविष्टानां पापिनां देहप्राप्त्यर्थमाहुतिसंख्यानियमो नादर्तव्यः। कुतः, तथोपलब्धेः संख्यानियमं विनैव 'जायस्व म्रियस्वेत्येतत्तृतीयं स्थानम्' इति श्रुतौ तृतीये मार्गे देहप्राप्तेरुपलब्धेरित्यर्थः। इष्टादिकारिणामेवायं संख्यानियम इति भावः॥

स्मर्यतेऽपि च लोके॥ १९॥

अपि च लोके भारतादौ द्रोणधृष्टद्युम्नादीनामयोनिजत्वं स्मर्यते। तत्र द्रोणादीनां योषिदाहुतिरेका नास्ति, धृष्टद्युम्नादीनां योषित्पुरुषविषये द्वे आहुती न स्तः इत्याहुतिसंख्यानियमो नास्ति; एवमन्यत्रापीति भावः॥

दर्शनाच्च॥ २०॥

किं च लोके जरायुजाण्डजस्वेदजोद्भिज्जेषु चतुर्विधदेहेषु

स्वेदजोद्भिज्जयोः स्त्रीपुंव्यक्तिसंयोगं विनैवोत्पत्तिदर्शनान्नाहुतिसंख्यानियम इत्यर्थः ॥

ननु 'त्रीण्येव बीजानि भवन्ति आण्डजं जीवजमुद्भिज्जम्' इति शरीरत्रैविध्यश्रवणात् कथं चातुर्विध्यमित्यत आह—

तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥

श्रुतौ 'आण्डजं जीवजमुद्भिज्जम्' इत्यत्र तृतीयशब्देनोद्भिज्जशब्देनावरोधः संग्रहः संशोकजस्य स्वेदजस्य। वृक्षादिकं पृथिवीमुद्भिद्य जायते, स्वेदजं तु जलमुद्भिद्येत्युभयोरवयवार्थत्वाविशेषात्तेनास्य संग्रहः कृतः। न ह्येतावता चातुर्विध्यहानिर्भवति, स्थावरजङ्गमात्मकत्वेनोभयोर्भेदस्य दुरपह्नवत्वात्। अतः अनिष्टादिकारिणां न चन्द्रलोकप्राप्तिः, अपि तु इष्टादिकारिणामेवेति सिद्धम् ॥

पूर्वं तृतीयं स्थानमिति स्थानशब्दस्य मार्गद्वयोपक्रमसामर्थ्यात् तृतीयमार्गोपलक्षकत्वमुक्तम्। न तथेह भवति श्रुतेः साद‍ृश्यलक्षकत्वम्, तत्र मानाभावादिति प्रत्युदाहरणसंगत्येदमाह—

तत्साभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

अत्र पूर्वपक्षे भवति श्रुतेर्मुख्यत्वासिद्धिः, सिद्धान्ते गौण-

त्वसिद्धिरिति फलभेदः । पूर्वमिष्टादिकारिणोऽवरोहन्तीत्युक्तम् ;

४. साभाव्यापत्त्यधिकरणम् ।

अत्र तेषामवरोहप्रकारश्चिन्त्यते । श्रूयते ह्यवरोहश्रुतिः— 'अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति ' इति । तत्र किं स्वर्गादवरोहन्तो जीवा आकाशादिस्वरूपं प्रतिपद्यन्ते, उत तत्साम्यमिति विशये, आकाशादिस्वरूपमिति पूर्वः पक्षः । सिद्धान्तस्तु— जीवानां तैः आकाशादिभिः साभाव्यापत्तिः समानो भावो रूपं येषां ते सभावाः तद्भावः साभाव्यं सादृश्यं तस्यापत्तिः प्राप्तिः । कुतः, उपपत्तेः चन्द्रलोकं गतानामनुशयिनां प्रवृत्तफलकर्मक्षयदर्शनजनितशोकाग्निना दह्यमानमिदं शरीरं करकादिवद्विलीयमानमाकाशसमं भवतीत्येतदुपपद्यते । न ह्यन्यस्यान्यभावो मुख्य उपपद्यते । तस्मात्सादृश्यमेव प्रतिपद्यन्त इति सिद्धम् ॥

इत्थं पूर्वमाकाशादिषु वर्षान्तेषु पूर्वपूर्वसादृश्यानन्तरमुत्तरोत्तरसादृश्यमित्युक्तम् , तदुपजीव्यान्यद्विचार्यत इति उपजीव्योपजीवकभावसंगत्येदमाह—

नातिचिरेण विशेषात् ॥ २३ ॥

अत्र पूर्वपक्षे अधिकारिणः सर्वत्र तत्सादृश्यपरिहारार्थं

कर्तव्यस्य प्रयत्नस्य गौरवम्, सिद्धान्ते तदर्थं कर्तव्यप्रयत्नस्य क्वचिल्लाघवं क्वचिद्गौरवमिति फलभेदः। तत्र किं जीवः चिर-

५. नातिचिराधिकरणम्।

कालमेव सादृश्येनावस्थाय अपरसादृश्यं गच्छति, उताल्पमल्पमिति विशये, नियामकाभावात् अनियम इति पूर्वः पक्षः। सिद्धान्तस्तु— जीवो नातिचिरेण अल्पमल्पं कालमेवाकाशादिवर्षान्तैः सादृश्येनावस्थाय वर्षधाराद्वारा पृथिवीं प्रविशति। कुतः, व्रीह्यादिभावापत्त्यनन्तरं 'अतो वै खलु दुर्निष्प्रपतरम्' इति विशेषात् ततः पूर्वं सुनिष्प्रपततरत्वं प्रतीयते। तत्र व्रीह्याकाशादौ जीवस्य प्रतीयमाने सुखदुःखे चिरकालावस्थानाल्पकालावस्थाने भवतः, न मुख्ये; तदानीं विना स्थूलशरीरं लिङ्गशरीरमात्रेण सुखदुःखोपभोगासंभवात्। अतो व्रीह्यादिप्रवेशात् पूर्वमल्पमल्पमेव कालं तत्सादृश्येनावस्थानमिति सिद्धम्॥

पूर्वं दुर्निष्प्रपतरशब्दस्य चिरकालावस्थानलक्षकत्वेऽपि प्रकृते व्रीह्यादिभावेन 'जायन्ते' इति जीवजन्मश्रुतेः मुख्यत्वसंभव इति प्रत्युदाहरणसंगत्येदमाह—

अन्याधिष्ठितेषु पूर्ववदभिलापात्॥ २४॥

अत्र पूर्वपक्षे व्रीह्यादिजन्मनो मुख्यत्वेऽनुशयिनां तत्परिहारायाधिकारिणाधिकं प्रयतितव्यम्, सिद्धान्ते तदीय-

६. अन्याधिष्ठिताधिकरणम् । संसर्गमात्रं निराकर्तुं नाधिकं प्रयतितव्यम् । इति फलभेदः । तस्मिन्नेवावरोहे 'त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते' इति श्रूयते । तत्र किं व्रीह्यादिभावेन जीवानां जनिश्रुतिः मुख्या, उत जीवान्तरेणाधिष्ठिते व्रीह्यादौ संसर्गमात्रमिति विशये, मुख्येति पूर्वः पक्षः । सिद्धान्तस्तु— अन्यैर्जीवैरधिष्ठिते व्रीह्यादौ संसर्गमात्रमनुशयिनां भवति । कुतः, पूर्ववदभिलापात् यथाकाशादिवर्षान्तेषु कर्मपरामर्शमन्तरेणैव प्रवेश उक्तः ; एवं व्रीह्यादिष्वपि कर्मपरामर्शं विनैव प्रवेशाभिलापात् । अतः कर्मपरामर्शाभावात् न व्रीह्यादिषु अनुशयिनां सुखदुःखभोक्तृत्वम् । यत्र तु तद्भोक्तृत्वं तत्र कर्मपरामर्शः 'रमणीयचरणाः' इत्यादिना दृश्यते । तस्माज्जनिश्रुतिः संसर्गमात्राभिप्राया, न मुख्या इति सिद्धम् ॥

अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥

ननु ज्योतिष्टोमादिकं कर्म पशुहिंसादियोगादशुद्धम् ; तत्कारिणामनुशयिनां व्रीह्यादिस्थावरेषु दुःखानुभवार्थं मुख्यमेव जन्मास्त्विति चेत्, न ; शब्दात् विधिशास्त्रात् अग्निष्टोमादेर्धर्मत्वेनावगतत्वात् न दुःखहेतुत्वमित्यर्थः ॥

किं च—

रेतःसिग्योगोऽथ ॥ २६ ॥

अथ व्रीह्यादिभावानन्तरम् अनुशयिनां 'रेतः सिञ्चति' इति रेतःसिक्, तद्योगः तद्भावः 'यो रेतः सिञ्चति तद्भूय एव भवति' इति श्रुतावाम्नायते। न ह्यत्रानुशयिनां रेतःसिग्भावो मुख्यः संभवति, इदानीं पुरुषं प्रविष्टत्वेन अप्राप्तयौवनत्वात्। अतः तद्भावः तत्संसर्गो वाच्यः। तथा व्रीह्यादावपि संसर्ग एव, आकाशादावपि संसर्गस्यैवावगतत्वेन संदंशन्यायादिति भावः ॥

ननु अनुशयिनां सर्वत्र संसर्गस्यैवाङ्गीकारे मुख्यं जन्म क्वापि न स्यादित्यत आह—

योनेः शरीरम् ॥ २७ ॥

योनौ रेतसि निषिक्ते ततः सुखदुःखोपभोगयोग्यं कर्मोपार्जितं शरीरम् अनुशयिनां जायत इति 'रमणीयचरणाः' इत्यादिशास्त्रमाह। तस्मात् ब्राह्मणादियोनावेव अनुशयिनां मुख्यं जन्म न व्रीह्यादाविति गत्यागतिविवेककृतं वैराग्यं ज्ञानसाधनमित्यनवद्यम् ॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्वप्रकाशिकायां तृतीयाध्यायस्य प्रथमः पादः ॥

ॐ

द्वितीयः पादः ॥

इत्थं गत्यागतिनिरूपणेन कर्मफलेभ्यो विरक्तस्य महावाक्यार्थज्ञानाय तत्त्वंपदार्थावस्मिन्पादे शोध्येते इति हेतुहेतुमद्भावसंगत्या द्वितीयः पाद आरभ्यते । तत्र पूर्वं गत्यागतिचिन्तया जाग्रदवस्था निरूपिता ; तदनन्तरं त्वंपदार्थस्य स्वयंज्योतिष्ट्वसिद्धये स्वप्नावस्थां निरूपयितुमिदमाह——

संध्ये सृष्टिराह हि ॥ १ ॥

१. संध्याधिकरणम् ।

पादान्तरत्वादव्यवहिताधिकरणेनास्य न संगत्यपेक्षा । अत्र पूर्वपक्षे व्यावहारिकस्वप्नावस्थातो जीवस्य पृथक्करणायोगात् स्वयंज्योतिष्ट्वासिद्धिः, सिद्धान्ते तद्योगात्तत्सिद्धिरिति फलभेदः । एवं हि स्वप्नमधिकृत्य श्रूयते— 'अथ रथान्रथयोगान्पथः सृजते' इति । तत्र किं स्वप्नसृष्टिः व्यावहारिकी, उत मायामात्रमिति संदेहे, पूर्वः पक्षः— संध्ये जाग्रत्सुषुप्त्योः संधौ भवे स्वप्ने सृष्टिः व्यावहारिक्येव, हि यस्मात् 'अथ रथान्....' इत्यादिका श्रुतिरेवमाह ॥

किं च—

निर्मातारं चैके पुत्रादयश्च ॥ २ ॥

एके शाखिनो जीववत्तथा अस्मिन्नेव स्वप्ने कामानां निर्मातारमीश्वरमामनन्ति 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः' इति। पुत्रादयश्च तत्र कामा अभिधीयन्ते काम्यन्त इति। एवं च स्वप्नसृष्टिः व्यावहारिकी, ईश्वरकर्तृकत्वात् क्षित्यादिवत्— इत्यनुमानमनेन सूत्रेण सूचितम्। तस्मात् पूर्वोदाहृतश्रुत्या एतदनुमानेन च स्वप्नसृष्टिः व्यावहारिकीति सिद्धम् ॥

एवं पूर्वपक्षे सिद्धान्तः—

मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥

तुः पूर्वपक्षनिरासार्थः। स्वप्नसृष्टिः शुक्तिरूप्यवन्मायामात्रम्। कुतः, कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् न हि कार्त्स्न्येन देशकालादिसंपत्त्यबाधरूपपरमार्थवस्तुधर्मेण अभिव्यक्तस्वरूपः स्वप्नः। अतः तादृशधर्मेणानभिव्यक्तस्वरूपत्वात् प्रातिभासिक एव स्वप्नः। यदुक्तम् 'अथ रथान्रथयोगान्पथः सृजते' इति, तच्च 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति' इत्येवमादिकया श्रुत्यैव परिहृतम्। यच्चानुमानमुक्तम्, तत्रोचि-

तद्देशकालादिजन्यत्वमुपाधिः हेत्वसिद्धिश्च ‘स्वयं विहत्य स्वयं निर्माय....’ इत्यादिना श्रुत्यन्तरेण स्वप्नसृष्टेः जीवकर्तृकत्व श्रवणात् । अतः स्वप्नसृष्टिर्मिथ्येति सिद्धम् ॥

ननु स्वप्नस्य मिथ्यात्वे तत्सूचितोऽप्यर्थः सत्यो न स्यादित्याशङ्क्याह—

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥

स्वप्ने जायमानः स्त्रीदर्शनादिः सत्य एव, स च सत्यस्य साध्वसाधुवस्तुनः सूचको हेतुः । तथा हि— ‘यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्’ इत्यादिश्रुतेरवगम्यते । आचक्षते च स्वप्नाध्यायविदः शुभाशुभसूचकत्वं स्वप्नदर्शनस्य । वस्तुतस्तु दर्शनस्य स्त्र्याद्यर्थरूषितत्वेन असत्यत्वेऽपि शुक्तिरूप्यज्ञानस्य सत्यहर्षादिजनकत्ववत् सत्यशुभादिसूचकत्वमविरुद्धम् इति भावः ॥

ननु पूर्वमुचितदेशादिनिमित्ताभावात् स्वप्नो मायेत्युक्तम् अयुक्तम्, ऐश्वर्ययोगात् संकल्पमात्रेणापि सत्यसृष्टेः संभवादित्याशङ्क्याह—

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ५ ॥

अस्य जीवस्य तिरोहितमैश्वर्यं परस्येश्वरस्य अभिध्यानात् आभिमुख्येन ध्यानात् अभिव्यक्तं भवति। कुतः, ततः तस्मात् अज्ञातादीश्वरात् बन्धः, ज्ञाताद्विपर्ययो मोक्षः इति 'ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः। तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः' इतिश्रुतिर्दर्शयति। एवं च जीवेश्वरयोरभेदेऽप्यैश्वर्यस्य तिरोहितत्वात् न जीवस्य संकल्पमात्रेण स्रष्टृत्वमिति भावः॥

ननु जीवस्यैश्वर्यतिरोभावे को हेतुरित्याशङ्क्याह—

देहयोगाद्वा सोऽपि॥ ६॥

सोऽपि जीवस्यैश्वर्यतिरोभावः देहयोगात् देहादावात्मत्वाभिमानलक्षणाविद्यावशात्, यथा भस्मयोगाद्वह्नेः प्रकाशनशक्तितिरोभावः तद्वदित्यर्थः। वाशब्दः ईश्वरत्वासंभवशङ्कानिरासार्थः, अभेदस्याम्नायसहस्रप्रसिद्धत्वात्। अतः स्वप्नप्रपञ्चस्य मायामात्रत्वेन ततो विनिर्मुक्तस्य जीवस्य स्वयंज्योतिष्ट्वसिद्धिरिति॥

इत्थं बाह्यकरणोपरमरूपं स्वप्नं जीवस्य स्वयंज्योतिष्ट्वार्थं विचार्य, अन्तःकरणोपरमरूपां सुषुप्तिं प्रतियोग्यनुयोगिभावसंगत्या विचारयति—

तद्भावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥

अत्र पूर्वपक्षे स्थानविकल्पाज्जीवस्य ब्रह्मैक्यानिर्णयः, सिद्धान्ते स्थानसमुच्चयात्तन्निर्णय इति फलभेदः । अत्र सुषुप्तिवा-

२. तदभावा- क्यानि विप्रतिपन्नानि दृश्यन्ते; 'आसु तदा
धिकरणम् । नाडीषु सृप्तो भवति' इति सुषुप्तिकाले नाडीप्रवेशः श्रूयते, क्वचित् 'ताभिः प्रत्यवसृप्य पुरीतति शेते' इति, क्वचित् 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इति । तत्र किं जीवस्य नाडीपुरीतत्परमात्मनां मध्ये यत्र क्वचित् सुषुप्तिरिति विकल्पः, उत नाडीपुरीतत्प्रवेशानन्तरं परमात्मन्येवेति समुच्चय इति संशये, एकफलत्वात् व्रीह्यादिवत् विकल्प इति पूर्वः पक्षः । सिद्धान्तस्तु---तद्भावः स्वप्नाभावः सुषुप्तिः, नाडीषु आत्मनि च इति नाड्यादीनां समुच्चय एव, न विकल्पः । स च समुच्चयो नाडीपुरीतत्प्रवेशं विना सत्संपत्तेरभावान्नाडीपुरीततोः गुणभूततया परमात्मनः प्राधान्येनावगन्तव्यः । कुतः, तच्छ्रुतेः तस्य नाड्यादीनां सुषुप्तिस्थानत्वस्य श्रुतत्वात्, उक्तसमुच्चयानङ्गीकारे श्रुतीनां संग्रहो न स्यात् इति भावः ॥

किं च---

अतः प्रबोधोऽस्मात् ॥ ८ ॥

यतः परमात्मैव सुषुप्तिस्थानम्, अत एव हेतोः अस्मात् परमात्मनो जीवस्य प्रबोध उपदिश्यते। 'सत आगम्य न विदुः सत आगच्छामहे' इति सद्रूपात् परमात्मनः सकाशात् जीवा आगच्छन्ति इति श्रवणात् अन्यस्य सुषुप्तिस्थानत्वे इदं श्रवणं बाध्येत, अन्यत्र सुप्तस्यान्यस्मात् समुत्थानायोगादिति भावः। तस्मात्सुषुप्तौ मिथ्याज्ञानाभावमात्रेणैव ब्रह्मसंपत्तेः सत्त्वान्मूलाज्ञाननिवृत्तौ साकल्येन ब्रह्मसंपत्तिरविरुद्धेति। अतो जीवस्य ब्रह्मैक्यमिति सिद्धम्॥

पूर्वं सुषुप्त्यन्ते परमात्मनः सकाशाज्जीवोत्थानश्रुतेः परमात्मैव सुषुप्तिस्थानमित्युक्तमयुक्तम्, सुप्तादन्यस्य प्रबोधसंभवेन सुप्तस्य नाड्यादिस्थानत्वसंभवादित्याक्षेपसंगत्येदमाह——

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः॥ ९॥

अत्र पूर्वपक्षे सुप्तस्यैवापुनरावृत्तिरूपमुक्तिसिद्धौ ज्ञानवैयर्थ्यम्, सिद्धान्ते त्वज्ञातब्रह्मात्मना स्थितस्याज्ञानबलेन तस्यैवोत्थानावश्यम्भावादज्ञाननाशाय ज्ञानसार्थक्यमिति फलभेदः। तत्र यः सुप्तो जीवः स एव प्रतिबुध्यते, उत स एव अन्यो वेत्यनियम इति संशये, अनियम इति पूर्वः पक्षः। सिद्धान्तस्तु— यः सुप्तो जीवः स एव प्रतिबुध्यते नान्यः। कुतः,

३. कर्मानुस्मृतिशब्दविध्यधिकरणम्।

कर्मानुस्मृतिशब्दविधिभ्यः पञ्चभ्यो हेतुभ्यः। दिनद्वयसाध्यस्य कर्मणोऽर्धं कृत्वा सुप्तः पुनरुत्थायावशिष्टमर्धं करोति । अनुशब्देन प्रत्यभिज्ञा सूच्यते, योऽहमतीतेऽप्यहनि घटमद्राक्षं स एवैतं घटं स्पृशामीत्याद्याकारा; पश्चात्स घट इत्यादिस्मरणं स्मृतिशब्देनोच्यते । 'पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव' इत्यादिश्रुतिसमूहः शब्दशब्देनोच्यते । कर्मविद्याविधयो विधिशब्देनोच्यन्ते । यदि सुप्तस्य पुनर्नोत्थानम्, तर्हि उक्तहेतवो बाध्येरन् । अतः सुप्त एवोत्तिष्ठतीति सिद्धम् ॥

पूर्वं सोऽहमिति प्रत्यभिज्ञानात् सुषुप्तप्रतिबुद्धैक्यमुक्तम् । तद्वद्विशेषाभावप्रत्यभिज्ञानात् सुषुप्तिरेव मूर्च्छेति दृष्टान्तसंगत्येदमाह—

मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ १० ॥

अत्र पूर्वपक्षे मूर्च्छातिरेकार्थं न पृथक्प्रयतितव्यम्, सिद्धान्ते पृथक्प्रयतितव्यमिति फलभेदः । अत्र किं मूर्च्छा-

४. मुग्धाधिकरणम् । वस्था सुषुप्त्यन्तर्गता, उतातिरिक्तेति संदेहे, सुषुप्त्यन्तर्गतेति पूर्वः पक्षः । सिद्धान्तस्तु—न तावत्स्वप्नजागरिते मूर्च्छावस्था, अत्र ज्ञानाभावात्; नापि मरणावस्था, प्राणोष्मणोः सत्त्वात्; नापि सुषुप्तिः, भयानकव-

दनवत्त्वादिलक्षणभेदात्; किंतु परिशेषात् प्रसक्तस्य प्रतिषेधे अन्यत्राप्रसङ्गाच्छिष्यमाणे वस्तुनि यः संप्रत्ययः स परिशेषः, तस्मात् मुग्धे मुग्धिर्मूर्च्छावस्था तदवस्थापन्ने विशेषज्ञानराहित्यादिना अर्धेन धर्मजातेन मूर्च्छावस्थायाः संपन्नत्वात् अर्धेन कम्पनादिना मरणावस्थाधर्मजातेन च युक्तत्वात् अर्धसंपत्तिः मूर्च्छावस्था सुषुप्तिव्यतिरिक्तैवेत्यनवद्यम् ॥

इत्थं चतुर्भिरधिकरणैः उद्देश्यत्वेन प्रथमं जिज्ञास्यं त्वंपदार्थं स्वप्रकाशचिदेकरसं सर्वावस्थाविनिर्मुक्तं निर्विशेषं संशोध्य, तज्जिज्ञासोपरमानन्तरमवसरसंगत्या विधेयत्वेन जिज्ञास्यं तत्पदार्थं शोधयितुं पादशेषमारभमाणो मूर्च्छावस्थायाः विरुद्धसुषुप्तिमरणावस्थोभयधर्मवत्त्ववत् ब्रह्मणोऽप्युभयरूपत्वं भवत्विति दृष्टान्तावान्तरसंगत्येदमाह—

न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥

५. उभयलिङ्गाधिकरणम्।

अत्र पूर्वपक्षे द्विरूपं ब्रह्म ध्येयम्, सिद्धान्ते निर्विशेषमेवेति फलभेदः । अत्र 'सर्वकामः सर्वगन्धः सर्वरसः' इत्यादिना ब्रह्मणः सविशेषत्वं श्रूयते, 'अस्थूलमनणु' इत्यादिना निर्विशेषत्वम् । तत्र किम्, उभयश्रुत्यनुरोधात् उभयरूपं ब्रह्म, उतैकरूपम्; एक-

रूपमित्यत्रापि सविशेषं निर्विशेषं वेति संदेहे, द्विरूपमिति पूर्वः पक्षः । सिद्धान्तस्तु— न तावत्परस्य ब्रह्मणः उभयलिङ्गम् उभयरूपत्वं संभवति, सत्यस्य वस्तुनो द्वैरूप्यायोगात् ; न ह्येकमेव वस्तु एकदा तद्वत्तदभाववच्च दृष्टम् । एतेन मूर्छावस्थादृष्टान्तो वैलक्षण्यान्निरस्तः । नापि स्थानत उपाधित उभयरूपत्वं तात्त्विकं युक्तम् , अग्निसंयोगमात्रेण जलस्थोष्णस्य तत्स्वभावत्वादर्शनात् । अत एकरूपत्वमेव ब्रह्मणः ; हि यस्मात् सर्वत्र सर्वेषु वेदान्तेषु 'अशब्दमस्पर्शमरूपम्' इत्यादिब्रह्मपरेषु सविशेषत्वनिरासेन निर्विशेषमेवैकरूपं ब्रह्मोपदिश्यत इत्यर्थः ॥

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

ननु न निर्विशेषमेव ब्रह्म । कुतः, भेदात् प्रतिविद्यं ब्रह्मण आकारभेदेन भेदात् ; कस्यांचित् विद्यायां चतुष्पाद्ब्रह्मोपदिश्यते, कस्यांचित् षोडशकलम् , कस्यांचित् त्रैलोक्यशरीरं वैश्वानराख्यम् । तस्मात् सविशेषमपि श्रुतिसामर्थ्यादङ्गीकर्तव्यमिति चेत् , न ; प्रत्येकं प्रत्युपाधि अतद्वचनात् अभेदवचनात् 'यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषः' इत्यादिश्रुतौ ब्रह्मणः सर्वोपाधिषु पृथिव्यबादिषु अभेदश्रवणादित्यर्थः ॥

अपि चैवमेके ॥ १३ ॥

अपि चैके शाखिनः 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' 'नेह नानास्ति किंचन' इत्येवं भेदनिन्दापूर्वकमभेदमेव ब्रह्मणः समामनन्ति इत्यर्थः ॥

ननु सगुणनिर्गुणपरे श्रुतिद्वये सति कथं निर्गुणे ब्रह्मणि पक्षपातः; तत्राह—

अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥

रूपादिहीनं निर्विशेषमेव ब्रह्मावधारयितव्यम्, न सविशेषम्। कुतः, 'अस्थूलम्' इत्यादिनिषेधशास्त्रस्य निर्गुणब्रह्मप्रधानत्वादित्यर्थः। उपासनावाक्यानां सविशेषत्वे तात्पर्याभावात्, तत्तात्पर्याङ्गीकारे वाक्यभेदापत्तेः, इतरेषां सविशेषवाक्यानां प्रत्यक्षादिसिद्धप्रपञ्चानुवादकत्वेन निर्विशेषपरत्वात्, 'तदनन्यत्वम्' इत्यादिना प्रपञ्चमिथ्यात्वसाधनाच्च, न सविशेषत्वं ब्रह्मणः प्रामाणिकमिति भावः ॥

ननु तर्हि सविशेषश्रुतीनां का गतिरित्यत आह—

प्रकाशवच्चावैयर्थ्यम् ॥ १५ ॥

यथा सूर्यादिप्रकाशो वक्रवंशाद्युपाधिना वक्र इव ऋजुरिव भवति, तद्वत् ब्रह्मापि पृथिव्याद्युपाधिवशात् तत्तदाकारमिव

भवति। तादृशौपाधिकाकारः सविशेषश्रुतीनां गतिरिति तासामवैयर्थ्यं निरर्थकत्वाभाव इत्यर्थः ॥

ननु कीदृशं निर्विशेषं ब्रह्मेत्यत आह—

आह च तन्मात्रम् ॥ १६ ॥

'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' इति श्रुतिः तन्मात्रं चैतन्यमात्रं स्वप्रकाशं चिदेकरसं निर्विशेषमाहेत्यर्थः ॥

किं च प्रपञ्चप्रत्याख्यानमुखेन ब्रह्मण उपदेशादपि ब्रह्म निर्विशेषमेव; सविशेषत्वे तद्वाक्यैरेव तत्सिद्धेः प्रत्याख्यानोपदेशानर्थक्यं स्यादित्याह—

दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥

'अथात आदेशो नेति नेति' इत्यादिश्रुतिः प्रपञ्चनिषेधमुखेनैव ब्रह्म दर्शयति। सौत्राथोशब्दः तथार्थः। तथा स्मर्यते च भगवद्गीतासु निषेधमुखेनैव ब्रह्म 'अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते' इति ॥

किं च विशिष्टदृष्टान्तोक्तिरपि निर्विशेषत्वमस्य गमयतीत्याह—

अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

यत एवायमात्मा चैतन्यैकरसः परप्रतिषेधोपदेश्यो निर्विशेषः, अत एवौपाधिकं सविशेषत्वमादाय सूर्यकादिवत् जलगतसूर्यप्रतिबिम्बादिवत् इत्युपमोपादीयते मोक्षशास्त्रेषु 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ।' इत्यादिषु । एवं च एतद्दृष्टान्तबलादपि ब्रह्मणो निर्विशेषत्वमिति सूत्राभिप्रायः ॥

दृष्टान्तवैषम्यं शङ्कते--

अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥

यथा अम्बु सूर्यान्मूर्तात् भिन्नं दूरस्थं मूर्तं गृह्यते, तद्वत् अमूर्तात्सर्वात्मकादात्मनो भिन्नदूरस्थोपाधेरग्रहणात् न तथात्वं न सूर्यतुल्यत्वमिति शङ्कार्थः ॥

अत्रोत्तरमाह--

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥

यथा सूर्यप्रतिबिम्बस्य जलान्तर्भूतस्य जलगतवृद्धिह्रासभाक्त्वं न वास्तवम्, एवं निर्विशेषस्य परमात्मनो देहाद्युपा-

ध्यन्तर्भावाद्देहादिगतवृद्धिह्रासभाक्त्वं न स्वाभाविकम् इत्येतावतांशेनोभयोः दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्याद्भवति सूर्यादिदृष्टान्तः । न हि दृष्टान्तदार्ष्टान्तिकयोः सर्वांशेन समत्वं शक्यते शक्रेणापि वक्तुम्, तत्त्वे तदुच्छेदादिति भावः ॥

किं च आगमैकसमधिगम्येऽर्थे न पर्यनुयोग इत्याह—

दर्शनाच्च ॥ २१ ॥

परस्य ब्रह्मणो देहान्तरानुप्रवेशस्य प्रतिबिम्बभावरूपस्य 'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्' इत्यादिश्रुतौ दर्शनात् । अतो निर्विशेषमेव चैतन्यैकरसं ब्रह्मेति सिद्धम् ॥

पूर्वं निषेधश्रुतिभिः ब्रह्म निर्विशेषं सिध्यतीत्युक्तमयुक्तम्, ताभिः ब्रह्मणोऽपि निषिद्धत्वादित्याक्षेपसंगत्येदमाह––

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥

अत्र पूर्वपक्षे ब्रह्मासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः । 'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च' इत्युपक्रम्य 'अथात आदेशो नेति नेति' इति श्रूयते । तत्र किं प्रपञ्चो ब्रह्म चेत्युभयमपि

६. प्रकृतैतावत्त्वाधिकरणम्।

निषिध्यते, उत एकम्; एकमित्यत्रापि प्रपञ्चो ब्रह्म वेति संदेहे, नियामकाभावादुभयमपीति पूर्वः पक्षः। अथवा प्रपञ्चस्य प्रत्यक्षत्वेन निषेधासंभवात् निरवधिकनिषेधायोगादेकं ब्रह्मैव निषिध्यत इति पूर्वः पक्षः। सिद्धान्तस्तु—प्रकृतं प्रधानम् एतावत्त्वम् इयत्तापरिच्छिन्नं यत् ब्रह्मणो रूपद्वयम्, तत् प्रकृतैतावत्त्वम्; तदेव प्रतिषेधति 'नेति नेति' इत्यादिश्रुतिः, इतिशब्दस्य प्रधानत्वेन प्रकृतरूपद्वयपरामर्शित्वात्। ब्रह्म तु न प्रधानत्वेन प्रकृतम्, 'द्वे वाव ब्रह्मणो रूपे' इति रूपद्वयात्मकजगदुपसर्जनत्वेनैवाभिहितत्वात्। इतश्च ब्रह्मणो न निषेधः। हि यस्मात् ततः प्रपञ्चनिषेधानन्तरं भूयः 'न ह्येतस्मादिति नेत्यन्यत्परमस्ति' इति एतस्मात् नेति नेतीत्यादिष्टात् ब्रह्मणः अन्यत् व्यतिरिक्तं नास्ति, ब्रह्मैव तु परमस्तीत्येतन्निर्वचनवाक्यं ब्रवीति। यद्वा ततः प्रपञ्चनिषेधस्य परस्तात् 'अथ नामधेयम्....' इत्यादिवाक्यं ब्रह्म ब्रवीतीत्यर्थः। न च प्रपञ्चनिषेधे प्रत्यक्षविरोधः, तस्य व्यावहारिकप्रामाण्यादित्यनवद्यम्॥

ननु यदि ब्रह्मास्ति तर्ह्युपलभ्येत तत्राह—

तदव्यक्तमाह हि ॥ २३ ॥

तत् ब्रह्म अव्यक्तं न व्यज्यते इत्यव्यक्तं प्रत्यक्षाद्यगोचरम्; हि यतः 'न चक्षुषा गृह्यते नापि वाचा' इत्यादिश्रुतिराहेत्यर्थः॥

तर्हि सर्वदा ब्रह्मग्रहणाभावे मोक्षो न स्यादित्यत आह—

अपि च संराधने प्रत्यक्षानुमा-
नाभ्याम् ॥ २४ ॥

अपि चैनं परमात्मानं संराधने समाध्यवस्थायां कृतार्थाः पश्यन्ति इति प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्याम् 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्' इत्यादिका श्रुतिः, 'यं विनिद्रा जितश्वासाः संतुष्टाः संयतेन्द्रियाः । ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥' इति स्मृतिः, ताभ्यामवगम्यत इत्यर्थः ॥

ननु जीवब्रह्मणोः ध्यातृध्येयभावाङ्गीकारे भेदः स्यादित्याशङ्क्याह—

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च
कर्मण्यभ्यासात् ॥ २५ ॥

यथा सौरः प्रकाशोऽङ्गुल्याद्युपाधौ कर्मणि भिन्न इव प्रतिभाति, वस्तुतस्त्वेकरूपः; तद्वत्प्रकाशः परमात्मापि ध्यानाद्युपाधौ कर्मणि भिन्न इव भाति, वस्तुतस्तु अवैशेष्यम् एकरूपत्वमात्मनः । कुतः, अभ्यासात् 'तत्त्वमसि' इत्याद्यभेदश्रुत्यभ्यासादित्यर्थः ॥

किं च—

अतोऽनन्तेन तथाहि लिङ्गम् ॥ २६ ॥

अतश्च भेदस्यौपाधिकत्वात् विद्यया भेदं विधूय जीवोऽनन्तेन परमात्मना एकतां गच्छति । तथाहि लिङ्गम् 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' इत्याद्यपूर्वार्थज्ञापकमित्यर्थः ॥

इत्थं जीवब्रह्मणोः पारमार्थिकाभेदमभिधाय, स्वमतपरिशुद्धये भेदाभेदवादमुपन्यस्यति—

उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २७ ॥

ध्यातृध्येयभावादिना भेदस्याभेदस्य च श्रुतौ व्यपदेशात् जीवेश्वरयोः भेदाभेदौ भवतः । तुशब्दः सिद्धान्तवैषम्यद्योतनार्थः । अहिकुण्डलवत् अहेः संस्थानविशेषो हि कुण्डलम्, तयोरहित्वेनाभेदः कुण्डलत्वेन भेदो यथा, तद्वदित्यर्थः ॥

धर्मभेदेन भेदाभेदाविति पक्षमभिधाय, एकधर्मावच्छेदेनैव भेदाभेदाविति पक्षान्तरमाह—

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥

यथा सावित्रः प्रकाशः तदाश्रयश्च सविता तयोर्नात्यन्तभेदः, तेजस्त्वाविशेषात्; तथापि भेदश्च प्रतीयते; एवं च एकतेज-

स्त्वावच्छेदेनैव प्रमाणबलात् भेदाभेदौ, तद्वज्जीवेश्वरयोर्भेदाभेदावित्यर्थः ॥

ननु भेदस्य पारमार्थिकत्वे ज्ञाननिवर्त्यत्वासंभवान्मोक्षो न स्यात्, एकधर्मावच्छेदेन भेदाभेदयोरेकत्राङ्गीकारे लोके विरोधकथैव न स्यात् इत्यादिदोषजातं परमते मत्वा, निरवद्यं स्वसिद्धान्तमाह—

पूर्ववद्वा ॥ २९ ॥

'प्रकाशादिवच्चावैशेष्यम्' इत्यत्र पूर्वं भेदः काल्पनिकः अभेदः पारमार्थिकः इति यदुक्तम्, स एव सिद्धान्तोऽभ्युपेयः ॥

किं च—

प्रतिषेधाच्च ॥ ३० ॥

'नान्योऽतोऽस्ति द्रष्टा' इत्यादिना शास्त्रेण परमात्मव्यतिरिक्तस्य चेतनस्य, 'नेति नेति' इत्यादिना शास्त्रेण प्रपञ्चस्य च प्रतिषेधात् ब्रह्माद्वितीयमित्ययमेव सिद्धान्तः। तस्मात् श्रुतिबलात् निर्विशेषमेकमेव ब्रह्मेति सिद्धम् ॥

पूर्वम् 'नेति नेति' इति ब्रह्मातिरिक्तं वस्तु निषेध्यमित्युक्तमयुक्तम्; ब्रह्मणः सेतुत्वोन्मानादिव्यपदेशेन वस्त्वन्तरस-

त्त्वावगमात् द्युभ्वाद्यधिकरणे सेतुत्वस्य गौणत्वेन नीतत्वेऽपि उन्मानादीनां गतेरदर्शनादित्याक्षेपसंगत्येदमाह—

परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३१ ॥

अत्र पूर्वपक्षे उन्मानादिश्रुतीनां मुख्यत्वात्सविशेषं ब्रह्मेति फलम्, सिद्धान्ते तु उक्ताद्वितीयब्रह्मसिद्धिरिति विवेकः ।

७. पराधिकरणम् । अत्र ब्रह्मातिरिक्तं वस्त्वस्ति न वेति संदेहे, पूर्वः पक्षः— अतः अस्मात् ब्रह्मणः सकाशात् परं वस्त्वस्ति; 'अथ य आत्मा स सेतुः' इति ब्रह्मणः सेतुत्वव्यपदेशात्, तथा 'ब्रह्म चतुष्पात्' इति श्रुतौ उन्मानव्यपदेशात्, एतावदिदमिति परिच्छिन्नत्वव्यपदेशात्, सुषुप्तौ 'प्राज्ञेनात्मना संपरिष्वक्तः' 'शारीर आत्मा' इत्यादिना ब्रह्मणः संबन्धव्यपदेशात्, आदित्ये हिरण्मयं पुरुषमीश्वरं व्यपदिश्य ततो भेदेन अक्षिस्थपुरुषस्य व्यपदेशात्; तस्मात् सद्वितीयं ब्रह्मेति सिद्धम् ॥

एवं पूर्वपक्षे सिद्धान्तः—

सामान्यात्तु ॥ ३२ ॥

तुशब्दः पूर्वपक्षनिरासार्थः । मृद्दार्वादिमये हि सेतुशब्दो रूढो लोके, न हि ब्रह्मणस्तादृशं सेतुत्वमस्ति । किं तु यथा

सेतोर्जलव्यवस्थापकत्वम्, एवं ब्रह्मणोऽपि जगन्मर्यादाव्यवस्थापकत्वेन प्रसिद्धसेतुसामान्यात् साम्यात् सेतुत्वव्यपदेश इत्यर्थः ॥

उन्मानव्यपदेशोऽपि न मुख्य इत्याह––

बुद्ध्यर्थः पादवत् ॥ ३३ ॥

'ब्रह्म चतुष्पात्' इति श्रुतौ उन्मानव्यपदेशो बुद्ध्यर्थः उपासनार्थः, निर्विशेषस्य बुद्धिस्थत्वायोगात् । उपासनाद्वारा बुद्धिस्थस्य उन्मानव्यपदेशो न मुख्यः । पादवत् यथा ब्रह्मप्रतीकस्य मनसो वाग्घ्राणचक्षुःश्रोत्राणामुपासनार्थं पादत्वेन व्यपदेशः, तद्वदित्यर्थः ॥

संबन्धभेदव्यपदेशावपि न मुख्यावित्याह—

स्थानविशेषात्प्रकाशादिवत् ॥ ३४ ॥

स्थानविशेषात् स्थानमुपाधिः बुद्ध्यादिः तद्विशेषात् प्राप्तस्य भेदस्योपाध्युपशमात् य उपशमः स एव प्राज्ञेनात्मना जीवस्य सुषुप्तौ संबन्ध इत्युपाध्यपेक्षयोपचर्यते । अक्ष्यादित्यपुरुषयोर्भेदव्यपदेशोऽप्यक्ष्यादित्यरूपस्थानविशेषापेक्षयोपचर्यते । प्रकाशादिवत् यथा सौरालोकादेरङ्गुल्याद्युपाधियोगात् उपजातभेदस्योपाध्युपशमात् संबन्धव्यपदेशः, उपाधिभेदाच्च भेदव्य-

पदेशः, तद्वदित्यर्थः ॥

ननु मुख्यावेव संबन्धभेदौ किं न स्यातामित्यत आह—

उपपत्तेश्च ॥ ३५ ॥

न मुख्यसंबन्धो जीवपरयोः सुषुप्तौ भवति, 'स्वमपीतो भवति' इति स्वरूपस्यैव संबन्धत्वव्यपदेशोपपत्तेः; तथा भेदोऽपि न मुख्यः, श्रुतिसहस्रविरोधात्—इत्युपपत्तेश्चेत्यर्थः ॥

इत्थं सेतुत्वादीन् भेदहेतून् निराकृत्य, ब्रह्मणोऽद्वितीयत्वं हेत्वन्तरेणाह—

तथान्यप्रतिषेधात् ॥ ३६ ॥

यथा सेतुत्वादिहेतुभ्यो न वस्त्वन्तरप्रतिपत्तिः, तथा 'आत्मैवाधस्तात्' इत्यादिवाक्यैः अन्यस्य वस्तुनः प्रतिषेधात् अद्वितीयमेव ब्रह्मेत्यर्थः ॥

ननु ब्रह्मणोऽद्वितीयत्वे कथं सर्वगतत्वमत आह—

**अनेन सर्वगतत्वमायामशब्दा-
दिभ्यः ॥ ३७ ॥**

अनेन सेतुत्वादिव्यपदेशमुख्यत्वस्य वस्त्वन्तरस्य च प्रतिषेधेन ब्रह्मणः सर्वगतत्वं सिद्धम् । अप्रतिषेधे प्रसिद्धसेतुवत्

ब्रह्मणो सर्वगतत्वं प्रसज्येत। कस्मात्पुनः सर्वगतत्वम्? आयामशब्दादिभ्यः आयामशब्दो व्यापकत्ववाचकः 'आकाशवत् सर्वगतश्च नित्यः' इत्यादिशब्दः, आदिशब्देन 'नित्यः सर्वगतः स्थाणुः' इत्यादिरुक्तः। तस्मादद्वितीयस्य ब्रह्मणः आविद्यकं सर्वमादाय श्रुतिस्मृतिभ्यां सर्वगतत्वं सिद्धम् ॥

ननु ब्रह्मातिरिक्तस्य वस्तुनो निषेधे ब्रह्मणो निर्विशेषत्वेन फलदातृत्वं न स्यादित्याक्षेपसंगत्येदमाह—

फलमत उपपत्तेः ॥ ३८ ॥

अत्र पूर्वपक्षे फलदातुरीश्वरस्य तत्पदवाच्यस्यासिद्धेः लक्ष्यासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र किं

८. फलाधिकरणम्। सर्वस्य जन्तोः कर्मण एव फलं भवति, उतेश्वरादिति संदेहे, कर्मण इति पूर्वः पक्षः। सिद्धान्तस्तु— अतः अस्मात्परमेश्वरात् फलं सर्वस्य जन्तोर्भवितुमर्हति, क्षणिकात्कर्मणः फलासंभवेनेश्वरस्यैव फलदातृत्वोपपत्तेरित्यर्थः ॥

श्रुतत्वाच्च ॥ ३९ ॥

'स वा एष महानज आत्मान्नादो वसुदानः' इति ईश्वरे फलहेतुत्वस्य श्रुतत्वाच्चेश्वरः फलदातेत्यर्थः ॥

शङ्कते—

धर्मं जैमिनिरत एव ॥ ४० ॥

यतः श्रुत्युपपत्तिभ्याम् ईश्वरं फलदातारं मन्यते सिद्धान्ती, अत एव श्रुत्युपपत्तिभ्यां धर्मं फलदातारं जैमिनिराचार्यो मन्यते। तथाहि— 'स्वर्गकामो यजेत' इति विधिविषयस्य यागस्य स्वर्गसाधनत्वं श्रुतम्; तन्निर्वाहाय श्रुतिप्रामाण्यादपूर्वाख्यो व्यापारो यागस्योत्तरावस्थारूपः कल्पनीय इति यागादिधर्म एव फलदाता, ईश्वरस्य सर्वसाधारणस्य विचित्रफलदातृत्वानुपपत्तेरिति ॥

समाधत्ते—

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥

तुरुक्तशङ्कानिरासार्थः। पूर्वं पूर्वोक्तमीश्वरं फलदातारं बादरायणस्त्वाचार्यो मन्यते। कर्म अपूर्वं वा स्वस्वरूपस्वविनियोगसाक्षात्कारवदधिष्ठितं भवितुमर्हति, अचेतनत्वात् मृदादिवत् इत्यनुमानेन संभाविते्ऽर्थे श्रुतिस्मृती प्रमाणयति— हेतुव्यपदेशात् 'एष ह्येव साधु कर्म कारयति....' 'अन्नादो वसुदानः' इति श्रुत्या, 'लभते च ततः कामान्मयैव विहितान्हितान्' इत्यादिस्मृत्या च ईश्वरस्य धर्माधर्मयोस्तत्फले च

हेतुत्वेन व्यपदेशादित्यतस्तत्तत्कर्मसापेक्षादीश्वरादेव सर्वेषां फलसिद्धिः । तदेवमधिकरणचतुष्टयेन निर्विशेषः स्वप्रकाशो निषेधाविषयोऽद्वितीयः शाखाचन्द्रन्यायेन कर्मफलदातृत्वेनोपलक्षितः तत्पदार्थः परमात्मा शोधित इति तत्त्वंपदार्थौ शोधिताविति स्थितम् ॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्व-
प्रकाशिकायां तृतीयाध्यायस्य
द्वितीयः पादः ॥

ॐ

तृतीयः पादः ॥

इत्थं पूर्वपादे वाक्यार्थज्ञानकरणभूततत्त्वंपदार्थनिरूपणमकारि; अधुना वाक्यार्थो निर्धार्यते— इति हेतुहेतुमद्भावसंगत्या अयं तृतीयः पाद आरभ्यते। सगुणविद्यायाश्चित्तैकाग्र्यद्वारा निर्गुणवाक्यार्थज्ञानोपयोगित्वात्तद्वाक्यार्थचिन्ता क्रियत इति मन्तव्यम्। तत्र तावत् पञ्चाग्निप्राणदहरशाण्डिल्यवैश्वानरोपासनास्वरूपमाह—

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

अस्य पादान्तरत्वात् नाव्यवहिताधिकरणेन संगत्यपेक्षा। अत्र पूर्वपक्षे उपासनाभेदात् गुणानुपसंहारः, सिद्धान्ते त्वभेदादुपसंहार इति फलभेदः। अत्र तु उक्तोपासनानि किं प्रतिशाखं भिद्यन्ते, उत नेति संदेहे, नामरूपादिभेदात् भिद्यन्त इति पूर्वः पक्षः। सिद्धान्तस्तु— सर्वैर्वेदान्तैः प्रत्ययं प्रतीयमानान्युपासनानि न भिद्यन्ते। कुतः, चोदनाद्यविशेषात्,

१. सर्ववेदान्तप्रत्ययाधिकरणम्।

आदिपदेन कर्मभेदहेतुत्वेनोपन्यस्ताः संयोगरूपसमाख्या गृह्यन्ते, चोदनासंयोगरूपसमाख्यानामविशेषात्। तत्र यथा सर्वशाखासु ‘अग्निहोत्रं जुहुयात्’ इति चोदनाया अविशेषात् नित्याग्निहोत्रमेकमेव, तथा ‘यो ह वै ज्येष्ठं च श्रेष्ठं च प्राणं वेद’ इत्यादिचोदनायाः छन्दोगानां वाजसनेयिनां चाविशिष्टत्वात् एकैव प्राणविद्या सर्वेषां शाखिनामिति गम्यते। यः प्राणोपासकः, सः ‘ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति’ इति फलसंयोगस्य सर्वत्राविशिष्टत्वाच्च न विद्याभेदः ; ज्येष्ठत्वादिगुणकप्राणस्योपास्यरूपस्य सर्वत्राविशिष्टत्वाच्च तथा प्राणविद्येति समाख्यायाः सर्वत्राविशिष्टत्वाच्च न विद्याभेद इति सिद्धम् ॥

भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥

ननु वाजसनेयिनः पञ्चाग्निविद्यायाः ‘तस्याग्निरेवाग्निर्भवति’ इति षष्ठं प्रसिद्धाग्निमुपास्यत्वेनामनन्ति; छन्दोगास्तु ‘पञ्चाग्नीन्वेद’ इति। तथा च रूपभेदादामिक्षावाजिनयागयोरिव शाखाद्वये पञ्चाग्निविद्यायाः भेदो नैक्यमिति चेत्, न। यतः एकस्यामपि विद्यायामयं रूपभेद उपपद्यते। तथाहि—ये द्युलोकादयः पञ्चाग्नयो वाजसनेयशाखायामुक्ताः, त एव छान्दोग्ये प्रत्यभिज्ञायन्ते ; तथा च न विद्याभेदो युक्तः ; न च षष्ठाग्नितदभावाभ्यां भेदः; एकस्मिन्नेवातिरात्रे षोडशि-

ग्रहणतदभावयोर्दर्शनात् । यद्वा अनेकगुणप्रत्यभिज्ञानुरोधाच्छान्दोग्ये षष्ठाग्नेरनुपसंहारः कर्तव्यः । न चाग्निषु पञ्चत्वसंख्याश्रवणविरोधः, तस्य सांपादिकाग्निपरत्वादिति भावः ॥

ननु ब्रह्मविद्याप्रतिपादकमुण्डकाध्ययने शिरोव्रताख्यधर्मो विहितः नान्यत्र ; अतो धर्मभेदाद्विद्याभेद इत्याशङ्क्याह—

स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

स्वाध्यायस्यैव शिरोव्रताख्यधर्मोऽङ्गं न विद्यायाः । कुतः, तथात्वेन हि यतः स्वाध्यायाङ्गत्वेन समाचारे वेदव्रतोपदेशपरे ग्रन्थे शिरोव्रतमपि वेदव्रतत्वेनाथर्वणिकाः समामनन्ति । अधिकाराच्च 'नैतदचीर्णव्रतोऽधीते' इत्यत्रत्यादधिकृतविषयादेतच्छब्दात्, चकारादधीत इत्यध्ययनशब्दाच्च शिरोव्रतमध्ययनस्यैवाङ्गम् । तत्र दृष्टान्तः, सववच्च तन्नियमः यथा सवाः सप्त होमाः सौर्यादयः शतौदनान्ताः शाखान्तरोक्तत्रेताग्न्यनभिसंबन्धात् आथर्वणोक्तैकाग्निसंबन्धाच्चैकाग्नीनामाथर्वणिकानामेव नियम्यन्ते, तद्वत्तन्नियमः मुण्डकाध्ययन एव तस्य शिरोव्रतस्य नियमः । तस्मात्सर्वत्र विद्यैक्यमनवद्यम् ॥

किं च—

दर्शयति च ॥ ४ ॥

'सर्वे वेदा यत्पदमामनन्ति' इति वाक्यं निर्गुणस्य ब्रह्मणो वेद्यस्य सर्ववेदान्तेषु एकत्वेन तद्विद्यायाः सर्वत्रैकत्वं दर्शयति । तथा वाजसनेयके सगुणस्य ब्रह्मणो वैश्वानरस्य प्रादेशमात्रत्वेन संपादितस्य छान्दोग्ये सिद्धवदुपादानम् 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' इति, तदपि सर्वत्र वैश्वानरविद्याया एकत्वं दर्शयति। एवं च सगुणस्य निर्गुणस्य वा ब्रह्मण एकत्वेन सर्वत्र श्रूयमाणत्वात् तत्तद्विद्याया एकत्वम् । तथा शस्त्रविशेषरूपोक्थादीनामेकत्वेन सर्वत्र श्रूयमाणत्वात् इदमवगम्यते— तदुपासनानामपि ऐक्यमिति । तत्समभिव्याहारादितरेषामप्युपासनानामप्यभेद इति सिद्धम् ॥

पूर्वं सर्वशाखासु विद्यैक्यमवादि, अधुना तत्फलमुच्यत इति फलफलिभावसंगत्येदमाह—

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥

अत्र पूर्वपक्षे पूर्वाधिकरणस्य विवक्षितफलासिद्धिः, सिद्धान्ते तस्य तत्सिद्धिरिति फलभेदः । सर्वत्रोपासनानामेकत्वेऽप्येकशाखास्थविद्यायां शाखान्तरस्थाधिकगुणानामुपसंहारोऽस्ति न वेति संदेहे,

२. उपसंहाराधिकरणम् ।

यत्र यावन्तो गुणाः श्रुताः तैरेवाकाङ्क्षाशान्तेर्नोपसंहार इति पूर्वः पक्षः। सिद्धान्तस्तु— समाने उपासने गुणोपसंहारो युक्तः। कुतः, अर्थाभेदात् उपास्यगुणैर्निर्वर्त्यस्य उपासनारूपार्थस्य सर्वशाखास्वभिन्नत्वात्। तत्र दृष्टान्तः—विधिशेषवत् यथाग्निहोत्रस्य सर्वत्रैक्यात् तच्छेषाणामुपसंहारः, तद्वदित्यर्थः॥

पूर्वम् 'चोदनाद्यविशेषात्' इत्यत्र समाख्याया अविशेषाद्विद्यैक्यमित्युक्तम्, तर्हि अत्राप्युद्गीथविद्येति समाख्याया अविशेषाद्विद्यैक्यमेवेति दृष्टान्तसंगत्येदमाह—

अन्यथात्वं शब्दादिति चेन्नाविशेषात्॥ ६॥

अत्र पूर्वपक्षे मिथो गुणोपसंहारः, सिद्धान्ते विद्यैक्यापवादादनुपसंहार इति फलभेदः। वाजसनेयके पठ्यते—'अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्' इति; तथा छान्दोग्येऽपि 'अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे' इति मुख्यप्राणपरिग्रहः कृतः इत्युभयत्रापि प्राणविद्याविधिरवसीयते। किमत्र विद्यैक्यम्, आहोस्विद्विद्याभेद इति संशये, विद्यैक्यमिति पूर्वः पक्षः। ननु अन्यथात्वं न विद्यैक्यं

३. अन्यथात्वाधिकरणम्।

भवितुमर्हति। कुतः, 'त्वं न उद्गाय' इति उद्गीथकर्तृत्वेन एकत्र, अन्यत्र 'तमुद्गीथमुपासांचक्रिरे' इत्युद्गीथत्वेन प्राणस्योपास्यत्वप्रतिपादकात् शब्दात् इति चेत्, नैतावता विद्याभेदः। कुतः, देवासुरसंग्रामोपक्रमासुरात्ययाभिप्रायप्रभृतीनामुभयत्राविशेषात्। अतो विद्यैक्यमिति सिद्धम्॥

एवं पूर्वपक्षे, राद्धान्तः—

न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्॥ ७॥

नैव विद्यैक्यं युक्तम्। कुतः, प्रकरणभेदात् एकत्र 'ओमित्येतदक्षरमुद्गीथमुपासीत' इति उद्गीथावयव ओंकारे प्राणदृष्टिरुपदिश्यते, अन्यत्र तु 'त्वं न उद्गाय' इति या सकलैव सामभक्तिः तस्याः कर्तोद्गाता प्राणत्वेनावेद्यते इत्युपक्रमभेदात्। तत्र दृष्टान्तः—परोवरीयस्त्वादिवत्। यथा परमात्मदृष्ट्यध्याससाम्येऽपि 'स एष परोवरीयानुद्गीथः' इति परोवरीयस्त्वादिविशिष्टमुद्गीथोपासनम् अक्ष्यादित्यगतहिरण्यश्मश्रुत्वादिविशिष्टोद्गीथोपासनात् भिन्नम्, तद्वत्॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि॥ ८॥

ननु उद्गीथविद्येत्युभयत्र संज्ञातः संज्ञाया एकत्वाद्विद्ये-

क्यमिति चेत्, तदुक्तम् 'न वा प्रकरणभेदात्....' इति सूत्रे। अस्ति तु तत् संज्ञैकत्वं प्रसिद्धभेदानामप्यग्निहोत्रप्रभृतीनां काठकैकग्रन्थपठितानां काठकत्वसंज्ञैकत्वम् ॥

पूर्वम् 'ओमित्येतदक्षरमुद्गीथम्' इत्यत्र ओंकारोद्गीथयोः विशेषणविशेष्यभावं सिद्धवत्कृत्य प्रक्रमभेदाद्विद्याभेदः सिद्धान्तितः; स न युक्त इत्याक्षेपसंगत्येदमाह—

व्याप्तेश्च समञ्जसम् ॥ ९ ॥

अत्र पूर्वपक्षे पूर्वोक्तसिद्धान्तासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र 'ओमित्येतदक्षरमुद्गीथम्' इत्योंकारोद्गीथ-

४. व्याप्त्यधिकरणम्।

शब्दयोः सामानाधिकरण्यं श्रूयते; तत्किं नाम ब्रह्मेतिवत् अध्यासार्थम्, उत यद्रजतं सा शुक्तिः इतिवत् अपवादार्थम्, आहोस्वित् सिन्धुरः करीतिवत् ऐक्यप्रमित्यर्थम्, उताहो नीलोत्पलमितिवत् विशेषणविशेष्यभावनिबन्धनमिति संशये, निर्धारणे कारणाभावादनिर्धारितार्थकमिदमिति पूर्वः पक्षः। सिद्धान्तस्तु— ओंकारस्य ऋग्यजुःसामसु त्रिषु व्याप्तेः व्याप्तत्वात् क ओंकार उपास्य इत्यपेक्षायामुद्गीथावयवत्वेन ओंकारो विशेष्यते— 'ओमित्येतदक्षरमुद्गीथमुपासीत' इति। एवं च उद्गीथमित्योंकारस्य विशेषणमित्येव समञ्जसं निरवद्यम्। सौत्रच-

शब्देन तुशब्दस्थाननिवेशिना अध्यासापवादैक्यपक्षाणां निरासः। न तावदध्यासपक्षः, तस्योत्तरत्र विधीयमानोपास्त्यपेक्षया स्वतन्त्रोपास्तित्वेन पृथक्फलकल्पनाप्रसङ्गात्, विशेषणपक्षे तु न पृथक्फलकल्पनाप्रसङ्गः; नाप्यपवादपक्षः, ओंकारोद्गीथयोरन्यतरज्ञानस्य बाधकत्वादर्शनात्; नाप्यैक्यपक्षः, ओंकारोद्गीथयोः पर्यायत्वाभावात्। अतः परिशेषाद्विशेषणपक्ष एव श्रेयानिति सिद्धम्॥

पूर्वमुद्गीथत्वविशेषणात् ओंकारस्य सर्ववेदव्याप्तिव्यावृत्तिवत् 'एवं विद्वान्' इति प्रकृतगुणमात्रग्राहकैवंशब्दाच्छाखान्तरगुणव्यावृत्तिरिति दृष्टान्तसंगत्येदमाह—

सर्वाभेदादन्यत्रेमे॥ १०॥

अत्र पूर्वपक्षे गुणानुपसंहारः, सिद्धान्ते उपसंहार इति फलभेदः। अत्र वाजसनेयके छान्दोग्ये च प्राणविद्यायां वा-

५. सर्वाभेदाधिकरणम्।

गादयो वसिष्ठत्वादिगुणाः श्रूयन्ते, न कौषीतक्यादिशाखासु। तत्र किं वसिष्ठत्वादिगुणाः अन्यत्रोक्ताः अन्यत्र नोपसंह्रियन्ते, उतोपसंह्रियन्ते इति संदेहे, नोपसंहर्तव्या इति पूर्वः पक्षः। सिद्धान्तस्तु—अन्यत्र वसिष्ठत्वादिगुणानामश्रवणस्थले इमे वसिष्ठत्वादयो गुणा उपसंहर्तव्याः। कस्मात्, सर्वाभेदात् सर्वासु शाखासु

प्राणसंवादस्थायाः प्राणविद्यायाः अभिन्नत्वात्। अत एव प्रकृतगुणानामिव अप्रकृतगुणानामपि बुद्धिस्थतया एवंशब्द-ग्राह्यत्वात् सर्वे सर्वत्रोपसंहर्तव्या इति सिद्धम् ॥

ननु प्राणस्य सविशेषत्वात् भवतु शाखान्तरीयवसिष्ठत्वाद्युपसंहारः; ब्रह्मणस्तु निर्विशेषत्वात् स्वशाखागतधर्मैरेव प्रमितिसिद्धेः न शाखान्तरगतानन्दाद्युपसंहार इति प्रत्युदाहरणसंगत्येदमाह—

आनन्दादयः प्रधानस्य ॥ ११ ॥

अत्र पूर्वपक्षे आनन्दादिगुणानुपसंहारात् वाक्यार्थानिर्धारणम्, सिद्धान्ते तन्निर्धारणमिति फलभेदः। अत्र निर्गुणब्रह्म-

६. आनन्दाद्यधिकरणम्।

परासु श्रुतिषु आनन्दस्वरूपत्वादयो धर्माः क्वचित् क्वचित् श्रूयन्ते; ते किं सर्वत्रोपसंहर्तव्याः, उत नेति संदेहे, नोपसंहर्तव्या इति पूर्वः पक्षः। सिद्धान्तस्तु— प्रधानस्य ब्रह्मण आनन्दादयः आनन्दस्वरूपत्वादयो धर्माः सर्वत्रोपसंहर्तव्याः, सर्वशाखासु वेद्यस्य ब्रह्मण एकत्वेन विद्याया एकत्वादित्यर्थः ॥

ननु यदि ब्रह्मण एकत्वादानन्दाद्युपसंहारः, तर्हि प्रियशिरस्त्वादिधर्मोपसंहारोऽपि स्यादित्याशङ्क्याह—

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

प्रियशिरस्त्वादिधर्माणां न सर्वत्र प्राप्तिः; हि यस्मात् प्रियमोदप्रमोदानन्दानां परस्परापेक्षया उपचयापचयौ वृद्धिक्षयावनुभूयेते । तौ च धर्मिभेदे सत्येव स्वाभाविकौ भवतः, ब्रह्मणस्तु निर्भेदत्वात् । एतेन संयद्वामत्वादयो ब्रह्मधर्मा व्याख्याताः, तेषामप्युपास्यगुणत्वाविशेषात् ॥

ज्ञानोपयोगित्वात् आनन्दादीनां संयद्वामत्वादिधर्मेभ्यो वैषम्यमाह—

इतरे त्वर्थसामान्यात् ॥ १३ ॥

उपास्यधर्मापेक्षया इतरे तु आनन्दादयो धर्माः ज्ञानैकफलाः सर्वत्रोपसंह्रियन्ते । कुतः, अर्थसामान्यात् अर्थस्य प्रतिपाद्यस्य ब्रह्मणः सामान्यात् एकत्वादित्यर्थः । एवं च अन्तरेण गुणोपसंहारं यथावद्ब्रह्मस्वरूपविषयकमहावाक्यार्थज्ञानसाध्याया अविद्यानिवृत्तेरसंभवात् सर्वत्रानन्दादय उपसंहर्तव्या इति सिद्धम् ॥

पूर्वत्र ब्रह्मस्वरूपाणामानन्दादीनामुपसंहार्याणां ब्रह्मज्ञानोपायत्वमभिहितम्; अधुना तु अब्रह्मस्वरूपस्यानुपसंहार्यस्यार्थादिपरत्वरूपधर्मस्य प्रज्ञानोपायत्वमभिधीयत इत्येकफलत्वसंगत्येदमाह—

आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

अत्र पूर्वपक्षे वाक्यभेदाद्विद्याभेदः, सिद्धान्ते वाक्यैक्याद्विद्यैक्यमिति फलभेदः। कठवल्लीषु पठ्यते—— 'इन्द्रियेभ्यः परा ह्यर्थाः' इत्यारभ्य 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इति।

७. आध्यानाधिकरणम्।

तत्र किम् इमानि वाक्यानि भिन्नानि, उत आत्मपरमेकमेव वाक्यमिति संदेहे, प्रतिपाद्यभेदात् भिन्नानीति पूर्वः पक्षः। सिद्धान्तस्तु—— आध्यानाय ध्यानसाध्यसाक्षात्काराय पुरुष एवार्थादिभ्यः सर्वेभ्यः परत्वेन प्रतिपाद्य इत्येकमेव वाक्यम्। न त्विन्द्रियपरत्वे अर्थादयः प्रतिपाद्याः, प्रयोजनाभावात्। न हि इन्द्रियपरत्वेनार्थज्ञानं स्वतः किंचित्प्रयोजनं जनयति। अतः प्रतिपाद्यभेदाभावान्न वाक्यभेदः॥

इत्थं वाक्यस्यात्ममात्रपरत्वे फलवत्त्वं लिङ्गमभिधाय, अपूर्वत्वमपि लिङ्गमाह——

आत्मशब्दाच्च ॥ १५ ॥

'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः।' इति प्रकृतपुरुषे आत्मशब्दश्रवणाच्च आत्मपरमेवेदं वाक्यम्, तस्यात्मनः श्रुत्या मानान्तरावेद्यत्वरूपापूर्वत्वप्रतिपादनादिति भावः॥

पूर्वं वाक्यभेदमभिधाय, अर्थादीनां पृथक्प्रतिपाद्यत्वं नास्तीत्यभिहितम्; तद्वत् 'प्रजापते रेतो देवाः' इति पूर्ववाक्ये हिरण्यगर्भस्य प्रकृतत्वाद्वाक्यभेदभिया स एवात्मशब्देनाभिधीयत इति दृष्टान्तसंगत्येदमाह—

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

अत्र पूर्वपक्षे आत्मपदस्य परमात्मपरत्वाभावात् तत्प्रमित्यर्थं न आनन्दादिधर्माणामत्रोपसंहारः, सिद्धान्ते परमात्मन एव अत्रोक्तत्वात् तत्प्रमित्यर्थं तदुपसंहार इति फलभेदः। ऐतरेयके श्रूयते—'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्' इत्यादि। तत्र किमात्मशब्देन हिरण्यगर्भ उच्यते, उत परमात्मेति संदेहे, हिरण्यगर्भ इति पूर्वः पक्षः। सिद्धान्तस्तु— अस्मिन् सृष्टिवाक्ये आत्मशब्देन परमात्मन एव गृहीतिः ग्रहणं नान्यस्य। इतरवत् यथा इतरेषु सृष्टिवाक्येषु 'आत्मन आकाशः संभूतः' इत्यादिषु आत्मशब्देन परमात्मन एव ग्रहणम्, तद्वदत्रापि। कुतः, उत्तरात् 'स ईक्षत लोकान्नु सृजा इति' 'स इमाँल्लोकानसृजत' इति ईक्षणपूर्वकस्रष्टृत्वरूपोत्तरविशेषणादित्यर्थः। तच्च विशेषणं परमात्मन्येव मुख्यत्वेन श्रुत्यन्तरेष्ववगतमिति भावः॥

८. आत्मगृहीत्यधिकरणम्।

पूर्वपक्षबीजमनूद्य दूषयति—

अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥

लोकसृष्टिवाक्यपर्यालोचनया हिरण्यगर्भ एव वाक्यान्वयात् न परमात्मग्रहणं युक्तमिति चेत्, अत्राह— परमात्मन एव ग्रहणं युक्तं स्यात्। कुतः, अवधारणात् 'आत्मा वा इदमेक एवाग्र आसीत्' इति सृष्टेः प्रागेकत्वावधारणस्य परमात्मन्येव समञ्जसत्वात्। ततश्च अत्र शाखान्तरोक्तभूतसृष्टिरुपसंहर्तव्येत्यदोषः। इति प्रथमं वर्णकम् ॥

पूर्वत्र वाक्यैक्यबलात् अर्थादिपरत्वं परित्यज्य विद्यैक्यमवादि, इह तूपक्रमभेदेन वाक्यभेदाद्विद्यैक्यं न स्यात् इति प्रत्युदाहरणसंगत्येदमाह— **आत्मगृहीतिरितरवदुत्तरात्** ॥ अत्र पूर्वपक्षे विद्याभेदाद्गुणानुपसंहारः, सिद्धान्ते तदभेदात्तदुपसंहार इति फलभेदः। बृहदारण्यके 'कतम आत्मा' इत्यात्मशब्देन उपक्रम्य 'स वा एष महानज आत्मा' इत्यात्मशब्देन उपसंहृतम्; छान्दोग्ये तु 'सदेव सोम्येदमग्र आसीत्' इति विनैवात्मशब्दं सन्मात्रत्वेनोपक्रम्य 'स आत्मा तत्त्वमसि' इति उपसंहृतम्। तत्र किम् अनयोर्वाक्ययोस्तुल्यार्थत्वम्, उत भिन्नार्थत्वमिति संशये, भिन्नार्थत्वमिति पूर्वः पक्षः। सिद्धान्तस्तु— छान्दोग्ये सत्पदेन आत्मन एव गृहीतिः ग्रहणम्; इतरवत् बृहदारण्यके आत्मप-

देन आत्मग्रहणवत्। कुतः, उत्तरात् ‘स आत्मा’ इत्युपसंहारबलात् । अत उभयत्र तुल्यार्थत्वमित्यर्थः ॥

अन्वयादिति चेत्स्यादवधारणात् । ननु उपसंहारबलात् सत्पदेन आत्मगृहीतिरित्यसंगतम्, उपसंहारस्योपक्रमान्वयात् उपक्रमपरतन्त्रत्वादिति चेत्तत्राह— सत्पदेन आत्मगृहीतिर्युक्ता स्यात् । कुतः, ‘सदेव’ इत्यद्वितीयत्वावधारणात् इत्यर्थः । इति द्वितीयं वर्णकम् ॥

पूर्वत्र संदिग्धसदुपक्रमस्य वाक्यशेषान्निर्णयवत् ‘आचामन्ति’ इति वर्तमानापदेशस्य विधित्वसंदेहे, ‘आचामेत्’ इति वाक्यशेषात् विधित्वनिर्णय इति दृष्टान्तसंगत्येदमाह—

कार्याख्यानादपूर्वम् ॥ १८ ॥

अत्र पूर्वपक्षे प्राणविद्याङ्गत्वेन अपूर्वस्याचमनस्य विधेयत्वात् तस्यान्यत्र प्राणविद्यायामुपसंहारः, सिद्धान्ते तु अनुप-

९. कार्याख्यानाधिकरणम् ।

संहार इति फलभेदः । बृहदारण्यकच्छान्दोग्ययोरुभयत्र ‘एवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते’ इति श्रूयते । तत्राचमनमनग्नताचिन्तनं च प्रतीयते; तत्रोभयविधाने वाक्यभेदभयादेकमेव विधेयम ; तदेकं किमाचमनम्, उतानग्नताचिन्तनमिति संशये, आचमनमिति पूर्वः पक्षः । सिद्धान्तस्तु––अनग्नताचि-

न्तनमेवापूर्वं प्राणविद्याङ्गत्वेन विधेयम्, नाचमनम्। कुतः, कार्याख्यानात् 'द्विजो नित्यमुपस्पृशेत्' इत्यादिना स्मार्तविधिना सकलानुष्ठानाङ्गत्वेन शुद्ध्यर्थं कार्यस्याचमनस्य प्राणविद्यायामपि विधिप्राप्तस्याख्यानादनग्नताविधानार्थमनुवादादित्यर्थः ॥

पूर्वत्र प्राप्ताचमनानुवादेनानग्नताचिन्तनं विधेयमित्युक्तम्; इह तु एकशाखायां विप्रकृष्टदेशस्थवाक्ययोरेकस्यानुवादकत्वमन्यस्य विधायकत्वमिति अनिश्चयादुभयोरपि स्वनिकटस्थगुणविशिष्टविद्याविधायकत्वमिति प्रत्युदाहरणसंगत्येदमाह—

समान एवं चाभेदात् ॥ १९ ॥

अत्र पूर्वपक्षे विद्ययोर्भेदात् गुणानुपसंहारः, सिद्धान्ते विद्यैक्यात् गुणोपसंहार इति फलभेदः। वाजसनेयशाखा-
१०. समानाधिकरणम्। यामग्निरहस्ये शाण्डिल्यविद्या श्रूयते— 'स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपम्' इत्यादिना। तत्रैव बृहदारण्यके पुनः सैव श्रूयते— 'मनोमयोऽयं पुरुषो भाः सत्यः' इति। तत्र किम् अग्निरहस्यबृहदारण्यकस्थयोर्विद्ययोर्भेदः, उतैक्यमिति विशये, अनयोर्विद्ययोर्भेद इति पूर्वः पक्षः। सिद्धान्तस्तु——यथा भिन्नासु शाखासु विद्यैक्यं गुणोपसंहारश्च भवति, एवं समाने च समानायामपि शाखायां भवितुं युक्तम्। कुतः, अभेदात् उपास्यस्य मनोमय-

त्वादिगुणकस्योभयत्राप्यभेदेन प्रत्यभिज्ञानात् । एवं च अग्निरहस्ये विद्यां विधाय बृहदारण्यके तदनुवादेन सर्वेशानत्वादयो गुणा विधीयन्ते इति उभयत्र शाण्डिल्यविद्यैक्यमिति सिद्धम् ॥

पूर्वेण दृष्टान्तसंगत्येदमाह—

संबन्धादेवमन्यत्रापि ॥ २० ॥

अत्र पूर्वपक्षे प्रतिस्थानं नामद्वयानुष्ठानम्, सिद्धान्ते यथाश्रुत्यैकैकनामानुष्ठानमिति फलभेदः । बृहदारण्यके सत्यविद्या-

११. संबन्धाधिकरणम्।

यामाधिदैविकपुरुषस्यादित्यस्याहरित्येतन्नाम ध्यानायोपदिष्टम्, आध्यात्मिकस्य त्वक्षिपुरुषस्याहमित्येतन्नामेति । तत्र किमस्यां सत्यविद्यायां नाम्नोः व्यवस्थया ध्यानं कर्तव्यम्, उत नामद्वयस्य प्रतिस्थानं ध्यानमिति संशये, यथा शाण्डिल्यविद्यायामेकशाखायां विभागेनाधीतायामेकविद्यात्वसंबन्धादन्योन्यं गुणोपसंहारः पूर्वमुक्तः, एवमन्यत्रापि सत्यविद्यायां भवितुं युक्तम्, एकविद्यात्वसंबन्धादिति पूर्वः पक्षः ॥

सिद्धान्तस्तु—

न वा विशेषात् ॥ २१ ॥

नैवोभयोरुभयत्रोपसंहारः। कुतः, विशेषात् तस्याहरिति तस्याहमिति चायतनविशेषव्यपाश्रयेणैवोपनिषदोर्विशेषोपदेशात् ॥

किं च—

दर्शयति च ॥ २२ ॥

विद्यान्तरे हिरण्यश्मश्रुरित्यादिना आदित्यपुरुषस्य रूपमुक्त्वा तद्रूपमक्षिपुरुषेऽतिदिशति— 'तस्यैतस्य तदेव रूपं यदमुष्य रूपम्' इति। सोऽयमतिदेशो विद्यास्थले स्थानभेदान्नोपसंहार इति दर्शयति; इतरथायमतिदेशो निरर्थक एव स्यात्। अतो नाम्नोर्व्यवस्थेति सिद्धम् ॥

पूर्वोक्तन्यायमतिदिशति—

संभृतिद्युव्याप्त्यपि चातः ॥ २३ ॥

अस्यातिदेशत्वान्न पृथक्संगत्यपेक्षा। अत्र पूर्वपक्षे विद्याभेदस्य गुणव्यवस्थापकत्वासिद्धिः, सिद्धान्ते तत्सिद्धिरिति

१२. संभृत्यधिकरणम्। फलभेदः। राणायनीयानां खिलेषु पठ्यते— 'ब्रह्मज्येष्ठा वीर्या संभृतानि, ब्रह्माग्रे ज्येष्ठं दिवमाततान' इति। तत्र श्रूयमाणं संभृतिद्युव्याप्त्यादिकं तदीयोपनिषद्विहितशाण्डिल्यादिब्रह्मविद्यासूपसंहर्तव्यम्, न वेति संदेहे, उपसंहर्तव्यमिति पूर्वः पक्षः। सिद्धान्तस्तु— 'वीर्यासंभृतानि' इति या वीर्यसंभृतिः वीर्यसमृद्धिः, या च 'दिवमाततान' इति द्युलोकव्याप्तिः, तयोः समाहारः संभृतिद्युव्याप्ति; तदपि नोपसंहर्तव्यम्। कुतः, अतश्च अत एव नाम्नोरिव व्यव-

स्थापकस्थानविशेषादेव । तस्मात् संभृत्यादिगुणविशिष्टमुपासनान्तरं तत्र विधेयमिति सिद्धम् ॥

पूर्वत्रासाधारणगुणप्रत्यभिज्ञानाभावात् संभृत्यादिगुणविशिष्टविद्याभेद उक्तः; इह त्वसाधारणमरणावभृथगुणविशिष्टपुरुषयज्ञरूपैक्यप्रत्यभिज्ञानाद्विद्यैक्यमिति प्रत्युदाहरणसंगत्येदमाह—

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥

अत्र पूर्वपक्षे विद्याभेदादुपसंहारः । सिद्धान्ते तद्भेदादनुपसंहार इति फलभेदः । पैङ्गिरहस्ये 'पुरुषो वाव यज्ञः' इति पुरुषविद्या श्रूयते; तत्र आशीर्मन्त्रप्रयोगादयो धर्माश्च श्रूयन्ते; तैत्तिरीयेऽपि 'तस्यैवं विदुषो यज्ञस्यात्मा' इत्यादि; तत्रेतरत्रोक्ताः पुरुषयज्ञस्य धर्मास्तैत्तिरीयकेऽप्युपसंहर्तव्याः, उत नेति संशये, उपसंहर्तव्या इति पूर्वः पक्षः । सिद्धान्तस्तु— पुरुषविद्यायामिव यथा पैङ्गिनां पुरुषविद्यायां पुरुषो यज्ञत्वेन कल्पितः, तदीयमायुस्त्रेधा विभज्य सवनत्वेन कल्पितम्, अशिशिषादीनि च दीक्षादिभावेन कल्पितानि; तथेतरेषां तैत्तिरीयकाणां पुरुषविद्यायां सवनत्वादीनामनाम्नानात् । तेषां हि पुरुषविद्याया पुरुषसंबन्धियज्ञोऽनुक्रान्तः पत्नीयजमानवेदवेदिबर्हिर्यूपादिकं

१३. पुरुषविद्याधिकरणम् ।

चानुक्रान्तम् । यत्तु मरणावभृथगुणस्य विद्यैक्यप्रत्यभिज्ञापकत्वमवादि, तन्न; बहुगुणभेदे एकस्य प्रत्यभिज्ञापकत्वायोगात् । अतो विद्यैक्याभावान्नोपसंहर्तव्या इति सिद्धम् ॥

पूर्वं यथा पुरुषयज्ञस्यात्मविद्यासंनिधानात् तच्छेषत्वम्, तथा मन्त्राणां कर्मणां च तत्तद्विद्यासंनिधानात्तच्छेषत्वमस्त्विति दृष्टान्तसंगत्येदमाह—

वेधाद्यर्थभेदात् ॥ २५ ॥

अत्र पूर्वपक्षे मन्त्रादीनां विद्याशेषत्वेनोपसंहारः, सिद्धान्ते त्वनुपसंहार इति फलभेदः । आथर्वणिकानामुपनिषदारम्भे

१४. वेधाद्यधिकरणम् ।

'सर्वं प्रविध्य हृदयं प्रविध्य' इत्यादयो मन्त्राः पठिताः । काण्वानामुपनिषदादौ 'देवा ह वै सत्रं निषेदुः' इत्यादि प्रवर्ग्यब्राह्मणं पठितम् । तत्र किमेते 'सर्वं प्रविध्य' इत्यादयो मन्त्राः प्रवर्ग्यादीनि च कर्माणि विद्यासूपसंह्रियेरन्, न वेति संदेहे, उपसंह्रियेरन्निति पूर्वः पक्षः । सिद्धान्तस्तु— नोपसंह्रियेरन् । कुतः, वेधाद्यर्थभेदात् 'सर्वं प्रविध्य' इत्यादिमन्त्रप्रकाशितानां वेधादीनामर्थानामाभिचारिककर्मादिसमवेतानां भेदात् विद्यासु असमवेतत्वादित्यर्थः । एवं च आभिचारिककर्मादिसमवेतार्थप्रकाशनसामर्थ्यलक्षणं लिङ्गं संनिधिं दुर्बलं तिरस्कृत्य मन्त्राणामाभि-

चारिककर्माङ्गत्वं साधयतीति न विद्याङ्गत्वम्; प्रवर्ग्यादि-कर्मणां च संनिधेर्बलीयसा श्रुत्यादिना ज्योतिष्टोमादौ विनियुक्तानां न विद्याशेषत्वमिति भावः ॥

यथा पूर्वं विद्यासंनिधौ श्रुतस्यापि मन्त्रादेर्विद्यायामनावश्यकत्वात् अनुपसंहार उक्तः, तथा क्वचित् हानसंनिधौ श्रुतस्याप्युपादानस्य अन्तरेणाप्युपादानं तूष्णीं हानसंभवेनानावश्यकत्वात् अनुपसंहार इति दृष्टान्तसंगत्येदमाह—

हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥

अत्र पूर्वपक्षे विद्यास्तुतिप्रकर्षासिद्धिः, सिद्धान्ते तु उपादानस्यात्रोपसंहाराद्विद्यास्तुतिप्रकर्षसिद्धिः इति फलभेदः ।

१५. हान्यधिकरणम् । अत्र शाट्यायनिनः पठन्ति 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इति; ताण्डिनस्तु 'अश्व इव रोमाणि विधूय पापम्' इत्याद्यामनन्ति; तथाथर्वणिकाः 'तथा विद्वान्पुण्यपापे विधूय' इत्याद्यामनन्ति । तत्र शाट्यायनिश्रुतौ पुण्यपापयोरुपादानमात्रं श्रुतम् । तच्च त्यागं विना न संभवति इति पुण्यपापत्याग आक्षिप्यते । यत्र तु ताण्ड्याथर्वणवाक्यद्वये पुण्यपापत्यागमात्रं श्रुतम्, तत्र त्यक्तयोरुपादानमन्यत्र श्रुतम् अत्रोपसं-

हर्तव्यं न वेति संदेहे, नेति पूर्वः पक्षः । सिद्धान्तस्तु— सौत्र-तुशब्दः कैवल्यवाची । तथा च केवलहानौ श्रुतायां सत्यां तत्रोपादानमुपसंहर्तव्यम् । कुतः, उपायनशब्दशेषत्वात् 'तत् सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृतम्' इति कौषीतकिरहस्ये हानसंनिधौ श्रूयमाणस्य हानशब्देनापेक्षितस्य उपादानात्मकोपायनशब्दस्य हानंप्रति शेषत्वावगमादित्यर्थः । अश्वरोमदृष्टान्तेन विधूतयोः पुण्यपापयोः परत्रावस्थानसापेक्षत्वात् परैरुपादानमावश्यकमिति भावः । शाखान्तरस्थोऽपि विशेषः शाखान्तरेऽप्यपेक्षितः उपसंहरणीय इत्यत्र दृष्टान्तमाह— कुशाच्छन्दस्तुत्युपगानवत् कुशावत् छन्दोवत् स्तुतिवदुपगानवत् । तत्र यथा 'कुशा वानस्पत्याः' इति भाल्लविनां श्रुतौ कुशानामविशेषेण वनस्पतियोनित्वश्रवणे शाट्यायनिनामौदुम्बरा इति विशेषवचनादौदुम्बर्यः कुशा आश्रीयन्ते, यथा च्छन्दोभिः स्तुवत इत्यत्र देवासुरच्छन्दसामविशेषेण पौर्वापर्यप्रसङ्गे 'देवच्छन्दांसि पूर्वाणि' इति पैङ्गिश्रुत्या प्रतीयते, यथा षोडशिनः पात्रविशेषस्य ग्रहणे अङ्गभूतं स्तोत्रं कदा कर्तव्यमित्यपेक्षायां छन्दोगानां कालविशेषाप्राप्तौ 'समयाविषिते सूर्ये' इत्यादितैत्तिरीयकश्रुत्या कालविशेषः प्रतीयते, यथा 'ऋत्विज उपगायन्ति' इति

सामान्यवाक्यं शाखान्तरीयं 'नाध्वर्युरुपगायति' इति विशेषवचनमपेक्ष्य अध्वर्युवर्जिता ऋत्विज उपगायन्ति इत्येतदर्थपरतया निश्चीयते। एवं च यथा कुशादिषु श्रुत्यन्तरगतविशेषान्वयः, तथा हानावुपायनान्वय इति सिद्धम् । श्रुत्यन्तरगतं हि विशेषं श्रुत्यन्तरेऽनभ्युपगच्छतः सर्वत्र अष्टदोषदुष्टविकल्पः स्यात्। स चान्याय्यः सत्यां गतौ । तदुक्तं द्वादशलक्षण्यां जैमिनिना 'विप्रतिषेधे विकल्पः स्यात्' इति । इति प्रथमं वर्णकम् ॥

पूर्वं मन्त्रादीनां विद्यासंनिधेरकिंचित्करत्वमुक्तं यथा, तथात्रापि विधूननशब्दस्योपायनशब्दसंनिधिरप्रयोजक इति दृष्टान्तसंगत्येदं वर्णकान्तरमाह— **हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम्।** अत्र पूर्वपक्षे विद्यावशात् सुकृतादिहान्यसिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः । उदाहृतश्रुतिष्वेव किं पुण्यपापयोर्विधूननं हानमभिप्रेतम्, उत तयोः फलतश्चालनमिति विशये, चालनमेवेति पूर्वः पक्षः । सिद्धान्तस्तु—हानावेवायं विधूननशब्दो वर्तितुमर्हति । कुतः, उपायनशब्दशेषत्वात् उपायनशब्दसंनिधौ श्रूयमाणस्य विधूननशब्दस्योपायनं प्रति शेषत्वादित्यर्थः । एवं च उपादानात्मकोपायनस्य हानं विना असंभवात् विधू-

ननशब्देन 'धूञ् कम्पने' इति धात्वर्थचलनवाचकेनापि हानमेव लक्ष्यमिति भावः। ननु उपायनशब्दसंनिधौ श्रूयमाणस्य विधूननशब्दस्य हानलक्षकत्वेऽपि केवलविधूननशब्दस्य न तल्लक्षकत्वम्, निश्चायकाभावादित्याशङ्क्याह— कुशाच्छन्दस्तुत्युपगानवत्। यथा कुशादिस्थले शाखान्तरीयविशेषश्रवणं निर्णायकम्, तथेहापि क्वचिद्विधूननसंनिधौ श्रूयमाणमुपायनं सर्वत्र विधूननस्य हानलक्षकत्वे निश्चायकमित्यर्थः। तदुक्तमिति पूर्ववद्व्याख्येयम्॥

पूर्वं विद्यायाः कर्महानिहेतुत्वं सिद्धं कृत्वा केवलहानश्रवणे उपायनोपसंहार उक्तः; संप्रति विद्यायाः कर्महानिहेतुत्वं नास्तीत्याक्षेपसंगत्येदमाह—

सांपराये तर्तव्याभावात्तथा ह्यन्ये ॥ २७ ॥

अत्र पूर्वपक्षे विद्यासामर्थ्यानादरः, सिद्धान्ते तदादर इति फलभेदः। कौषीतकिश्रुतौ 'विरजां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते विधूनुते' इति पर्यङ्कस्थब्रह्मोपासकस्य कर्महानिः श्रूयते। तत्र

१६. सांपरायाधिकरणम्।

किं विरजानदीतरणानन्तरं कर्महानिः, उत देहत्यागात् प्राक्काल इति विशये, श्रुतिबलात् नदीतरणानन्तरमेवेति पूर्वः पक्षः। सिद्धान्तस्तु— सांपराये देहत्यागात् प्राक्

परलोकसाधनीभूतविद्याकाल एव कर्महानिर्युक्ता। कुतः, तर्तव्याभावात् नदीतरणानन्तरं पुण्यपापकर्मणः तर्तव्यस्य प्राप्तव्यस्य फलान्तरस्याभावात्। ननु कर्महानिहेतोरभावात् इति चेत्, न; कर्महानिहेतोर्विद्यायाः प्राक्सत्त्वात्, कर्महानिं विना नदीतरणानुपपत्तेश्च। अतो जीवत एव विद्यासामर्थ्यात् कर्महानिः। तथा ह्यन्ये शाखिनस्ताण्ड्यादयो जीवद्दशायामेव कर्महानिम् 'अश्व इव रोमाणि' इत्यादावधीयत इत्यर्थः॥

ननु कर्महानेर्विद्याफलत्वे ब्रह्मप्राप्तेरिव देहत्यागोत्तरकालीनत्वं स्यात्; अत आह—

छन्दत उभयाविरोधात्॥ २८॥

छन्दतः स्वेच्छातो विद्यानुष्ठानं जीवत एवेति तद्धेतुककर्मक्षयो जीवत एव युक्तः, सति हेतौ कार्यविलम्बायोगात्। एवं सति विद्याकर्मक्षययोर्निमित्तनैमित्तिकभावे ताण्ड्यादिश्रुत्योरुभयोरविरोधो भवतीत्यर्थः। ब्रह्मप्राप्तेर्देहत्यागं विनानुपपत्तेः प्रकृते चानुपपत्त्यभावात् जीवत एव कर्मक्षय इति भावः॥

इत्थं प्रासङ्गिकं विद्योदयानन्तरमेव कर्महानमित्यभिधाय यथा हानसंनिधौ क्वचिच्छ्रूयमाणमुपायनं सर्वत्रोपसंह्रियते, तथा हानसंनिधौ क्वचिच्छ्रूयमाणो देवयानः पन्थाः सर्व-

त्रोपसंहर्तव्य इति दृष्टान्तसंगत्येदमाह—

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः॥ २९॥

१७. गतेरर्थवत्त्वाधिकरणम्।

तत्र पूर्वपक्षे निर्गुणविदोऽपि मुक्त्यर्थं मार्गापेक्षा, सिद्धान्ते त्वनपेक्षेति फलभेदः। कर्महानसंनिधौ क्वचिद्देवयानः पन्थाः श्रुतः, क्वचिन्न श्रुतो निर्गुणविद्यास्थले। तत्र किं देवयानोपसंहारोऽस्ति न वेति संदेहे, अस्तीति पूर्वः पक्षः। सिद्धान्तस्तु— गतेर्देवयानस्य पथः अर्थवत्त्वमुभयथा विभागेन भवितुमर्हति— क्वचित् सगुणविद्यायां देवयानमार्गोऽस्ति, क्वचिन्निर्गुणविद्यायां नेति। अन्यथा सर्वत्र देवयानमार्गोपसंहाराङ्गीकारे 'विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इति श्रुतिविरोधः स्यात्। अतो निर्गुणविद्यायां मार्गोपसंहारो व्यर्थ इत्यर्थः॥

ननु तर्हि सगुणविद्यायामपि मार्गो व्यर्थः स्यादित्यत आह—

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्॥ ३०॥

गतेरुभयथाभाव उपपन्नः; तल्लक्षणार्थोपलब्धेः सा गतिर्लक्षणं कारणं यस्य सगुणविद्याफलस्य पर्यङ्कस्थब्रह्मप्राप्तिरूपस्य स तल्लक्षणार्थः, तस्य श्रुतिषूपलब्धेः। अतः सगुणविद्यायां मार्गः

अर्थवान्, न निर्गुणविद्यायाम्। लोकवत् यथा लोके सेतुवासिनां गङ्गाप्राप्त्यर्थं मार्गोऽपेक्षितः न गङ्गास्थानाम्, तद्वदित्यर्थः॥

पूर्वं सगुणनिर्गुणविद्यासु मार्गस्य भावाभावव्यवस्था यथा उक्ता, तथा सगुणविद्यास्वपि व्यवस्थास्त्विति दृष्टान्तसंगत्येदमाह—

अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम्॥ ३१॥

अत्र पूर्वपक्षे नियतस्य मार्गस्यानुपसंहारः, सिद्धान्ते तु नियतस्योपसंहार इति फलभेदः। सगुणोपासनेषु क्वचित्

१८. अनियमाधिकरणम्।

पञ्चाग्न्युपासनादिषु मार्गः श्रूयते, क्वचित्तु वैश्वानरादिषु न श्रूयते। तत्र किं येषु मार्गः श्रुतः तेषामेव तस्य नियमः, किं वा सर्वेषामनियम इति संदेहे, विद्याविशेषप्रकरणान्नियम इति पूर्वः पक्षः। सिद्धान्तस्तु— सर्वेषां सगुणोपासनानां मार्गस्यानियमः। ननु अनियमाभ्युपगमे प्रकरणविरोधः; नैषोऽस्ति विरोधः। कुतः, शब्दानुमानाभ्यां श्रुतिस्मृतिभ्याम्; 'तद्य इत्थं विदुः ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति' इत्याद्या श्रुतिः, 'शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययावर्तते पुनः' इत्याद्या स्मृतिः,

ताभ्यामित्यर्थः । एवं च पञ्चाग्निविदामिव विद्यान्तरशीलिनामप्यविशेषेण अर्चिरादिमार्गप्रतिपादकवाक्येन प्रकरणं बाध्यमिति बोध्यम् ॥

पूर्वं मुक्तिफलत्वान्निर्गुणविद्यायां मार्गो निरर्थकः, ब्रह्मलोकप्राप्तिफलत्वात्सगुणविद्यायां मार्गः सर्वत्रार्थवानिति व्यवस्था कृता ; सा न युक्ता, निर्गुणविदामपि इतिहासादौ पुनर्जन्मदर्शनेन निर्गुणविद्यायाः मुक्तिसाधनत्वासंभवादित्याक्षेपसंगत्येदमाह—

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥

अत्र पूर्वपक्षे निर्गुणविद्यायाः कैवल्याहेतुत्वान्मार्गोपसंहारः, सिद्धन्ते तस्यास्तद्धेतुत्वध्रौव्यात्तदनुपसंहार इति फलभेदः ।

१९. यावदधिकाराधिकरणम् । ‘अपान्तरतमा नाम कलिद्वापरयोः सन्धौ विष्णुनियोगात् कृष्णद्वैपायनः संबभूव’ इत्यादिना अपान्तरतमवसिष्ठादीनां निर्गुणब्रह्मविदां पुनर्जन्म स्मर्यते। तत्र किं विदुषो वर्तमानदेहपातानन्तरं देहान्तरप्राप्तिरस्ति, न वेति संदेहे, अस्तीति पूर्वः पक्षः। सिद्धान्तस्तु— अपान्तरतमःप्रभृतीनाम् आधिकारिकाणां लोकव्यवस्थाहेतुष्वधिकारेषु परमेश्वरेण नियुक्तानां सम्यग्दर्श-

नतः प्रक्षीणकर्मणां यावदधिकारमवस्थितिः यावत्प्रारब्धकर्म अवस्थितिः, तस्य प्रारब्धकर्मणो भोगेन क्षये प्रतिबन्धकान्तराभावादप्रतिबन्धसाक्षात्कारो वर्तमानदेहपातानन्तरं कैवल्यं संपादयतीति न देहान्तरप्राप्तिरिति सिद्धम् ॥

पूर्वं यथा आधिकारिकपुरुषाणामारब्धकर्मवशादेव देहान्तरारम्भसिद्धेः न संचितकर्मान्तरस्य तद्धेतुत्वमित्युक्तम्, तथेहापि तत्तद्वाक्योक्तैरेव निषेधैरुपलक्षणतया सर्वद्वैतनिषेधसिद्धेर्न शाखान्तरीयनिषेधानां ब्रह्मधीहेतुत्वमिति दृष्टान्तसंगतेदमाह—

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥

अत्र पूर्वपक्षे श्रुतैरेव निषेधैरुपलक्षणतया सर्वनिषेधे निर्विशेषब्रह्मप्रमितौ लाघवम्, सिद्धान्ते तु उपलक्षणैकदेशपरिशेषौ परित्यज्य निर्विशेषप्रमितौ नैराकाङ्क्ष्यमिति फलभेदः। बृहदारण्यके श्रूयते—'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनणु....' इत्यादि; एवमथर्वणे अक्षरमुपक्रम्य '....यत्तदद्रेश्यमग्राह्यम्....' इत्यादि। तत्र किं क्वचिन्निषेधश्रुतौ अश्रुतनिषेधानां श्रुत्यन्तरादुपसंहारोऽस्ति न वेति संदेहे, नास्तीति पूर्वः पक्षः। सि-

२०. अक्षरध्यधिकरणम्।

द्धान्तस्तु—अक्षरे ब्रह्मणि द्वैतनिषेधधियोऽक्षरधियः तासां सर्वत्र निषेधश्रुतिष्ववरोध उपसंहारो न्याय्यः। कुतः, सामान्यतद्भावाभ्यां द्वैतनिरासेन ब्रह्मप्रतिपादनस्य सर्वत्र सामान्यं समानत्वम्, तस्य ब्रह्मणः प्रतिपाद्यस्य सर्वत्वभावः एकत्वेन प्रत्यभिज्ञायमानत्वम्, ताभ्यां हेतुभ्यामित्यर्थः; तत्र दृष्टान्तः—औपसदवत्। यथा जामदग्न्येऽहीने पुरोडाशिनीषूपसत्सु चोदितानामौपसदानामध्वर्युकर्तृकपुरोडाशशेषाणां मन्त्राणां यत्र क्वचिच्छ्रुतानामपि अध्वर्युणा संबन्धः, तथा अक्षरप्रमितिशेषाणां निषेधानां यत्र क्वचिच्छ्रुतानामप्यक्षरेण सर्वत्र संबन्ध इत्यर्थः। तदुक्तं जैमिनिना प्रथमे काण्डे—'गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः' इति॥

पूर्वं वेद्यस्याक्षरस्यैक्ये विद्यैक्यात् अक्षरधियामुपसंहार उक्तः। तर्हि इह 'द्वा सुपर्णा' इति वाक्ये एकस्यैव भोक्तृत्वम्, 'ऋतं पिबन्तौ' इति वाक्ये उभयोरपीत्युभयत्र वेद्यभेदाद्विद्याभेद इति प्रत्युदाहरणसंगत्येदमाह—

इयदामननात् ॥ ३४ ॥

अत्र पूर्वपक्षे विद्याभेदादन्योन्यं गुणानुपसंहारः, सिद्धान्ते तदभेदादुपसंहार इति फलभेदः। आथर्वणे 'द्वा सुपर्णा सयुजा' इत्यादिमन्त्रः श्रूयते; काठकेऽपि 'ऋतं पिबन्तौ'

इत्यादि । तत्र किमनयोर्मन्त्रयोर्विद्याभेदः, उताभेद इति
२१. इयदधि- विशये, विद्याभेद इति पूर्वः पक्षः । सिद्धा-
करणम् । न्तस्तु— मन्त्रद्वये विद्याया: अभेद एव ।
कुतः, इयतः इयत्तावच्छिन्नस्य द्वित्वावच्छिन्नस्योभयत्राप्यभिन्नत्वेन आमननात् अभिधानादित्यर्थः । अत्र हि मन्त्रद्वये भोक्तृत्वानुवादेन परमात्माभेदः प्रतिपाद्यः । 'पिबन्तौ' इति प्रयोगस्तु भोक्तृजीवसाहचर्यात् अभोक्तरीश्वरे 'छात्रिणो गच्छन्ति' इतिवदुपपद्यत इत्यविरोधः ॥

पूर्वं पिबन्तावित्यस्य पदस्य लाक्षणिकत्वेन वेद्यैक्याद्विद्यैक्यमभाणि, इह तु वेद्याभेदेऽपि न विद्याभेदः, 'समिधो यजति' इत्यादौ यजत्यभ्यासवदात्माभ्यासादिति प्रत्युदाहरणसंगत्येदमाह—

अन्तरा भूतग्रामवत्स्वात्मनः ॥ ३५ ॥

अत्र पूर्वपक्षे मिथो धर्मानुपसंहारः, सिद्धान्ते तूपसंहार इति फलभेदः । बृहदारण्यके— 'यत्साक्षादपरोक्षाद्ब्रह्म य
२२ अन्तरत्वा- आत्मा सर्वान्तरः' इति द्विराम्नायते । तत्र
धिकरणम् । किमनयोर्ब्राह्मणयोर्विद्याभेदः, उत विद्यैक्यमिति विशये, विद्याभेद इति पूर्वः पक्षः । सिद्धान्तस्तु— आमननात् इति पदस्यानुषङ्गः ; ब्राह्मणद्वयेऽपि स्वात्मनः स-

र्वान्तरत्वामननात् विद्यैक्यं विज्ञेयम्; एकस्मिन्देहे द्वयोर्मुख्यतः सर्वान्तरत्वायोगात्। भूतग्रामवत् यथा भूतसमूहात्मकस्थूलदेहे पृथिव्यपेक्षया जलमान्तरं जलापेक्षया तेज इत्यादिक्रमेणापेक्षिकं भूतानामान्तरत्वम्, न मुख्यम्; तद्वत्। अथवा 'एको देवः सर्वभूतेषु गूढः' इत्यादिश्रुत्यन्तरे सर्वेषु भूतग्रामेषु सर्वान्तर एक एव आत्माम्नायते, तद्वदनयोर्ब्राह्मणयोरित्यर्थः। एवं च वेद्यैक्याद्विद्यैक्यमिति सिद्धम्॥

पूर्वपक्षमनूद्य दूषयति—

अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्॥ ३६॥

अन्यथा विद्याभेदानङ्गीकारे आम्नानभेदस्याभ्यासस्य अनुपपत्तिः प्रयोजनाभावादिति चेत्, न। उपदेशान्तरवत् अभ्यासस्योपपत्तिः। तथाहि—यथा छान्दोग्ये 'तत्त्वमसि' इत्युपदेशे नवकृत्वोऽभ्यस्यमानेऽपि न विद्या भिद्यते, उपक्रमोपसंहारयोरविशेषात्; तद्वत् ब्राह्मणद्वयेऽपि प्रश्नरूपोपक्रमस्य 'अतोऽन्यदार्तम्' इत्युपसंहारस्य चाविशेषान्न विद्याभेद इति सिद्धम्॥

पूर्वं यथा अभ्यासस्यादरार्थत्वेन मतेरैक्यमवादि, तथा व्यतिहारोपदेशस्याप्यादरार्थत्वान्मतेरेकरूपत्वमस्त्विति दृष्टान्तसंगत्येदमाह—

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥

अत्र पूर्वपक्षे मतेरैकरूप्ये लाघवम्, सिद्धान्ते मतेर्द्वैरूप्ये व्यतिहारसार्थक्यमिति फलभेदः। ऐतरेयके श्रूयते—

२३. व्यतिहाराधिकरणम्।

'तद्योऽहं सोऽसौ योऽसौ सोऽहम्' इति। तत्र किं व्यतिहारेण मतिरेकरूपा विधीयते, उत द्विरूपेति विशये, एकरूपेति पूर्वः पक्षः। सिद्धान्तस्तु— व्यतिहारोऽत्रोपासनार्थमुपदिश्यते। इतरवत् यथा इतरे सर्वात्मत्वादयो गुणा उपासनार्थमुपदिश्यन्ते, तद्वत्। तथाहि विशिंषन्ति समाम्नातारः 'त्वमहमस्म्यहं च त्वमसि' इत्युभयोच्चारणेन। तच्च विशेषणं द्विरूपायां मतौ कर्तव्यायामर्थवद्भवति। अन्यथा हीदं विशेषणोभयाम्नानमनर्थकं स्यात्। अतो मतिर्द्विरूपैवेति सिद्धम् ॥

पूर्वं जीवब्रह्मणोर्व्यतिहारोक्तिभेदाद्विद्याद्वैरूप्यं यथा अभ्यधायि, तथेहापि सत्यविद्यायाम् 'लोकाञ्जयति' इति तदनन्तरविद्यायाम् 'हन्ति पाप्मानम्' इति उभयत्र लोकजयपापनिवृत्तिरूपफलोक्तिभेदाद्विद्याभेद इति दृष्टान्तसंगत्येदमाह—

सैव हि सत्यादयः ॥ ३८ ॥

अत्र पूर्वपक्षे गुणानामनुष्ठानव्यवस्था, सिद्धान्ते तु अनुष्ठानैक्यमिति फलभेदः। बृहदारण्यके श्रूयते —'महद्यक्षं

प्रथमजं वेद सत्यं ब्रह्म' इति सत्यविद्यां विधाय तदनन्तरम्
२४. सत्याद्यधिकरणम्। 'तद्यत्तत्सत्यमसौ स आदित्यः' इत्यादि। तत्र सत्यविद्यातस्तदनन्तरविद्या भिद्यते न वेति संदेहे, भिद्यत इति पूर्वः पक्षः। सिद्धान्तस्तु— इयमनन्तरविद्या सैव सत्यविद्यैव, न ततो भिद्यते। कुतः, हिशब्दो हेतौ; तद्यत्तत्सत्यमिति प्रकृतस्यैवोपास्यस्य हिरण्यगर्भस्य आकर्षणाद्धेतोः, न ह्युपास्याभेदे विद्याभेदो युक्तः। न च फलभेदाद्विद्याभेदो युक्त इति वाच्यम्, सत्यविद्याप्रकरणे पठितस्य फलस्य सर्वस्यापि सत्यविद्याफलत्वात्। अतो विद्यैक्यात्पूर्वापरवाक्यस्थाः सर्वे सत्यादयो गुणा उपसंहर्तव्या इति सिद्धम्॥

पूर्वं वेद्याभेदेन विद्यैक्यात् गुणोपसंहार इत्यभाणि। तर्ह्यत्रापि छान्दोग्ये दहराकाशस्यैवोपास्यत्वात्। वाजसनेयके तु आकाशविशिष्टस्य आत्मनो ज्ञेयत्वाद्वेद्यभेदेन सगुणनिर्गुणविद्ययोर्भेदान्नोपसंहार इति प्रत्युदाहरणसंगत्येदमाह—

कामादीतरत्र तत्र चायतनादिभ्यः॥ ३९॥

अत्र पूर्वपक्षे कचिदाकाशस्य ध्येयत्वं क्वचित्तदाश्रयस्य ज्ञेयत्वमिति विशेषसिद्धिः, सिद्धान्ते ब्रह्मण एवाकाशशब्दितत्वादुक्तविशेषासिद्धिरिति फलभेदः। छान्दोग्ये 'दहरो-

ऽस्मिन्नन्तर आकाशः' इति श्रुतस्य दहराकाशस्य सत्यकाम-
२५. कामाद्य- त्वादयो गुणा आम्नाताः । बृहदारण्यके तु
धिकरणम् । 'य एषोऽन्तर्हृदय आकाशः' इत्यभिहित-
स्याकाशाश्रयस्य सर्ववशित्वादयो गुणाः । ते परस्परमुपसं-
हर्तव्याः, न वेति संदेहे, नोपसंहर्तव्या इति पूर्वः पक्षः । सिद्धान्तस्तु—कामादि सत्यकामत्वादिगुणजातम् इतरत्र बृहदारण्यके उपसंहर्तव्यम्। यच्च सर्ववशित्वादिकम्, तदपि तत्र छान्दोग्ये उपसंहर्तव्यम् । कुतः, आयतनादिभ्यः उभयत्राविशिष्टेभ्यो हृदयायतनसेतुत्वव्यपदेशादिभ्यो हेतुभ्यः । ननु एवं वेद्याभेदेऽपि सगुणनिर्गुणत्वेन विद्ययोर्भेदात् कथमुपसंहार इति चेत्, बाढम्; न वयमुपासनार्थमुपसंहारं ब्रूमः, अपि तु विद्यास्तुत्यर्थम्; येन विद्याभेदे गुणोपसंहारो न स्यात्। अतो न काचनानुपपत्तिरिति ॥

पूर्वं विद्याभेदेऽपि स्तुत्यर्थत्वेन गुणोपसंहारो यथा अभ्यधायि, तथा भोजनलोपेऽपि पूर्वभोजनस्तुत्युपपत्त्यर्थं प्राणाग्निहोत्रालोप इति दृष्टान्तसंगत्येदमाह—

आदरादलोपः ॥ ४० ॥

अत्र पूर्वपक्षे प्रतिनिधिन्यायेन प्राणाग्निहोत्रकर्तव्यतावश्यकत्वम्, सिद्धान्ते तदनवतारात्तदनावश्यकत्वमिति फलभेदः ।

२६. आदराधिकरणम्।

छान्दोग्ये वैश्वानरविद्यायां प्राणाग्निहोत्रं श्रूयते— 'स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहा' इत्यादिना। तत्र किं भोजनलोपे प्राणाग्निहोत्रस्य लोपः, उतालोप इति संदेहे, भोजनलोपेऽग्निहोत्रस्यालोपः। कुतः, 'पूर्वोऽतिथिभ्योऽश्नीयात्' इति जाबालश्रुत्या पूर्वभोजनस्य प्राथम्यरूपधर्मलोपमसहमानया प्राणाग्निहोत्रे आदरकरणात्; न हि धर्मलोपमसहमाना श्रुतिः धर्मिणः प्राणाग्निहोत्रस्य लोपं सहते। अतोऽलोप इति पूर्वः पक्षः॥

सिद्धान्तस्तु—

उपस्थितेऽतस्तद्वचनात्॥ ४१॥

भोजने चोपस्थिते अतः अस्मादेव भोजनद्रव्यात् प्राणाग्निहोत्रं कर्तव्यम्; अनुपस्थिते त्वग्निहोत्रस्य लोप एव। कुतः, तद्वचनात् 'तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयम्' इति वचनात्। आदरवचनं तु भोजनप्रसक्तिदशायां द्रष्टव्यम्॥

पूर्वमनित्यभोजनाश्रितप्राणाग्निहोत्रस्यानित्यत्वं यथा, तद्वत् नित्यकर्माङ्गाश्रितोपासनानां नित्यत्वमिति दृष्टान्तसंगत्येदमाह—

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम्॥ ४२॥

अत्र पूर्वपक्षे उपासनानां क्रतुषु पर्णतादिवदावश्यकत्वम्, सिद्धान्ते गोदोहनवदनावश्यकत्वमिति फलभेदः । तत्र सन्ति

२७. नन्निर्धारणाधिकरणम्।

कर्माङ्गोद्गीथव्यपाश्रयाणि प्राणाद्युपासनानि। किं तेषां नित्यवदनुष्ठानम्, उत नेति संदेहे, नित्यवदनुष्ठानमिति पूर्वः पक्षः। सिद्धान्तस्तु—तेषां कर्माङ्गाश्रितानां निर्धारणानाम् उपासनानाम् अनियमः नित्यवदनुष्ठानाभावः । कुतः, तद्दृष्टेः तस्य अनियमस्य 'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद' इति श्रुतौ दर्शनात् । उपासनानां पृथक्फलश्रवणादपि न नित्यवदनुष्ठानमित्याह— पृथग्घ्यप्रतिबन्धः फलम् । हि यस्मात् कर्मफलतः पृथगेवाप्रतिबन्धः 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति वीर्यवत्तरत्वात्मकर्मसमृद्धिरूपं फलं लभ्यते । अतो न कर्माङ्गत्वमुपासनानामिति सिद्धम् ॥

पूर्वं फलभेदात् कर्माङ्गानां तदाश्रितोपासनानां च नित्यत्वानित्यत्वलक्षणः प्रयोगभेदोऽभाणि । तर्ह्यत्र वायुप्राप्तिलक्षणफलैक्याद्वायुप्राणयोः स्वरूपाभेदाद्ध्यानप्रयोगाभेद इति प्रत्युदाहरणसंगत्येदमाह—

प्रदानवदेव तदुक्तम् ॥ ४३ ॥

अत्र पूर्वपक्षे विद्यैक्यात् प्रयोगभेदासिद्धिः, सिद्धान्ते

तदैक्येऽपि गुणभेदतस्तत्सिद्धिरिति फलभेदः। बृहदारण्यके
२८. प्रदानाधिकरणम्। छान्दोग्ये च संवर्गविद्यायां वागादिभ्यः प्राणः श्रेष्ठः अग्न्यादिभ्यो वायुः श्रेष्ठः इत्यवधारितम्। तत्र किमस्यां विद्यायां वायुप्राणयोः प्रयोगैक्यम्, उत प्रयोगभेद इति संदेहे, प्रयोगैक्यमिति पूर्वः पक्षः। सिद्धान्तस्तु— प्रदानवदेव। यथा 'इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे' इति इन्द्रदेवताया एकत्वेऽपि राजाधिराजादिगुणभेदेन तद्विशिष्टदेवताभेदात् पुरोडाशानां प्रदानस्य प्रक्षेपस्य भेदः; तद्वदेकस्यामपि विद्यायां वायुप्राणयोः स्वरूपाभेदेऽप्याध्यात्मिकाधिदैविकत्वरूपावस्थाभेदेन गुणभेदात् प्रयोगभेद इति। तदुक्तं देवताकाण्डे 'नाना वा देवता पृथग्ज्ञानात्' इति॥

पूर्वमेकप्रयोगायोगाद्वायुप्राणयोः प्रयोगभेदो गदितः; तर्हि मनश्चिदादीनां प्रकरणात् कर्माङ्गत्वेन एकप्रयोगसंभवात् प्रयोगाभेद इति प्रत्युदाहरणसंगत्येदमाह—

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि॥ ४४॥

अत्र पूर्वपक्षे क्रियार्थानामग्नीनां क्रियाङ्गत्वम्, सिद्धान्ते पुमर्थानां तेषां केवलविद्यामयत्वमिति फलभेदः। वाजसनेयके अग्निरहस्ये 'तत्षट्त्रिंशत्सहस्राण्यपश्यदात्मनोऽग्नीन-

र्कान्मनोमयान्मनश्चितः’ इत्यादि; तथैव वाक्चितः ‘प्राण-

२९. लिङ्गभूयस्त्वाधिकरणम्। चितः’ इत्यादि मनश्चिदादयः अग्नयः श्रूयन्ते । तत्र किमेते कर्माङ्गभूताः, उत स्वतन्त्रा इति संदेहे, कर्माङ्गभूता इति पूर्वः पक्षः । सिद्धान्तस्तु– एते स्वतन्त्रा एव । कुतः, लिङ्गभूयस्त्वात् ‘यत्किंचेमानि भूतानि मनसा संकल्पयन्ति’ इत्यादिस्वातन्त्र्यज्ञापकलिङ्गानां भूयसां सत्त्वात्; तद्धि लिङ्गं प्रकरणाद्बलीयः; तदपि बलीयस्त्वमुक्तं पूर्वकाण्डे ‘श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्’ इति ॥

इत्थं सिद्धान्तमुपक्रम्य पूर्वपक्षयति—

पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत् ॥ ४६ ॥

संकल्पात्मका मनश्चिदादयोऽग्नयः न स्वतन्त्राः; किं तु ‘इष्टकाभिरग्निं चिनुते’ इति प्रकृतस्य पूर्वस्य क्रियामयस्याग्नेः अयं विकल्पः संकल्पात्मकोऽग्निः, प्रकरणात्; क्रिया क्रियामय एव स्यात् । न च लिङ्गादग्नीनां स्वातन्त्र्यम् । तस्य लिङ्गस्य मानसिकाग्निस्तुतिपरत्वेन विध्येकवाक्यतया स्वार्थपरत्वाभावात् न प्रकरणबाधकत्वम् । तस्मात्क्रियानुप्रवेशिन

एतेऽग्नयः। मानसवत् यथा द्वादशाहे 'मनोग्रहं गृह्णामि' इति श्रुतं मानसग्रहं द्वादशाहमध्यपातिनो दशमस्याह्नोऽङ्गम्, तथेमेऽग्नयः प्रकृतकर्मशेषा इत्यर्थः ॥

किं च—

अतिदेशाच्च ॥ ४६ ॥

मानसिकाग्नीनां मध्ये 'एकैक एव तावान्यावानसौ पूर्वः' इति पूर्वेणेष्टकाचितेनाग्निना संपादिकाग्नीनां सादृश्योपदेशाच्च तच्छेषत्वमित्यर्थः ॥

इत्थं पूर्वपक्षे सिद्धान्तयति—

विद्यैव तु निर्धारणात् ॥ ४७ ॥

तुः पूर्वपक्षनिरासार्थः । विद्यात्मका एते मनश्चिदादयः स्वतन्त्रा एव, न कर्मानुप्रवेशिनः । कुतः, 'ते हैते विद्याचित एव' इत्यवधारणादित्यर्थः। एवकारश्रुत्या कर्मप्रकरणं बाध्यमिति भावः ॥

किं च लिङ्गादपि बाध्यमित्याह—

दर्शनाच्च ॥ ४८ ॥

मनश्चिदादीनां स्वातन्त्र्यज्ञापकलिङ्गस्य प्रागुक्तस्य दर्शनाच्चेत्यर्थः ॥

किं च वाक्यादपि तद्बाध्यमित्याह—

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥

आदिशब्देन लिङ्गवाक्ययोर्ग्रहणम् । श्रुतिलिङ्गे प्रागुक्ते । 'विद्यया हैवैत एवंविदश्चिता भवन्ति' इत्येतद्वाक्यं मनश्चिदादीनां स्वातन्त्र्यं बोधयत्प्रकरणं बाधयति । तथा चैतेषां श्रुतिलिङ्गवाक्यानां बलीयस्त्वात् दुर्बलेन कर्मप्रकरणेन न मनश्चिदादीनां स्वातन्त्र्यबाध इत्यर्थः । यत्तु लिङ्गस्य स्तुतिपरत्वम्, तन्न; तस्य विधिप्रत्ययसामीप्याभावात् अपूर्वार्थविधायकत्वादित्यर्थः ॥

इतोऽपि मनश्चिदादीनां स्वातन्त्र्यमित्याह—

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥ ५० ॥

'ते मनसैवाधीयन्त मनसाचीयन्त मनसैव ग्रहा अगृह्यन्त' इत्यादिना मनआदिषु वृत्तिषु कर्माङ्गानामनुबन्धात् संपादनात् अग्नीनां स्वातन्त्र्यम्, कर्माङ्गत्वे अङ्गानां प्रत्यक्षसिद्धत्वेन संपादनवैयर्थ्यात् । आदिशब्देनातिदेशो गृह्यते । यत्तु अयमतिदेशः पूर्वपक्षानुकूल इति, तन्न; अग्नित्वसादृश्येनातिदेशस्य सिद्धान्तेऽप्युपपत्तेः । सूत्रे बहुवचनसिद्ध्यर्थं पूर्वोक्तश्रुतिलिङ्गादिकं बोध्यम् । एवं च अनुबन्धादिभ्यो हेतुभ्यः

स्वातन्त्र्यं मनश्चिदादीनाम् । प्रज्ञान्तरपृथक्त्ववत् यथा प्रज्ञान्तराणां शाण्डिल्यादिविद्यानां स्वातन्त्र्यं तद्वत् । ननु मनश्चिदादीनां स्वातन्त्र्ये कर्मप्रकरणादुत्कर्षः क्व दृष्ट इत्यत आह—— दृष्टश्च । राजसूयं प्रस्तुत्य श्रुताया अवेष्टेः ब्राह्मणादिकर्तृकाया राजमात्रकर्तृकराजसूयप्रकरणात् उत्कर्षो दृष्टः, तद्वदिहापि अग्नीनां कर्मप्रकरणादुत्कर्ष इति । तदुक्तं प्रथमे काण्डे— 'क्रत्वर्थायामिति चेन्न वर्णत्रयसंयोगात्' इति ॥

यदवादि पूर्ववादिना मानसवन्मनश्चिदादीनां क्रियाशेषत्वमिति तद्विघटयति——

न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः ॥ ५१ ॥

मनश्चिदादीनां मानसत्वसामान्यादपि न क्रियाशेषत्वं कल्प्यम्, उक्तश्रुत्यादिभ्यः स्वातन्त्र्योपलब्धेः । मृत्युवत् यथा 'स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषः' इति 'अग्निर्वै मृत्युः' इति चाग्न्यादित्यपुरुषयोः समानेऽपि मृत्युशब्दप्रयोगे नात्यन्तसाम्यापत्तिः, यथा वा 'असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समित्' इत्यादौ समिदादिसाम्यान्न द्युलोकस्याग्नित्वापत्तिः, अपि तु परस्परवैषम्यम्; तद्वत् मानसमानसिकाग्न्योर्मानसत्वसाम्येऽपि परस्परवैषम्यमित्यर्थः ॥

पूर्वोत्तरब्राह्मणयोः स्वतन्त्रविद्याविधानात् मध्यस्थस्यापि ब्राह्मणस्यास्य स्वतन्त्रविद्याविधिपरत्वमाह—

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ ५२ ॥

मानसिकाग्निब्राह्मणात् परेण ब्राह्मणेन शब्दस्य ताद्विध्यं चित्यग्नौ लोकदृष्टिरूपस्वतन्त्रविद्याविधित्वमेव प्रतीयते। चकारात् पूर्वेणापि ब्राह्मणेन मण्डलपुरुषोपास्तिरूपस्वतन्त्रविद्याविधित्वमेव दृश्यते। तत्सांनिध्यात् मध्यस्थेनापि ब्राह्मणेन मानसाग्नीनां स्वतन्त्रविद्यात्वं बोध्यम्। ननु तर्हि कस्मात्क्रियाग्निना सहपाठ इत्यत आह— भूयस्त्वात्त्वनुबन्धः। तुः शङ्कानिरासार्थः; कर्माङ्गानां मानसाग्निविद्यायां संपाद्यानां बहुत्वात् विद्यायाः क्रियाग्निनानुबन्धः सहपाठः। तस्मादियं मानसाग्निविद्या स्वतन्त्रपुरुषार्थहेतुरिति सिद्धम् ॥

ननु विद्यायाः पुरुषार्थहेतुत्वमयुक्तम्, देहादिव्यतिरिक्तस्य पुरुषस्याभावादित्याक्षेपसंगत्येदमाह—

एक आत्मनः शरीरे भावात् ॥ ५३ ॥

प्रसङ्गादस्य पादसंगतिर्बोध्या। फलं तु पूर्वपक्षे देहादिव्यतिरिक्तात्माभावात् स्वर्गापवर्गादिशास्त्रवैयर्थ्यम्, सिद्धान्ते

तत्सार्थक्यमिति फलभेदः। अत्र आत्मा विषयः; स किं देह एव, उत तदतिरिक्त इति संशये, तत्रैके लोकायतिकाः शरीरातिरिक्तस्य आत्मनोऽसत्त्वं मन्यमानाः शरीरमेवात्मेत्याचक्षते। कुतः, शरीरेऽस्तीत्युपलब्धेर्भावात्, तदभावे चाभावादित्यन्वयव्यतिरेकाभ्यां तस्याः शरीरधर्मत्वेनातिरिक्तात्मासिद्धेरिति पूर्वः पक्षः॥

३०. एकात्म्याधिकरणम्।

सिद्धान्तस्तु—

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत्॥ ५४॥

न त्वात्मनः शरीरादव्यतिरेकः, किं तु व्यतिरेक एव। कुतः, तस्य शरीरस्य मरणावस्थायां भावेऽप्युपलब्धिरूपात्मधर्मस्याभावित्वात्, पतने च तस्य शरीरस्य शरीरान्तरावच्छेदेन तद्धर्मस्य भावित्वात्, न शरीरधर्मत्वम्। उपलब्धिवत् यथा भूतोपलब्धिर्न तद्धर्मः ततो व्यतिरिच्यते, तथा भौतिकदेहोपलब्धिः न तद्धर्मः ततो व्यतिरिच्यते। सैवोपलब्धिरस्माकमात्मेति देहव्यतिरिक्तस्यात्मनः सत्त्वमिति सिद्धम्॥

पूर्वं यथा शरीरात्मनोर्भेदात् आत्मधर्मस्य शरीरे न संभवः, तद्वत् एकशाखागतोद्गीथाद्यपेक्षया शाखान्तरगतोद्गीथादेः स्वरभेदेन भेदादेकशाखागतोद्गीथादिधर्माणां शाखान्तर-

गतोद्गीथादौ न संभव इति दृष्टान्तसंगत्येदमाह––

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥

अत्र पूर्वपक्षेऽनुष्ठानव्यवस्था, सिद्धान्ते तदव्यवस्थेति फलभेदः। सन्ति कर्माङ्गाश्रिता उपासनाः, उद्गीथावयवे ओंकारे
३१. अङ्गावबद्धा- प्राणदृष्टिः, उद्गीथे पृथिवीदृष्टिः, पञ्चविधे
धिकरणम्। साम्नि पृथिव्यादिदृष्टिः इत्येवमाद्याः। ताः
किं यत्र शाखायां विहिताः तच्छाखागतोद्गीथाद्यालम्बनाः, उत सर्वशाखागतोद्गीथाद्यालम्बना इति विशये, तच्छाखागतोद्गीथाद्यालम्बना इति पूर्वः पक्षः। सिद्धान्तस्तु— सौत्रतुशब्दः पूर्वपक्षव्यावृत्त्यर्थः; अङ्गावबद्धाः अङ्गाश्रिताः एता उपासनाः प्रतिवेदं स्वस्वशाखासु विद्यमानोद्गीथाद्यालम्बना एव न भवन्ति, किं तु शाखान्तरीयोद्गीथाद्यालम्बना अपि। कस्मात्, हिशब्दो हेतौ, 'उद्गीथमुपासीत' इत्यादावुद्गीथादिश्रुतेरविशेषाद्धेतोरित्यर्थः॥

इममर्थं दृष्टान्तमुखेनापि स्पष्टयति—

मन्त्रादिवद्वाविरोधः ॥ ५६ ॥

एकशाखाविहितोद्गीथादीनां शाखान्तरगतोद्गीथादिषु प्राप्तेरविरोधः। मन्त्रवत् यथा तण्डुलपेषणार्थमश्मादानमन्त्रस्य

'कुटरुरसि' इत्येकत्राम्नातस्य शाखान्तरेऽपि प्राप्तेरविरोधः, तद्वत् । वाशब्दः दृष्टान्तप्रदर्शनरूपहेत्वन्तरसूचनार्थः ॥

पूर्वं यथा उद्गीथादिश्रुत्या संनिधिप्राप्तव्यवस्थां बाधित्वोद्गीथाद्युपास्तीनां सर्वशाखासु व्यवस्था स्थापिता, तद्वदिहापि व्यवस्था व्यस्तोपास्तीनां विधिश्रुत्या समस्तोपास्तिसंनिधिप्राप्तस्तुत्यर्थत्वं बाधित्वेति दृष्टान्तसंगत्येदमाह—

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ ५७ ॥

अत्र पूर्वपक्षे वाक्यभेदः, सिद्धान्ते तदैक्यमिति फलविवेकः । वैश्वानराख्यायिकायां द्युलोकसूर्यवाय्वादिषु व्यस्तेषु

३२. भूमज्यायस्त्वाधिकरणम् ।

तथा समस्तेष्वपि मूर्धचक्षुःप्राणादिषु वैश्वानरोपास्तिः श्रुता । सा किमिहोभयथाप्युपास्तिर्विवक्षिता, उत समस्तोपास्तिरेवेति विशये, उभयथोपास्तिरिति पूर्वः पक्षः । सिद्धान्तस्तु—भूम्नः समस्तोपासनस्यैवास्मिन्वाक्ये ज्यायस्त्वं प्राधान्येन प्रतिपाद्यत्वम्, न व्यस्तोपास्तीनामपि । क्रतुवत् यथा दर्शपूर्णमासादेः क्रतोः साङ्गप्रधानस्यैकस्यैव प्रयोगो विवक्ष्यते, न व्यस्तानामपि प्रयाजादीनाम्, तद्वत् । ननु भूम्न एव ज्यायस्त्वं कस्मादित्यत आह— तथाहि दर्शयति । प्राचीनशालादिभि-

रुक्तानि व्यस्तोपासनानि निन्दित्वा केकयेन राज्ञा समस्तोपासनस्योक्तत्वादेकवाक्यता श्रुतेरवगम्यते । एवं च एकवाक्यतामापन्नेयं श्रुतिर्भूम्न एव ज्यायस्त्वं दर्शयति । ननु 'कं त्वमात्मानमुपास्से' इत्यादिव्यस्तोपास्तिविधिश्रुतीनां का गतिरिति चेत्, न; व्यस्तोपासनानुवादेन समस्तोपासनस्य विधेयत्वादनुवादकत्वमेव गतिरिति । अतः समस्तोपासनमेव ज्याय इति सिद्धम् ॥

पूर्वं यथा व्यस्तोपास्तिषु विधिश्रुतीनां सत्त्वेऽपि समस्तोपास्तेरेव ज्यायस्त्वमुक्तम्, तथैकोपास्यकोपास्तिषु प्रत्येकं विधीनां सत्त्वेऽपि समस्तोपास्तेरेव ज्यायस्त्वमिति नास्ति विद्यानां भेद इति दृष्टान्तसंगत्येदमाह—

नाना शब्दादिभेदात् ॥ ५८ ॥

फलं पूर्ववत् । सन्ति सगुणब्रह्मैकवेद्याः शाण्डिल्यादिविद्याः, तथैव मुख्यप्राणविद्या अपि । ताः किं नाना, उत

३३. शब्दादिभेदाधिकरणम् । अभिन्ना इति विशये, अभिन्ना इति पूर्वः पक्षः । सिद्धान्तस्तु— विद्याः नानैव भिन्ना एव । कुतः, शब्दादिभेदात् 'वेद' 'उपासीत' 'क्रतुं कुर्वीत' इति शब्दभेदात् । आदिशब्देन उपास्यगुणभेदाच्चेत्यर्थः ॥

पूर्वत्र विद्यानानात्वे सिद्धे किलायं विचारः प्रवर्तत इति हेतुहेतुमद्भावसंगत्येदमाह—

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥

अत्र पूर्वपक्षे यथेष्टमनुष्ठानमित्यनियमः, सिद्धान्ते विकल्पेनानुष्ठानमिति नियम इति फलभेदः। याः सगुणब्रह्म-

३४. विकल्पाधिकरणम्। विद्याः वेद्यसाक्षात्कारेण फलहेतवः, किं तासां विकल्पसमुच्चयाभ्यामनुष्ठानम्, उत विकल्प एवेति संशये, नियामकाभावात् स्वेच्छयैवेति पूर्वः पक्षः। सिद्धान्तस्तु— विकल्प एवासां विद्यानां युक्तः। कुतः, अविशिष्टफलत्वात् वेद्यसाक्षात्काराख्याभिन्नफलत्वादित्यर्थः ॥

पूर्वम् अहंग्रहोपास्तीनां विकल्पेनैवानुष्ठेयत्वमभाणि, तद्वदुपास्तित्वाविशेषात् प्रतीकोपास्तीनामपि विकल्पेनैवानुष्ठेयत्वं स्यादिति दृष्टान्तसंगत्येदमाह—

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥

अत्र पूर्वपक्षे व्रीह्यादिष्विवानुष्ठानानियमासिद्धिः, सिद्धान्ते फलवशादनियम इति फलभेदः। याश्च प्रतीकोपास्तयो 'नाम ब्रह्मेत्युपासीत' इत्यादिकाः, तासु किं विकल्पः, उत

यथाकाममनुष्ठानमिति विशये, विकल्प एवेति पूर्वः पक्षः।
३५. काम्याधिकरणम्। सिद्धान्तस्तु—काम्यास्तु अदृष्टद्वारा फलहेतवो विद्याः यथाकामं समुच्चीयेरन् वा न वा समुच्चीयेरन्। कुतः, पूर्वहेतोरविशिष्टफलत्वस्य विकल्पप्रयोजकस्यात्राभावादित्यर्थः॥

पूर्वं यथा प्रतीकोपास्तीनां स्वतन्त्रत्वाद्यथाकाममनुष्ठानम्, न तथेहाङ्गाश्रितोपास्तीनाम् अङ्गतन्त्रत्वादिति प्रत्युदाहरणसंगत्येदमाह—

अङ्गेषु यथाश्रयभावः॥ ६१॥

अत्र पूर्वपक्षे समुच्चयानुष्ठानात् फलबाहुल्यम्, सिद्धान्ते यथाकाममनुष्ठानात् प्रयोगसौकर्यमिति फलभेदः। याश्च कर्मा-
३६. यथाश्रयभावाधिकरणम्। ङ्गोद्गीथाश्रिताः विद्याः, तासु समुच्चयेनैवानुष्ठानम्, उत यथाकाममिति विशये, पूर्वः पक्षः—अङ्गेषु यथाश्रयभावः, यथा क्रतुषु आश्रितानामङ्गानां समुच्चित्यानुष्ठाननियमः, तथाङ्गेष्वाश्रितानामुपास्तीनाम् आश्रयभावः समुच्चित्यानुष्ठाननियम इत्यर्थः॥

ननु तर्हि गोदोहनस्यापि समुच्चये नियमः स्यादित्यत आह—

शिष्टेश्च॥ ६२॥

शिष्टेः शासनात् विधानात् विहितत्वाविशेषादङ्गवत्समुच्चय इत्यर्थः । गोदोहनस्य चमसे विहितत्वान्न समुच्चयानुष्ठाननियमः; उपास्तीनां तु कस्यचिदङ्गस्य स्थाने विहितत्वात्समुच्चयनियमो न विरुध्यत इति भावः ॥

समुच्चये लिङ्गमाह—

समाहारात् ॥ ६३ ॥

'होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरति' इति ऋग्वेदोक्तप्रणवस्य सामवेदोक्तोद्गीथेनैक्योपास्तिबलादुद्गात्रा प्रमादाद्दुष्टस्यापि उद्गीथस्य सम्यक्कृतहोतृशंसनतः समाहारान्निर्दोषकरणादित्यर्थः । एवं च वेदद्वयोक्तप्रणवोद्गीथयोरैक्यज्ञानस्यैतादृशं फलं ब्रुवच्छान्दोग्यवाक्यं सर्ववेदोक्तानामप्यङ्गाश्रितोपास्तीनां संबन्धसामान्यात् समुच्चये लिङ्गमिति भावः ॥

लिङ्गान्तरमप्याह—

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

तेनोंकारेण वेदत्रयोक्तं कर्म भवतीत्युद्गीथोपास्तौ गुणभूतस्योपास्यस्योंकारस्य सर्वकर्मणि साधारण्यश्रवणात्तदाश्रितोपास्तीनामपि साधारण्यं समुच्चयानुष्ठानमित्यर्थः । यद्वा गुणसाधारण्यश्रुतेश्च यदि सर्वेषां कर्मगुणानाम् उद्गीथादीनां समुच्चित्यानुष्ठानात्मकसाधारण्यं न स्यात्, तर्हि तदाश्रितोपास्ती-

नामपि समुच्चित्यानुष्ठानं न स्यात् । न त्वेतदस्ति, प्रयोगवचनेन सर्वाङ्गग्राहिणां तेषां साधारण्यश्रवणात् । ततश्च तदाश्रितोपास्तीनामपि साधारण्यमित्यर्थः ॥

एवं पूर्वपक्षे सिद्धान्तः—

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥

वाशब्दस्त्वर्थः पूर्वपक्षनिरासार्थः । न अङ्गाश्रितोपास्तीनां अङ्गवत्समुच्चयनियमः । कुतः, तत्सहभावाश्रुतेः 'ग्रहं वा गृहीत्वा' इत्यादिना यथाङ्गानां सहभावः श्रूयते, तद्वत् तासामुपास्तीनां सहभावस्याश्रुतेः । न चाङ्गतन्त्रत्वादुपास्तीनां समुच्चयनियम इति साम्प्रतम्, अङ्गतन्त्रस्यापि गोदोहनस्यानुष्ठानानियमादिति दिक् ॥

दर्शनाच्च ॥ ६६ ॥

'एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति' इति श्रुतावङ्गाश्रितोपास्तीनामसमुच्चयदर्शनादित्यतिशोभनम् ॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्व-
प्रकाशिकायां तृतीयाध्यायस्य
तृतीयः पादः ॥

ॐ

चतुर्थः पादः ॥

इत्थं पूर्वस्मिन्पादे परापरब्रह्मविद्यानां गुणोपसंहारोक्त्या परिमाणमवधारितम् । इह तु तासां कर्मानपेक्षाणामेव पुरुषार्थसाधनत्वं निरूपयितुं तासां यज्ञादीनि बहिरङ्गानि शमादीन्यन्तरङ्गानि च निरूप्यन्ते इत्येकविद्याविषयकत्वलक्षणसंगत्या अयं चतुर्थः पाद आरभ्यते । पूर्वपादान्त्याधिकरणे कर्माङ्गविद्योक्ता, तत्प्रसङ्गात् ब्रह्मज्ञानस्य कर्माङ्गत्वमाशङ्क्य समाधत्त इति प्रसङ्गसंगत्येदमधिकरणमाह—

१. पुरुषार्थाधिकरणम् ।

पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥

अत्र पूर्वपक्षे ज्ञानकर्मणोरङ्गाङ्गित्वेन समुच्चयः, सिद्धान्ते केवलज्ञानान्मुक्तिरिति फलभेदः । अत्र परब्रह्मविद्या विषयः ; सा किं कर्तृद्वारा क्रत्वनुप्रवेशिनी, उत स्वतन्त्रैव पुरुषार्थसाधिकेति विशये, क्रत्वनुप्रवेशिनीति पूर्वः पक्षः । सिद्धान्तस्तु—अतः अस्मादौपनिषदात्मज्ञानात् स्वतन्त्रात् पुरुषार्थो

मोक्षः सिद्ध्यतीति बादरायण आचार्यो मन्यते। कुतः, 'तरति शोकमात्मवित्' 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिकेवलविद्याया मोक्षहेतुत्वबोधकशब्दादित्यर्थः। इदमुपलक्षणं सगुणविद्यानामपि स्वातन्त्र्येण फलहेतुत्वं तत्तत्फलश्रुतेरिति बोध्यम् ॥

इत्थं सिद्धान्तमुपक्रम्य पूर्वपक्षयति—

शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥

कर्तृत्वेनात्मनः कर्मशेषत्वात्तज्ज्ञानमपि पर्णतावत् कर्मशेषात्मद्वारा क्रत्वङ्गम्, फलशून्यत्वे सति कर्माङ्गाश्रयत्वात्। ननु विशेषणासिद्धो हेतुः, 'तरति शोकमात्मवित्' इत्यादिफलश्रुतेरित्यत आह— पुरुषेत्यादि। यथा अन्येषु द्रव्यसंस्कारकर्मसु अपापश्लोकश्रवणादिफलश्रुतिरर्थवादः, तथात्रापि पुरुषार्थश्रुतिरर्थवाद इति जैमिनिराचार्यो मन्यते। ततश्च न हेतोर्विशेषणासिद्धिरिति भावः ॥

आचारदर्शनात् ॥ ३ ॥

'जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे' इत्यादौ ब्रह्मविदां जनकादीनां विद्यया सह कर्माचारदर्शनात् विद्यायाः कर्माङ्गत्वमित्यर्थः ॥

किं च—

तच्छ्रुतेः ॥ ४ ॥

'यदेव विद्यया करोति....तदेव वीर्यवत्तरं भवति' इति तृतीयाश्रुत्या विद्यायाः, तस्य कर्मशेषत्वस्य, श्रवणादित्यर्थः ॥

किं च—

समन्वारम्भणात् ॥ ५ ॥

'तं विद्याकर्मणी समन्वारभेते' इति फलारम्भे विद्याकर्मणोः साहित्यदर्शनादपि विद्यायाः कर्माङ्गत्वमित्यर्थः ॥

किं च—

तद्वतो विधानात् ॥ ६ ॥

'आचार्यकुलाद्वेदमधीत्य' इत्यादिश्रुत्या सकलवेदार्थज्ञानवतः कर्मविधानादपि लिङ्गात् कर्माङ्गत्वं विद्याया इत्यर्थः ॥

किं च—

नियमाच्च ॥ ७ ॥

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इत्यादिकात् यावज्जीवं कर्माचारनियमाच्च ब्रह्मविद्यायाः कर्मशेषत्वमेवेत्यर्थः ॥

इत्थं षड्भिः सूत्रैः पूर्वपक्षे प्राप्ते, दशभिः सूत्रैः सिद्धान्तयति—

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

तुः पूर्वपक्षनिरासार्थः। यदवादि पूर्ववादिना तत्त्वज्ञानं कर्माङ्गं फलशून्यत्वे सति कर्माङ्गाश्रयत्वादिति, तन्न; हेतोर्विशेष्यासिद्धेः। कस्माद्विशेष्यासिद्धिः, अधिकोपदेशात् यः कर्मकर्ता तदङ्गभूतः सन् संसारी, तस्मादधिकस्याकर्तुरसंसारिणश्चिन्मात्रस्य वेदान्तेषूपदेशात्। ततश्च तत्त्वज्ञानं चिन्मात्राश्रयमेवेति भवति विशेष्यासिद्धिः। एवं च तत्त्वज्ञानफलश्रुतेर्नार्थवादत्वम्। तस्मात् एवं यन्मतं भगवतो बादरायणस्य तत्तथैवेति व्यवस्थितम्; न चाधिकोपदेशासिद्धिरिति सांप्रतम्। तद्दर्शनात् तस्याधिकस्य चिन्मात्रस्य 'यः सर्वज्ञः सर्ववित्' इत्यादिश्रुतिसहस्रेषु दर्शनादित्यर्थः॥

यदुक्तम् 'आचारदर्शनात्' इति तत्राह—

तुल्यं तु दर्शनम् ॥ ९ ॥

तत्त्वज्ञानस्य कर्मशेषत्वाभावेऽपि आचारदर्शनं तुल्यमेव। 'एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवांचक्रिरे' इत्यादिका श्रुतिरात्मविदां कर्माचाराभावं दर्शयति। तुशब्देनाकर्माङ्गलिङ्गदर्शनस्य प्राबल्यं सूचितम्। जनकादीनां तु अहम-

भिमानाभावेन तत्कृतकर्मणोऽकर्मतया तदाचारदर्शनस्य दौर्बल्यमिति ध्येयम् ॥

यदुक्तम् 'तच्छ्रुतेः' इति तत्राह—

असार्वत्रिकी ॥ १० ॥

'यदेव विद्यया करोति' इति श्रुतिरसार्वत्रिकी सर्वविद्याविषया न भवति, प्रकृतोद्गीथविद्यामात्रपरत्वात् । ततश्च न श्रुतिबलात् ब्रह्मविद्यायाः कर्माङ्गत्वसिद्धिरित्यर्थः ॥

यदपि 'समन्वारम्भणात्' इति तत्राह—

विभागः शतवत् ॥ ११ ॥

'तं विद्याकर्मणी समन्वारभेते' इत्यत्र विद्या अन्यं पुरुषमन्वारभते, कर्मान्यमिति विभागो द्रष्टव्यः । शतवत् यथा शतमाभ्यां दीयतामित्युक्ते विभज्य दीयते पञ्चाशदेकस्मै पञ्चाशदपरस्मै, तद्वादित्यर्थः । एवं चास्य समन्वारम्भणवाक्यस्य संसारिविषयता, न मुमुक्षुविषयतेति भावः ॥

यच्च 'तद्वतो विधानात्' इति तत्राह—

अध्ययनमात्रवतः ॥ १२ ॥

'आचार्यकुलाद्वेदमधीत्य' इति वाक्ये वेदाध्ययनमात्रवतः कर्म विधीयते, नौपनिषदात्मज्ञानवत इत्यर्थः ॥

यत्तु 'नियमाच्च' इति तत्राह—

नाविशेषात् ॥ १३ ॥

'कुर्वन्नेवेह कर्माणि' इति वाक्यं न तत्त्वविद्विषयम्, विद्वानिति विशेषाभावादित्यर्थः ॥

यद्वा—

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

इयं तत्त्वविदः कर्मानुमतिः कर्मानुज्ञा ब्रह्मविद्यास्तुतये ज्ञातव्या। स्तुतिश्चैवम्—यावज्जीवं कर्म कुर्वत्यपि त्वयि विदुषि विद्यासामर्थ्यात् कर्म न लेपाय भवतीति बोध्यम् ॥

किं च—

कामकारेण चैके ॥ १५ ॥

एके विद्वांसः प्रत्यक्षीकृततत्त्वज्ञानफलाः परोक्षफलकधर्मसाधनं प्रजादिकं कामकारेण स्वेच्छया त्यक्तवन्त इति श्रूयते 'एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते' इत्यादिना । तदेवं तत्त्वज्ञानस्य कर्माङ्गत्वाभावे तत्त्वविदां स्वेच्छया प्रजादित्यागो लिङ्गं सूचितमिति बोध्यम् ॥

अपि च—

उपमर्दं च ॥ १६ ॥

कर्मानुष्ठानहेतोः क्रियाकारकफलविभागस्य समस्तस्याविद्याकृतस्य विद्यासामर्थ्यात् उपमर्दम् अभावमामनन्ति 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' इत्यादिना। तथा च ब्रह्मविद्यायाः कर्मविरोधित्वान्न कर्माङ्गत्वमिति भावः ॥

ब्रह्मविद्यायाः कर्मानङ्गत्वे हेत्वन्तरमाह—

ऊर्ध्वरेतःसु च शब्दे हि ॥ १७ ॥

ऊर्ध्वरेतःसु यतिषु हि ब्रह्मविद्यावगता। न हि तस्याः कर्माङ्गत्वं संभवति, तेषां कर्माभावात्। न च यत्याश्रमः क्वापि न श्रुत इति सांप्रतम्। शब्दे हि 'त्रयो धर्मस्कन्धाः' इति प्रस्तुत्य 'ब्रह्मसंस्थोऽमृतत्वमेति' इत्यस्मिन् शब्दे हि यत्याश्रमस्य श्रुतत्वात् प्रामाणिकोऽयं यत्याश्रमः। तदेवं ब्रह्मविद्यायाः न कर्माङ्गत्वम्, अपि तु स्वतन्त्रपुरुषार्थहेतुत्वमिति सिद्धम् ॥

पूर्वम् 'त्रयो धर्मस्कन्धाः' इत्यादिश्रुतिर्यत्याश्रमसद्भावे प्रमाणमित्यभाणि; तदसंभवीत्याक्षेपसंगत्येदमाह—

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

अत्र पूर्वपक्षे पारिव्राज्याभावात् ज्ञानस्य स्वतन्त्रफलत्वा-

सिद्धिः, सिद्धान्ते तत्सद्भावात् तत्सिद्धिरिति फलभेदः । अत्र

२. परामर्शाधिकरणम् । यत्याश्रमो विषयः ; स किमस्ति न वेति विशये, जैमिनिराचार्य आह—नास्ति यत्याश्रमः, विध्यभावात् । 'त्रयो धर्मस्कन्धाः' इत्यादिश्रुतौ तु परामर्शमनुवादमात्रमवगम्यते, न विधिः । अत इयं श्रुतिः अचोदना लिङ्गादिशून्या, चकारात् ब्रह्मसंस्था स्तुतिपरा च । एवं चान्यपरया श्रुत्या न यत्याश्रमसिद्धिः । किं च 'वीरहा वा एष देवानां योऽग्निमुद्वासयते' इत्याद्या श्रुतिरग्न्युद्वासनप्रधानं यत्याश्रममपवदति हि यस्मात् तस्मान्नास्ति यत्याश्रम इति पूर्वः पक्षः ॥

सिद्धान्तस्तु—

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

पारिव्राज्यमनुष्ठेयं भगवान्बादरायणो मन्यते । कुतः, साम्यश्रुतेः 'त्रयो धर्मस्कन्धाः' इत्यादिश्रुतौ इतराश्रमाणां श्रुत्यन्तरविहितानां एतद्वाक्यानुवाद्यगार्हस्थ्येन साम्यश्रवणादित्यर्थः । ततश्चाश्रमचतुष्टयानुवादेन ब्रह्मसंस्थास्तुतिपरादपि वाक्यात्प्रतीयमाना आश्रमाः सिद्ध्यन्ति । न च वीरहेत्यादिश्रुतिविरोधः, तस्याः श्रुतेरज्ञानादग्न्युद्वासनोद्युक्ताहिताग्निविषयत्वादिति फलितार्थः ॥

यद्वा—

विधिर्वा धारणवत् ॥ २० ॥

अस्मिन्वाक्ये आश्रमाणां विधिरेव, नानुवादः न चानेकाश्रमविधाने वाक्यभेदः स्यादिति सांप्रतम्, अपूर्वत्वेनाश्रमाणां विधेरेवावश्यकत्वेन वाक्यभेदस्येष्टत्वात् । एकवाक्यताप्रतीतावप्यपूर्वार्थविधौ दृष्टान्तः-- धारणवत् 'अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयति' इत्यत्र स्रुग्दण्डादधस्तात् समिद्धारणविध्येकवाक्यताप्रतीतावप्युपरि धारणस्यापूर्वत्वादेकवाक्यताभङ्गेन विधिर्यथा कल्पितः, तथेहापीत्यर्थः। वस्तुतस्तु अस्मिन्वाक्ये पारिव्राज्यमेव विधीयते, आश्रमत्रयमनूद्यानित्यफलत्वेन तन्निन्दया ब्रह्मसंस्थत्वस्यैव नित्यफलत्वेन स्तूयमानत्वात्; यत् स्तूयते तद्विधेयमिति न्यायात्। न च ब्रह्मसंस्थत्वस्य गृहस्थादीनां संभवादिति सांप्रतम्, तेषां स्वस्वकर्मासक्ततया ब्रह्मसंस्थत्वायोगात्। परिशिष्यमाणः परिव्राडेव ब्रह्मसंस्थ इत्यस्मिन् पक्षे न वाक्यभेदः। तस्मात्सर्वकर्मपरित्यागलक्षणस्य पारिव्राज्यस्य प्रामाणिकत्वाद्विद्यायाः स्वतन्त्रपुरुषार्थसाधनत्वं युक्तमिति सिद्धम् ॥

पूर्वं यथा अनुष्ठेयाश्रमसाम्यश्रुतेः पारिव्राज्यस्यानुष्ठेयत्वं प्रतिष्ठापितम्, तद्वत् 'इयमेव जुहूरादित्यः' इत्यादिकर्माङ्गस्तुत्या

रसतमत्वादिवाक्यस्य साम्यात् स्तुतिमात्रत्वमिति दृष्टान्तसंगत्येदमाह—

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

अत्र पूर्वपक्षे कर्माङ्गाश्रितोपास्तीनाम् अनुष्ठानासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः । उद्गीथाद्युपास्तिषु श्रूयते—

३. स्तुतिमात्राधिकरणम् ।

'स एष रसानां रसतमः परमः' इत्यादि । तद्वाक्यं किं कर्माङ्गोद्गीथस्तुतिमात्रम्, उतोद्गीथोपास्तौ गुणविधायकमिति विशये, रसतमत्वादिवाक्यं सर्वमपि कर्माङ्गोद्गीथस्तुतिमात्रम् । कुतः, कर्माङ्गोद्गीथाद्युपादानश्रवणादिति चेदिति पूर्वः पक्षः । सिद्धान्तस्तु— न स्तुतिमात्रम्, अपि तु गुणविधायकम् । कुतः, अपूर्वत्वात् कर्माङ्गोद्गीथाद्युपास्तीनां रसतमत्वादिगुणानां च मानान्तराप्राप्तत्वादित्यर्थः । प्रकृत एव विधिसंभवे प्रकरणान्तरोद्गीथादिस्तुतिलक्षणाकल्पनमन्याय्यतरमिति भावः ॥

किं च—

भावशब्दाच्च ॥ २२ ॥

किं च 'उद्गीथमुपासीत' 'सामोपासीत' इत्यादिविधिशब्दात् गुणविधायकमिदं वाक्यमित्यर्थः ॥

पूर्वं यथा रसतमत्वादेरुद्गीथादिस्तुत्यर्थत्वापेक्षयोपास्यविषयसमर्पकत्वस्य ज्यायस्त्वम्, तथा आख्यायिकानामपि विद्यास्तुत्यर्थत्वापेक्षया पारिप्लवशेषत्वस्य ज्यायस्त्वमस्त्विति दृष्टान्तसंगत्येदमाह—

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

अत्र पूर्वपक्षे औपनिषदाख्यायिकानां पारिप्लवप्रयोगशेषत्वात् तदेकवाक्यतोपपन्नशब्दबोध्यविद्यायाः प्राधान्याभावेन पुरुषार्थहेतुत्वासिद्धिः, सिद्धान्ते तासां विद्यास्तुत्यर्थत्वात् विद्यैकवाक्यतया तस्याः प्राधान्येन पुरुषार्थहेतुत्वसिद्धिरिति फलभेदः। वेदान्तेषु तत्र तत्र 'अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः' इत्याद्या आख्यायिकाः श्रूयन्ते। ताः किं पारिप्लवार्थाः, उत संनिहितविद्यास्तुत्यर्था इति विशये, पारिप्लवार्थाः; अश्वमेधे पुत्रादिपरिवृताय राज्ञे यन्नानाविधकथाकथनं तत्पारिप्लवशब्देनोच्यते, तदर्था एव आख्यायिका इति चेदिति पूर्वः पक्षः। सिद्धान्तस्तु—न पारिप्लवार्थाः। कुतः, विशेषितत्वात् 'पारिप्लवमाचक्षीत' इत्युपक्रम्य 'मनुर्वैवस्वतो राजा' इत्यादिवाक्यशेषे कासांचिदेवाख्यायिकानां पारिप्लवशेषत्वेन विशेषितत्वादित्यर्थः॥

४. पारिप्लवाधिकरणम्।

ननु तर्हि किमर्था इमा आख्यायिका इत्याशङ्क्य संनि-

धिबलाद्विद्यार्था इत्याह—

तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥

तथा च उक्तयुक्त्या पारिप्लवार्थाभावे सति संनिधिबलाद्विद्यास्तुत्यर्थत्वमाख्यायिकानां युक्तम् । कुतः, एकवाक्यतोपबन्धात् संनिहिततत्तद्विद्यैकवाक्यत्वदर्शनादित्यर्थः ॥

पूर्वं यद्वदाख्यायिकानां विद्याशेषत्वेनापेक्षा, तद्वद्यज्ञादिकर्मणामपि फले विद्याशेषत्वेनापेक्षास्त्विति दृष्टान्तसंगत्येदमाह—

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

पुरुषार्थाधिकरणफलरूपत्वादस्य तत्रोक्तं फलं द्रष्टव्यम् । ब्रह्मविद्या किं स्वफले मोक्षे जनयितव्ये सहकारित्वेन यज्ञादिकर्माण्यपेक्षते, न वेति संदेहे, अपेक्षत इति पूर्वः पक्षः । सिद्धान्तस्तु— अत एव आद्याधिकरणोक्तात् स्वतन्त्रपुरुषार्थत्वादेव ब्रह्मविद्यायाः अग्नीन्धनाद्यनपेक्षा । अग्नीन्धनशब्देन स्वस्वाश्रमविहितानि कर्माणि लक्ष्यन्ते । तथा च मोक्षे न कर्मापेक्षा रजतभ्रमनिवृत्तौ शुक्तिज्ञानस्येवेत्यर्थः ॥

५. अग्नीन्धनाद्यधिकरणम् ।

यथा पूर्वं ब्रह्मविद्यायाः प्रमात्वाच्छुक्तिज्ञानस्येव स्वफले कर्मानपेक्षेत्यभाणि, तथा स्वोत्पत्तावपि कर्मानपेक्षा प्रमात्वादे-

वेति दृष्टान्तसंगत्येदमाह—

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

अत्र पूर्वपक्षे ज्ञानार्थं यज्ञाद्यनुष्ठानाभावः, सिद्धान्ते तदनुष्ठानावश्यंभाव इति फलभेदः। अत्र किं विद्यायाः

६. सर्वापेक्षाधिकरणम्। स्वोत्पत्तौ कर्मापेक्षास्ति न वेति संदेहे, नास्तीति पूर्वः पक्षः। सिद्धान्तस्तु—विद्यायाः स्वोत्पत्तौ सर्वेषामाश्रमकर्मणामपेक्षास्ति। कुतः, यज्ञादिश्रुतेः 'विविदिषन्ति यज्ञेन दानेन' इत्यादिना यज्ञादिकर्मणां विविदिषाद्वारा ज्ञानसाधनत्वश्रवणात्। ननु परंपरया ज्ञानोत्पत्तौ कर्मापेक्षावन्मोक्षेऽप्यस्त्वपेक्षा। तत्राह– अश्ववत् यथाश्वो योग्यताबलात् रथचर्यायां विनियुज्यते न लाङ्गलकर्षणे, तद्वत्कर्मणां मोक्षे योग्यत्वाभावात् नापेक्षेत्यर्थः ॥

ज्ञानोत्पत्तौ बहिरङ्गसाधनमभिधायान्तरङ्गसाधनमभिधातुमाह—

शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ २७ ॥

यद्यप्यत्र विविदिषन्तीति वर्तमानापदेशात् न विधिः, तथापि शमदमाद्युपेतस्तु ब्रह्मविद्यार्थी स्यात्। कुतः, तदङ्गतया

विद्याङ्गतया तद्विधेः 'तस्मादेवंविच्छान्तो दान्त उपरतः' इत्यादिना तेषां शमदमादीनां विधानात्; तेषां विहितानां चावश्यानुष्ठेयत्वादित्यर्थः ॥

पूर्वं यथा विद्यासंनिधानात् शमादिकं विद्याङ्गं विधीयत इत्यभिहितम्, तथा सर्वान्नानुमतिः विद्याङ्गमेव विधीयत इति दृष्टान्तसंगत्येदमाह—

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

अत्र पूर्वपक्षे प्राणविद्याविदो भक्ष्याभक्ष्यविभागासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। बृहदारण्यके प्राणविद्यायां

७. सर्वान्नानुमत्यधिकरणम् ।

श्रूयते—'न ह वा अस्यानन्नं जग्धं भवति' इति । तत्र प्राणोपासकस्य किमिदं सर्वान्नानुज्ञानं विद्याङ्गं विधीयते, उत स्तुत्यर्थं संकीर्त्यत इति संशये, विद्याङ्गं विधीयत इति पूर्वः पक्षः । सिद्धान्तस्तु— प्राणात्यये सर्वमन्नं सुरावर्जं यत् तस्य विद्वांसमविद्वांसं वा प्रति अदनीयत्वेन अनुमतिः अनुज्ञानम, न स्वस्थं प्रति। कुतः, तद्दर्शनात् चाक्रायणोपाख्याने उषस्तेश्चाक्रायणस्य आपत्काल एव हि तस्य हास्तिपकोच्छिष्टकुल्माषभक्षणस्य दर्शनादित्यर्थः । एवं च विध्यभावात् श्वादिमर्यादान्नस्य एकेनात्तुमशक्यत्वाच्च न

सर्वान्नानुज्ञानं विद्याङ्गं विधीयते; अपि तु 'प्राणमात्रस्यान्नमिदं सर्वम्' इति यच्चिन्तनं विहितम्, तत् स्तुत्यर्थं संकीर्त्यत इति भावः ॥

अबाधाच्च ॥ २९ ॥

भक्ष्याभक्ष्यविवेकशास्त्रस्य अबाधाच्चार्थवादमात्रमित्यर्थः। अन्यथा सामान्यशास्त्रं विशेषपरतया नीयमानं बाधितं स्यादिति भावः ॥

अपि च स्मर्यते ॥ ३० ॥

अपि चापत्काले विदुषोऽविदुषश्च सर्वान्नभक्षणं स्मर्यते—'जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा' इति, 'मद्यं नित्यं ब्राह्मणो वर्जयेत्' इति च ॥

स्मृतिमूलभूतां श्रुतिमप्याह—

शब्दश्चातोऽकामकारे ॥ ३१ ॥

अस्याभक्ष्यभक्षणस्य प्रतिषेधः 'तस्माद्ब्राह्मणः सुरां न पिबेत्' इत्येवंरूपशब्दश्च अकामकारे स्वेच्छाकृतप्रवृत्तिनिरासे श्रूयते। अतः प्राणविदः सर्वान्नानुज्ञानमर्थवादमात्रमिति सिद्धम् ॥

पूर्वं यथा सर्वान्नानुमतेः शास्त्रान्तरविरोधात् स्तुतित्व-

मुक्तम्, तथा 'यावज्जीवमग्निहोत्रं जुहुयात्' इत्यादिकर्मनित्यत्वशास्त्रविरोधाद्यज्ञादीनां ज्ञानसाधनत्वश्रुतेः स्तुतित्वमस्त्विति दृष्टान्तसंगत्येदमाह—

विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

अत्र पूर्वपक्षे विविदिषावाक्यस्य विवक्षितार्थत्वासिद्धिः, सिद्धान्ते खादिरवत् कर्मणामुभयार्थत्वसंभवात् तत्सिद्धिरिति

८. आश्रमकर्माधिकरणम्।

फलभेदः। सर्वापेक्षेत्यत्र स्वस्वाश्रमनित्यकर्मणां तत्त्वज्ञानसाधनत्वमुक्तम्। तानि नित्यकर्माण्यमुमुक्षुणा कर्तव्यानि न वेति संदेहे, न कर्तव्यानीति पूर्वः पक्षः। सिद्धान्तस्तु— अमुमुक्षुणापि आश्रमकर्मावश्यं कर्तव्यमेव। 'यावज्जीवमग्निहोत्रं जुहुयात्' इत्यादिना विहितत्वादित्यर्थः॥

नन्वेवं सति कर्मणां विद्यार्थत्वं न स्यादित्यत आह—

सहकारित्वेन च ॥ ३३ ॥

सह मिलित्वा चित्तशुद्धिद्वारा विद्यां कुर्वन्तीति सहकारीणि कर्माणि, तेषां भावः तत्त्वम्, तेन विद्यार्थत्वेन नित्यकर्माणि कर्तव्यानि। यज्ञादिश्रुत्या तदर्थत्वेन तेषां विहितत्वादेवेत्यर्थः॥

ननु कर्मकाण्डस्थनित्याग्निहोत्रेभ्यो भिन्ना एव यज्ञादयो विविदिषावाक्ये विद्यासंयुक्ततया विधीयन्ते, प्रकरणभेदस्य भेदकत्वात्; कथं तेषामुभयार्थत्वमित्यत आह—

सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥

सर्वथापि नित्यत्वेन विद्यार्थत्वेन च अनुष्ठेया यज्ञादयः त एव, न भिन्नाः । कुतः, उभयलिङ्गात् 'यज्ञेन विविदिषन्ति' इति श्रुतिलिङ्गात्, 'अनाश्रितः कर्मफलं कार्यं कर्म करोति यः' इति स्मृतिलिङ्गाच्चेत्यर्थः ॥

किं च—

अनभिभवं च दर्शयति ॥ ३५ ॥

ब्रह्मचर्यादिसाधनसंपन्नस्य रागादिक्लेशैरनभिभवम् 'एष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविन्दते' इत्याद्या श्रुतिर्दर्शयति । अनेन सूत्रेण ब्रह्मचर्याद्याश्रमकर्मणां सहकारित्वमेव दृढीकृतम् ॥

पूर्वं यथा यज्ञादिश्रुत्या आश्रमकर्मणामेव ज्ञानसाधनत्वविधानादाश्रमिणामधिकारः, न तथा विधुराणामधिकारः, तत्कृतकर्मणां ज्ञानसाधनत्वाभावादिति प्रत्युदाहरणसंगत्येदमाह—

अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

अत्र पूर्वपक्षे अनाश्रमिकर्मणां जपादीनां विद्यासाधनत्वासिद्धिः; सिद्धान्ते तत्सिद्धिरिति फलभेदः । अत्र विधु-

९. विधुराधिकरणम् ।

राणां किं ब्रह्मविद्यायामधिकारोऽस्ति न वेति संदेहे, नास्तीति पूर्वः पक्षः । सिद्धान्तस्तु— अन्तरा आश्रममन्तरा विना वर्तमानानामपि अस्त्यधिकारः । कुतः, तद्दृष्टेः तस्य ब्रह्मविद्याधिकारस्यानाश्रमिणां रैक्वादीनां श्रुतौ स्मृतौ च दर्शनादित्यर्थः ॥

अपि च स्मर्यते ॥ ३७ ॥

संवर्तकप्रभृतीनामनाश्रमिणामपि योगित्वं स्मर्यत इत्यर्थः ॥

नन्वनाश्रमिणां विद्याहेतुकर्माभावान्न तत्राधिकार इत्यत आह—

विशेषानुग्रहश्च ॥ ३८ ॥

अनाश्रमिणामपि रैक्वादीनां जपोपवासदेवताराधनादिभिः कर्मविशेषैर्ज्ञानहेतुभिरस्ति विद्यायामनुग्रह इत्यर्थः ॥

नन्वनाश्रमिणामपि जपादिनैव विद्यासिद्धेः तर्ह्याश्रमित्वं व्यर्थं स्यादित्यत आह—

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

अतस्तु अनाश्रमित्वात् इतरत् आश्रमित्वं ज्यायः शीघ्रमेव

विद्यासाधनम्। कुतः, 'तेनैति ब्रह्मवित् पुण्यकृत्तैजसश्च' इति श्रुतौ ब्रह्मवित्त्वविशेषणरूपश्रुतिलिङ्गाच्चेत्यर्थः ॥

पूर्वं यथा अनाश्रमिणां कर्मणो विद्याहेतुत्वमुक्तम्, तथोत्तमाश्रमात् पूर्वाश्रमं प्राप्तस्य कर्मणां विद्याहेतुत्वम् अस्त्विति दृष्टान्तसंगत्येदमाह—

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ४० ॥

अत्र पूर्वपक्षे आश्रमज्यायस्त्वासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। उत्तमाश्रमात्पूर्वाश्रमं प्राप्तस्य कर्म विद्याहेतुर्वा
१०. तद्भूता- न वेति संदेहे, विद्याहेतुरिति पूर्वः पक्षः।
धिकरणम्। सिद्धान्तस्तु— तद्भूतस्य प्राप्तोत्तमाश्रमस्य अतद्भावः उत्तमाश्रमात्प्रच्युतिः कथमपि न संभवतीति जैमिनेरप्याचार्यस्य संमतम्। अपिशब्देन भगवतो बादरायणस्य च संमतमेवेति दर्शितम्। कुतः, नियमातद्रूपाभावेभ्यः 'अरण्यमियादिति पदं ततो न पुनरेयात्' इति नियमः, प्रत्यवरोहबोधकश्रुत्यभावः अतद्रूपम्, शिष्टाचाराभावश्च तेभ्यः। तस्मात्प्रच्युतेरप्रामाणिकत्वात्प्रच्युतस्य कर्म न विद्याहेतुरिति सिद्धम् ॥

यथा पूर्वं प्रच्युतस्य कर्म न विद्याहेतुरित्युक्तम्, तथा प्रच्युतस्यापि कृतप्रायश्चित्तस्य कर्म न विद्याहेतुरिति दृष्टान्तसंगत्येदमाह—

**न चाधिकारिकमपि पतनानुमाना-
त्तदयोगात् ॥ ४१ ॥**

अत्र पूर्वपक्षे कृतप्रायश्चित्तस्य कर्म न विद्याहेतुः, सिद्धान्ते तद्धेतुरिति फलभेदः । प्रमादात्प्रच्युतस्य किं प्रायश्चित्त-

११. आधिकारिकाधिकरणम् ।

मस्ति न वेति संदेहे, आधिकारिकमपि अधिकारलक्षणसिद्धं गर्दभालम्भनरूपप्रायश्चित्तमाधिकारिकम्, तदपि नैष्ठिकस्यावकीर्णिनो नैवास्ति । कुतः, पतनानुमानात् 'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः । प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा' इत्यनिवर्त्यपातकश्रुत्यनुमापकस्मृत्या तस्य प्रायश्चित्तस्यायोगादिति पूर्वः पक्षः ॥

सिद्धान्तस्तु—

**उपपूर्वमपि त्वेके भावमशनव-
त्तदुक्तम् ॥ ४२ ॥**

नेदं महापातकम्, येन प्रायश्चित्तं न स्यात् । अपि त्वेके आचार्या उपपदपूर्वमेवेदं पातकं मन्यन्ते । अत उपकुर्वाणस्येव

नैष्ठिकस्यापि उक्तप्रायश्चित्तसद्भावमिच्छन्ति, उभयोः ब्रह्मचारित्वे सति अवकीर्णित्वाविशेषात्; अशनवत् यथा ब्रह्मचारिणः मधुमांसाशिनः व्रतलोपः पुनः संस्कारश्च, तद्वत्; तस्मात् प्रायश्चित्तसद्भावो युक्ततरः। तदुक्तं प्रमाणलक्षणे—'समा विप्रतिपत्तिः स्यात्' 'शास्त्रस्था वा तन्निमित्तत्वात्' इति। प्रायश्चित्ताभावस्मरणं तु यत्नगौरवार्थमिति व्याख्यातव्यम्। इत्थं वानप्रस्थस्य महाकक्षाभिवर्धनं प्रायश्चित्तम्, यतेस्तु स्वशास्त्रसंस्कार इति ध्येयम्॥

पूर्वं यथा प्रच्युतस्य प्रायश्चित्तेनैव शुद्धत्वात् तत्कृतं कर्म विद्यासाधनमित्यवादि, तथा कृतप्रायश्चित्तेन सह शिष्टाचाररूपं कर्म विद्यासाधनं भवत्विति दृष्टान्तसंगत्येदमाह—

बहिस्तूभयथापि स्मृतेराचाराच्च॥ ४३॥

अत्र पूर्वपक्षे आरूढपतितमित्यादिशास्त्रविरोधः, सिद्धान्ते तदानुगुण्यमिति फलभेदः। कृतप्रायश्चित्तेन सह कृतं

१२. बहिरधिकरणम्। श्रवणादिकं किं विद्यासाधनं न वेति संदेहे, विद्यासाधनमिति पूर्वः पक्षः। सिद्धान्तस्तु—ऊर्ध्वरेतसामाश्रमात् प्रच्युतिरुपपातकं महापातकं वा अस्तु; उभयथापि ते कृतप्रायश्चित्ता अपि शिष्टैर्बहिष्कार्याः। 'प्रायश्चित्तं न पश्यामि' 'आरूढपतितं विप्रं....स्पृष्ट्वा चान्द्रायणं चरेत्'

इत्यादिनिन्दास्मृतेः शिष्टाचाराच्च । अतः प्रायश्चित्तेन परलोकशुद्धेनापि तेन सह कृतं श्रवणादिकं न विद्यासाधनमिति सिद्धम् ॥

पूर्वं यथा यः कृतप्रायश्चित्तः स संव्यवहार्य इत्युत्सर्गस्य निन्दातिशयस्मृत्या नैष्ठिकादिषु बाध इत्यभाणि, तथा यो यदङ्गकर्ता स तदाश्रितस्य कर्तेति उत्सर्गस्य कर्तुः फलश्रुत्या बाधो भवत्विति दृष्टान्तसंगत्येदमाह—

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

अत्र पूर्वपक्षे कर्तृत्वभोक्तृत्वयोरैकाधिकरण्यम्, सिद्धान्ते ऋत्विजः कर्तृत्वं स्वाम्यधीनमिति परंपरयैकाधिकरण्यमिति फलभेदः । तत्र किमङ्गाश्रितोपासनानि यजमानकर्तृकाणि, आहोस्वित् ऋत्विक्कर्तृकाणीति संशये, स्वामिनो यजमानस्यैवाङ्गाश्रितोपास्तिषु कर्तृत्वमित्यात्रेय आचार्यो मन्यते । कुतः, फलश्रुतेः कर्माङ्गपञ्चविधसाम्नि वृष्ट्युपासकस्य 'वर्षति हास्मै' इत्यादिफलश्रवणात् । अतः यजमानकर्तृकाण्येवेति पूर्वः पक्षः ॥

१३. स्वाम्यधिकरणम् ।

सिद्धान्तस्तु—

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ ४५ ॥

अङ्गोपासनमार्त्विज्यमृत्विक्कर्तृकमेवेत्यौडुलोमिराचार्यो मन्यते। तस्मै हि साङ्गाय कर्मणे ऋत्विक् परिक्रियते यजमानेन; तथा च यजमानगामिफलकमप्यङ्गोपासनं यजमानेन स्वर्गगामिफलककर्मार्थं परिक्रीतऋत्विक्कर्तृकमेव कर्माङ्गप्रणयनाश्रितगोदोहनादिवदिति न फलश्रुतिविरोधः ॥

किं च—

श्रुतेश्च ॥ ४६ ॥

'यां वै कांचन यज्ञे ऋत्विज आशिषमाशासत इति यजमानायैव तामाशिषमाशासत इति होवाच' इति श्रुतेः ऋत्विक्कर्तृकस्योपासनस्य यजमानगामिफलत्वमवगम्यत इत्युपासनानि ऋत्विक्कर्तृकाणीति सिद्धम् ॥

पूर्वं यथा 'यां कांचन यज्ञे....' इत्यादिवाक्यशेषादुद्गीथाद्युपासनास्वार्त्विज्यनिर्णयः, तद्वत् 'अथ मुनिः' 'अथ ब्राह्मणः' इति विधिविधुरवाक्यशेषान्मौनस्याविधेयत्वनिश्चय इति दृष्टान्तसंगत्येदमाह—

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४७ ॥

अत्र पूर्वपक्षे मौनस्यानुष्ठेयत्वासिद्धिः, सिद्धान्ते ज्ञानं प्रत्यन्तरङ्गस्य तत्सिद्धिरिति फलभेदः। बृहदारण्यके श्रूयते—

'बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः' इति । तत्र
१४. सहकार्य- किं मौनं विधीयते न वेति संदेहे, नेति
न्तरविध्य- पूर्वः पक्षः । सिद्धान्तस्तु— फलभूतसा-
धिकरणम् । क्षात्कारे श्रवणाद्यपेक्षया सहकार्यन्तरस्य मौनस्य निदिध्यासनाख्यस्य विधिराश्रयितव्यः, अपूर्वत्वात् । ननु 'गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थम्' इत्यत्र मौनशब्दस्य पारिव्राज्ये प्रयोगदर्शनात् कथमत्र मौनं निदिध्यासनं स्यादत आह— तृतीयम् । श्रवणाद्यपेक्षया निदिध्यासनमेवात्र मौनं विधेयम्; स्मृतावितराश्रमसमभिव्याहारात् निदिध्यासनप्रधानं पारिव्राज्यं मौनशब्देन लक्ष्यत इत्यविरोधः । ननु कस्य मौनविधिरित्यत आह— तद्वतः, 'विदित्वा' इति परोक्षज्ञानवतः संन्यासिनः प्रकृतत्वात् । ननु सूक्ष्मवस्तुसाक्षात्कारे निदिध्यासनस्य स्वतः प्राप्तत्वात् विधिर्निरर्थक इत्यत आह— पक्षेण । यस्मिन् पक्षे भेददर्शनप्राप्तिः तेन पक्षेण प्राप्त्यभावात् विधिरर्थवानेव । ननु ब्रह्मपरवाक्ये कथं विधिरित्याशङ्क्य दृष्टान्तमाह— विध्यादिवत् । विधेः आदिः विध्यादिः प्रधानविधिः, तद्वत्, यथा दर्शपूर्णमासप्रधानपरे वाक्ये अन्वाधानादेरङ्गजातस्य विधिः, तद्वन्मौनस्येत्यर्थः ॥

नन्वेवं श्रवणादिप्रधाने कैवल्याश्रमे श्रुतिसिद्धे कस्माच्छा-

न्दोग्ये 'अभिसमावृत्य कुटुम्बे' इति गृहिणोपसंहारस्तत्राह—

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४८ ॥

यज्ञादीनामाश्रमान्तरविहितानां वा शमादीनां गृहस्थाश्रमे कार्त्स्न्येन संभवात् गृहस्थाश्रमेणोपसंहारः, न तु संन्यासाभावादित्यर्थः ॥

मौनवदितरेषामप्युपदेशात् ॥ ४९ ॥

मौनस्य गार्हस्थ्यस्य च यथा श्रुतिमत्त्वम्, तद्वद्ब्रह्मचारिवानप्रस्थयोरपि श्रुतिषूपदेशात् ताभ्यां सह चत्वार आश्रमाः प्रसङ्गादुक्ताः । द्वयोर्बहुवचनं वृत्तिभेदाभिप्रायकम् ॥

पूर्वं मौनशब्दस्य ज्ञानातिशये निदिध्यासने प्रसिद्धत्वात् निदिध्यासनं विधेयमित्युक्तम्; तद्वद्बाल्यशब्दस्य कामचारादौ प्रसिद्धेः तद्विधेयमिति दृष्टान्तसंगत्येदमाह—

अनाविष्कुर्वन्नन्वयात् ॥ ५० ॥

अत्र पूर्वपक्षे कामचारादेः विद्याङ्गत्वेनानुष्ठानम्, सिद्धान्ते भावशुद्धेरेवेति फलभेदः । पूर्वोदाहृतश्रुतौ बाल्यशब्देन

१५. अनाविष्काराधिकरणम् । किं बालस्य कर्म कामचारादिकं विधीयते, उत भावशुद्धिरिति संशये, कामचारादिकमिति पूर्वः पक्षः । सिद्धान्तस्तु—'अव्यक्तलिङ्गोऽव्यक्ताचारः' इति श्रुतेः स्वगुणप्रख्यापनादिभि-

रनाविष्कुर्वन्नात्मानमप्रख्यापयन् भावशुद्धो भवेदित्येतावन्मात्रं विधीयते, तावन्मात्रस्य प्रधाने ज्ञानाभ्यासे अन्वयात् । न कामचारादिकम्, तस्य तत्रानन्वयात्, शौचादिधर्मविधायिशास्त्रविरोधाच्चेति ॥

इत्थं संन्यासादिबाल्यान्तं साधनजातमभिधाय, तत्साध्यविद्याजन्म विचार्यत इति हेतुहेतुमद्भावसंगत्येदमाह—

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५१ ॥

अत्र पूर्वपक्षे श्रवणादेर्विद्यासाधनत्वासिद्धिः, सिद्धान्ते प्रतिबन्धकवशाद्विलम्बेऽपि तत्सिद्धिरिति फलभेदः । तत्र श्रव-

१६. ऐहिकाधिकरणम् ।

णादिभिः किमिहैव विद्योत्पत्तिः, उत कदाचिदमुत्रापीति संशये, इहैव विद्याजन्मास्त्विति कामनया श्रवणादिषु प्रवृत्तेरैहिकमेव विद्याजन्मेति पूर्वः पक्षः । सिद्धान्तस्तु— फलोन्मुखं विद्याविरुद्धफलकं कर्म प्रस्तुतप्रतिबन्धः । तस्मिन्प्रतिबन्धकाभावे सत्यैहिकं विद्याजन्म श्रवणादिभिर्भवत्येव; सति तु प्रतिबन्धे अमुत्रापीत्यनियम एव; न त्विहैवेति नियमः । कुतः, तद्दर्शनात् 'गर्भ एवैतच्छयानो वामदेव एवमुवाच' इति 'श्रवणायापि बहुभिर्यो न लभ्यः' इत्यादिश्रुतिषु प्रतिबन्धाप्रतिबन्धाभ्यां तस्य नियमस्य दर्शनादित्यर्थः ॥

पूर्वं यथा विद्यायाः ऐहिकामुष्मिकत्वविशेषनियम उक्तः, तथा तत्फलेऽपि मोक्षे कश्चिदुत्कर्षादिविशेषनियमः स्यादिति दृष्टान्तसंगत्येदमाह—

एवं मुक्तिफलानियमस्तदवस्थावधृते-
स्तदवस्थावधृतेः ॥ ५२ ॥

अत्र पूर्वपक्षे कर्मसाध्या मुक्तिः । सिद्धान्ते ज्ञानैकाभिव्यक्ता मुक्तिरिति फलभेदः । मुक्तिरत्र विषयः । तस्याः किं

१७. मुक्तिफलानियमाधिकरणम् ।

विद्यावत् विशेषनियमोऽस्ति न वेति संदेहे, अस्तीति पूर्वः पक्षः । सिद्धान्तस्तु— एवं विद्यावत् मुक्तिरूपफलस्यानियमः निर्विशेषत्वमेव । कुतः, तदवस्थावधृतेः मुक्त्यवस्थायाः निर्विशेषब्रह्मरूपत्वेन ' ब्रह्म वेद ब्रह्मैव भवति ' इति सर्वश्रुतिष्ववधारणात्, तस्माद्विद्यासमकालैव मुक्तिः ; सा च निरतिशयानन्दब्रह्मस्वरूपैवेति सिद्धम् । पदाभ्यासोऽध्यायपरिसमाप्तिद्योतनार्थः ॥

यदैक्यमत्यै वैराग्यतत्त्वमर्थोपसंहृतिः ।
शान्त्यादिसाधनं सर्वं प्रत्यपादि तदस्म्यहम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रसरस्वतीपादाब्जसेवापरायणेन श्रीसदाशिवेन्द्रसरस्वत्या विरचितायां श्रीमद्ब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्वप्रकाशिकायां

तृतीयोऽध्यायः ॥

ॐ

॥ चतुर्थोऽध्यायः ॥

पूर्वत्र साधनं निरूपितम् , इह तत्फलं निरूप्यत इति हेतुहेतुमद्भावसंगत्यायमध्याय आरभ्यते । तत्र पूर्वं मोक्षे विशेषाभाव उक्तः ; तथा श्रवणादौ आवृत्तिविशेषो नास्तीति दृष्टान्तावान्तरसंगत्येदमधिकरणमाह—

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

अत्र पूर्वपक्षे श्रवणादेः प्रयाजादिवददृष्टार्थत्वात् सकृदनुष्ठानम् , सिद्धान्ते त्ववघातवत् यावत्फलमावृत्तिरिति फलभेदः ।

१. आवृत्त्यधिकरणम् । पूर्वं साक्षादेव श्रुत्युक्तं संन्यासादिसाधनं चिन्तितम । फलार्थापत्तिगम्यम् आवृत्त्यादिकमश्लेषाधिकरणात् प्राक् चिन्त्यते । तत्र अस्याधिकरणस्य श्रवणादिसाधनं विषयः ; तत् किं सकृदेव कर्तव्यम , उत तस्यावृत्तिः कर्तव्या इति विशये, सकृदेवेति पूर्वः पक्षः । सिद्धान्तस्तु— षड्जादिस्वरसाक्षात्कारवत् दुर्विज्ञेयात्मसाक्षात्कारस्यावृत्तिविशिष्टश्रवणादिसाध्यतया तदावृत्तिरेव कर्तव्या ।

कुतः, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्याद्यसकृदुपदेशात्। एवम् 'वेद' 'उपासीत' इत्यावृत्तिश्रवणात् उपास्यसाक्षात्कारद्वारा फलहेतुषु उपासनेषु आवृत्तिर्बोध्या ॥

किं च—

लिङ्गाच्च ॥ २ ॥

'रश्मींस्त्वं पर्यावर्तयात्' इति रश्मिबहुत्वोपासनं विदधत् वाक्यं प्रत्ययावृत्तिं दर्शयति। अतः तल्लिङ्गात् तन्न्यायात् साक्षात्कारसाधनेषु आवृत्तिः कर्तव्येत्यर्थः ॥

पूर्वत्र श्रवणादेरावृत्तिरुक्ता, तामुपजीव्य किंचिद्विचार्यत इत्युपजीव्योपजीवकभावसंगत्येदमाह—

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

अत्र पूर्वपक्षे श्रुतीनामभेदपराणां गौणार्थत्वम्, सिद्धान्ते मुख्यार्थत्वमिति फलभेदः। तत्र किं श्रवणाद्यावृत्तिकाले प्रत्य-

२. आत्मत्वोपामनाधिकरणम्।

क्त्वेन ब्रह्म ध्यातव्यम्, उत भिन्नत्वेनेति विशये, नाहमीश्वर इति प्रत्यक्षविरोधात् भिन्नत्वेनेति पूर्वः पक्षः। सिद्धान्तस्तु—आत्मेत्येव ब्रह्म ध्यातव्यम्। तथाहि जाबाला आत्मत्वेन ब्रह्माभ्युप-

गच्छन्ति—'त्वं वाहमस्मि भगवो देवते अहं वै त्वमसि' इति । तथा ग्राहयन्ति च ब्रह्म आत्मत्वेन 'तत्त्वमसि' इत्यादिवाक्यानि । न च तेषां 'नाम ब्रह्म' इत्यादिवत् गौणार्थत्वम्, सति मुख्यार्थत्वे गौणार्थत्वायोगात् । न च प्रत्यक्षादिविरोधः, तस्य मिथ्याभेदगोचरत्वेन पारमार्थिकाभेदागोचरत्वादिति भावः ॥

पूर्वं यथा ब्रह्मणा सहाभेदसत्त्वादहंग्रह उक्तः, तद्वत्प्रतीकेष्वपि ब्रह्मविकारतया जीवाभिन्नब्रह्माभिन्नत्वात् जीवाभेदसत्त्वेनाहंग्रहः कार्य इति दृष्टान्तसंगत्येदमाह—

न प्रतीके न हि सः ॥ ४ ॥

अत्र पूर्वपक्षे प्रतीकोपास्तीनामहंग्रहोपास्तेर्विशेषासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः । 'मनो ब्रह्म' इत्यादीनि प्रती-

३. प्रतीकाधिकरणम् ।

कोपासनानि श्रूयन्ते । तत्र किं मनआदौ प्रतीके अहंग्रहः कर्तव्यः, न वेति संदेहे, कर्तव्य इति पूर्वः पक्षः । सिद्धान्तस्तु—प्रतीके अहंग्रहो न कर्तव्यः । कुतः, विकल्पासहत्वात । तथाहि—किं प्रतीके आत्मत्वानुभवबलादहंग्रहः, उत श्रुतत्वात्, उताहोस्विदत्र स्वाभिन्नब्रह्माभिन्नत्वात् । न तावदाद्यः, तथानुभवाभावात्, न हि स उपासकः आत्मत्वेन प्रतीकमनुभवति ; न द्वितीयः, अश्रवणात् ; नापि तृतीयः, प्रतीकस्य स्वरूपेण ब्रह्माभिन्नत्वायोगात् ।

अतः प्रतीके अहंग्रहो न कर्तव्य इति सिद्धम् ॥

पूर्वोक्तप्रतीकोपासनानि विषयीकृत्यान्यत्किंचिद्विचार्यत इत्येकविषयत्वसंगत्येदमाह—

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

अत्र पूर्वपक्षे निकृष्टे उत्कृष्टबुद्धिः कर्तव्येति लौकिकन्यायानपेक्षा, सिद्धान्ते तदपेक्षेति फलभेदः । अत्र किं ब्रह्मणि प्रतीकदृष्टिः कर्तव्या, उत प्रतीके ब्रह्मदृष्टिरिति विशये, ब्रह्मणः प्राधान्येनोपास्यत्वासिद्धये तस्मिन् प्रतीकदृष्टिः कर्तव्येति पूर्वः पक्षः । सिद्धान्तस्तु— प्रतीक एव ब्रह्मदृष्टिः कर्तव्या । कुतः, ब्रह्मण उत्कर्षात् । उत्कृष्टदृष्टौ हि निकृष्टे क्रियमाणायां निकृष्टस्योत्कृष्टता भवति, राजदृष्ट्यामात्यस्येव ; न चैवं ब्रह्मणः प्राधान्यालाभः, इष्टापत्तेरिति भावः ॥

४. ब्रह्मदृष्ट्यधिकरणम् ।

सिद्धरूपादित्यादिभ्यः कर्मरूपोद्गीथानां फलसंनिकर्षोत्कर्षात् ब्रह्मवद्विशेषवत्त्वनियम इति दृष्टान्तसंगत्येदमाह—

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

अत्र पूर्वोत्तरपक्षयोः तत्तत्पक्षसिद्धिरेव फलमिति द्रष्टव्यम् । 'य एवासौ तपति तमुद्गीथमुपासीत' इत्यादित्याङ्गा-

५. आदित्यादिमत्यधिकरणम् । श्रितोपासनानि श्रूयन्ते । तत्र किमादित्यादिषूद्गीथादिदृष्टिः कर्तव्या, उतोद्गीथादिष्वादित्यादिदृष्टिरिति विशये, आदित्यादिषूद्गीथादिदृष्टिरिति पूर्वः पक्षः । सिद्धान्तस्तु— उद्गीथादिषु कर्माङ्गेष्वादित्यादिमतय एव कर्तव्याः । कुतः, कर्मसमृद्धिरूपफलोपपत्तेः । यथा प्रोक्षणादिना व्रीह्यादिषु संस्कृतेषु प्रकृतकर्मणः अपूर्वमुत्पद्यते, तथा कर्माङ्गोद्गीथादिष्वादित्यादिमतिभिः संस्कृतेषु प्रकृतकर्मणः फलाधिक्यलक्षणा समृद्धिरुपपद्यत इत्यर्थः । आदित्यादिषूद्गीथादिदृष्टिपक्षे यथोक्तफलसंनिकर्षासिद्धेरुद्गीथादीनामुत्कर्षासिद्धिरित्यभिसंधिः ॥

पूर्वं कर्माङ्गाश्रितोपासनानामासननियमानपेक्षाणामनुष्ठानप्रकार उक्तः । तद्वदङ्गानाश्रितोपासनेष्वपि अनियम इति दृष्टान्तसंगत्येदमाह—

आसीनः संभवात् ॥ ७ ॥

अत्र पूर्वपक्षे आसनाभ्यासासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः । अत्र कर्माङ्गानाश्रितान्युपासनानि किं तिष्ठन्नासीनः

६. आसीनाधिकरणम् । शयानो वा कुर्यादित्यनियमः, उत आसीन एवेति नियम इति विशये, अनियम इति पूर्वः पक्षः । सिद्धान्तस्तु—आसीन एव उपासनानि कुर्वीत ।

कुतः, गमनादीनां चित्तविक्षेपकरतया आसीनस्यैवोपासनानां संभवादित्यर्थः ॥

ध्यानाच्च ॥ ८ ॥

उपासनानां ध्यायत्यर्थध्यानरूपत्वात्, ध्यायतेश्चासीनेषु बकादिषु एकविषयदृष्टिषु प्रयोगादासीन एवोपासीतेत्यर्थः ॥

अचलत्वं चापेक्ष्य ॥ ९ ॥

'ध्यायतीव पृथिवी' इत्यत्र पृथिव्या अचलत्वमपेक्ष्य ध्यानोपचारो दृष्टः । तस्मादपि लिङ्गादासीन एवोपासीतेत्यर्थः ॥

स्मरन्ति च ॥ १० ॥

'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः' इत्यादिना शिष्टा उपासनार्थमासनं स्मरन्ति । अत आसीन एवोपासीतेति सिद्धम् ॥

पूर्वमङ्गानाश्रितोपासनेषु यथा आसननियम उक्तः, तद्वद्दिगादिनियमोऽप्यस्तु; 'प्राचीनप्रवणे वैश्वदेवेन यजेत' इत्यादिदिगादिनियमदर्शनादिति दृष्टान्तसंगत्येदमाह—

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

अत्र पूर्वपक्षे दिगादिष्वादरः, सिद्धान्ते त्वनादर इति फलभेदः । तेष्वेवोपासनेषु दिगादिनियमोऽस्ति न वेति विशये,

अस्तीति पूर्वः पक्षः। सिद्धान्तस्तु— प्राच्यादिदिगादिनिय-

७ एकाग्रताधिकरणम्। मो नास्ति; किं तु यत्र दिशि देशे काले वा चित्तस्यैकाग्रता एकविषयप्रवाहः, तत्रो-

पासीत। कुतः, दिगादिविशेषाश्रवणात्। ननु 'समे शुचौ' इति देशविशेषः श्रूयत इति चेत्, बाढम्; तदपि श्रवणं चित्तस्यैकाग्रतासंपादकदेशे उपासीतेति दर्शयति, वाक्यशेषे मनोनुकूलत्वविशेषणात्। 'प्राचीनप्रवणे' इत्यादिश्रवणं तु कर्मण्येव नोपासनेष्विति द्रष्टव्यम्॥

पूर्वं यथा दिगादिनियमाश्रवणात् तदभाव उक्तः, तथा यावज्जीवमुपासनावृत्त्यश्रवणात् तदभाव इति दृष्टान्तसंगत्येदमाह—

आ प्रायणात्तत्रापि हि दृष्टम्॥ १२॥

अत्र पूर्वपक्षे कादाचित्कप्रत्ययावृत्तेः अदृष्टद्वारा उपास्यसाक्षात्कारहेतुत्वम्, सिद्धान्ते निरन्तरप्रत्ययावृत्तेः साक्षादेव

८. आप्रायणाधिकरणम्। तद्धेतुत्वमिति फलभेदः। अत्राहंग्रहोपासनानि किं कदाचित् कृत्वोपरमेत्, उत

यावज्जीवमुपासीतेति विशये, कदाचिदिति पूर्वः पक्षः। सिद्धान्तस्तु— आ प्रायणात् आ मरणात् उपासीत। हि यतः तत्रापि मरणकालेऽपि, 'स यावत्क्रतुरयमस्माँल्लोकात्प्रैति'

इति श्रुत्या उपास्यप्रत्ययानुवर्तनं दृष्टम् । न च तददृष्टसाध्यम्, दृष्टे संभवत्यदृष्टकल्पनानुपपत्तेः । तस्मादामरणमहंग्रहोपासनं कुर्वीतेति सिद्धम् ॥

पूर्वं यथा उपासकानां यावज्जीवं कर्तव्यमस्तीत्युक्तम्, न तथा ब्रह्मात्मविदामिति प्रत्युदाहरणसंगत्या कर्मक्षयलक्षणां जीवन्मुक्तिमाह—

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

अत्र पूर्वपक्षे ब्रह्मविदोऽपि संचितपापफलभोगानन्तरं मुक्तिः, सिद्धान्ते विद्योत्पत्त्यनन्तरमेव पापनाशात् जीवन्मुक्तिरिति फलभेदः । अत्र ब्रह्मविदः उत्तरपूर्वाघाश्लेषविनाशौ भवतः, उत नेति संदेहे, 'नाभुक्तं क्षीयते कर्म' इति स्मृतेः नेति पूर्वः पक्षः । सिद्धान्तस्तु— तदधिगमे ब्रह्मसाक्षात्कारे सति उत्तरपूर्वाघयोः ज्ञानादूर्ध्वं देहेन्द्रियादिवशात् संभावितं पापमुत्तराघम्, ज्ञानात्पूर्वमिह जन्मनि जन्मान्तरे वा संचितं पापं पूर्वाघम्, तयोरश्लेषविनाशौ भवत एव । कुतः, तद्व्यपदेशात् 'तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते इति 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे

९. तदधिगमाधिकरणम् ।

पाप्मानः प्रदूयन्ते' इति श्रुतिभ्यां तयोरुत्तरपूर्वाघाश्लेषविनाशयोर्ब्रह्मविदि व्यपदेशात् । एवम् 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इत्यादिश्रुत्या निर्गुणब्रह्मविद्यप्युत्तरपूर्वाघाश्लेषविनाशयोर्व्यपदेशादित्यर्थः । स्मृतिस्त्वज्ञविषयेति भावः ॥

पूर्वं ब्रह्मविदः पापस्याश्लेषविनाशावुक्तौ ; न तथा पुण्यस्यापि तौ भवतः, तस्य श्रौतत्वेन श्रौतब्रह्मज्ञानेनाविरोधादिति प्रत्युदाहरणसंगत्येदमाह––

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

फलमत्र पूर्ववत् । पुण्यस्याप्यश्लेषविनाशौ भवतः, उत नेति संदेहे, नेति पूर्वः पक्षः । सिद्धान्तस्तु––अकर्त्रात्मबोधसामर्थ्या-
१०. इतरासं- दितरस्यापि पुण्यस्योत्तरस्य पूर्वस्य च एव-
श्लेषाधि- मघवदश्लेषः विनाशश्च भवतः, 'उभे उ
करणम् । हैवैष एते तरति' इत्यादिश्रुतिभिस्तद्व्यपदेशात् । इत्थं ब्रह्मविदः पुरुषधौरेयस्य पुण्यपापयोः बन्धहेत्वोरभावाद्देहपाते मुक्तिरवश्यं भवत्येवेत्यधिकरणद्वयस्य फलमुक्तं भवति ॥

पूर्वं ज्ञानात् कर्मक्षय उत्सर्गत उक्तः ; तस्येह प्रारब्धकर्मव्यतिरिक्तविषयत्वेनापवादः क्रियत इत्युत्सर्गापवादसंगत्येदमाह–

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

अत्र पूर्वपक्षे जीवन्मुक्त्यसिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः । अत्र अनारब्धकर्मवत् आरब्धे पुण्यपापे ज्ञाना-
११. अनारब्धा- न्नश्यतः, उत नेति विशये, 'क्षीयन्ते चास्य
धिकरणम् । कर्माणि' इत्यविशेषेण श्रवणान्नश्यतः इति पूर्वः पक्षः । सिद्धान्तस्तु— आरब्धे पुण्यपापे न नश्यतः, प्रवृत्तफलत्वात् मुक्तेषुवत्; अपि त्वनारब्धकार्ये अप्रवृत्तफले पूर्वे अनादिभवपरम्परायां ज्ञानोत्पत्तिपर्यन्तं संचिते पुण्यपापे ते एव ज्ञानान्नश्यतः । कुतः, तदवधेः, 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति देहपातावधिश्रवणादित्यर्थः । एवं च विशेषश्रुत्यनुरोधादविशेषश्रुतिर्नेतव्येति भावः ॥

पूर्वमनारब्धकार्याणां कर्मणां ज्ञानात् क्षय उत्सर्गत उक्तः; तस्येह नित्यनैमित्तिकातिरिक्तानारब्धकर्मविषयत्वेनापवादः क्रियत इत्युत्सर्गापवादसंगत्येदमाह—

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

अत्र पूर्वपक्षे ज्ञानार्थं नित्याद्यनुष्ठानासिद्धिः, सिद्धान्ते तदर्थं तत्सिद्धिरिति फलभेदः । अत्र किं नित्यनैमित्तिककर्म-

जातं ज्ञानात्क्षीयते न वेति संदेहे, अनारब्धकर्मत्वाविशेषात्
१२. अग्निहोत्रा- क्षीयत इति पूर्वः पक्षः । सिद्धान्तस्तु—
द्यधिकरणम् । नित्यनैमित्तिकमग्निहोत्रादिकर्मजातं तत्कार्यायैव चित्तशुद्ध्यादिपरंपरया तस्य ज्ञानस्यैव यत्कार्यं मुक्तिरूपं तस्मा एव । कस्मात् , तद्दर्शनात् 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन' इति यज्ञादिश्रुतौ ज्ञानहेतुत्वदर्शनादित्यर्थः । एवं च ज्ञानरूपफलैकनाश्यत्वं नित्यनैमित्तिककर्मजातस्य, न काम्यकर्मवन्नाश इति भावः ॥

ननु नित्यादेर्ज्ञानार्थत्वे 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इति विनियोगवचनं किंविषयमित्यपेक्षायामाह—

अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥

अतः अग्निहोत्रादेः कर्मणः अन्याप्यस्ति काम्यलक्षणा साधुकृत्या पापकृत्या च ; एकेषां शाखिनां तयोर्विनियोग एष उक्तः । काम्यनिषिद्धकर्मणोर्विद्यां प्रत्यनङ्गत्वे संप्रतिपत्तिरुभयोर्जैमिनिबादरायणयोरिति ॥

पूर्वोक्तनित्यादिकं विषयमुपजीव्य किंचिद्विचार्यत इत्येकविषयत्वसंगत्येदमाह—

यदेव विद्ययेति हि ॥ १८ ॥

अत्र पूर्वपक्षे केवलस्य नित्यादेः ज्ञानहेतुत्वासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। तत्र किं नित्यादिकमङ्गा-

१३. विद्याज्ञानसाधनत्वाधिकरणम्।

श्रितोपास्तिसहितमेवानुष्ठेयमिति नियमः, किं वा तत्सहितं केवलं वेत्यनियम इति संदेहे, नियम इति पूर्वः पक्षः। सिद्धान्तस्तु—अनियम एव युक्तः। तथाहि— 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति श्रुतिः विद्यासहितस्य कर्मणः वीर्यवत्तरत्वं ब्रुवती विद्याहीनस्य कर्मणो वीर्यवत्त्वं दर्शयति। तच्च केवलस्य कर्मणो ज्ञानहेतुत्वे उक्तं स्यादित्यर्थः॥

पूर्वमनारब्धकर्मणः क्षयोक्तौ आरब्धस्य कथं क्षय इत्याकाङ्क्षायाम्, अस्योत्थानादुत्थाप्योत्थापकलक्षणसंगत्येदमाह—

भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ १९ ॥

अत्र पूर्वपक्षे विदेहकैवल्यासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। तत्त्वविदत्र विषयः; स किं प्रारब्धक्षयान-

१४. इतरक्षपणाधिकरणम्।

न्तरं संसरति, उत नेति संदेहे, देहपातात्पूर्वं संसारानुवृत्तिवत् देहपातानन्तरमपि ब्रह्मवित् संसरतीत्यनारब्धाधिकरणदृष्टान्तेन पूर्वः पक्षः।

सिद्धान्तस्तु— इतरे त्वारब्धपुण्यपापे भोगेन क्षपयित्वा विद्वान् संपद्यते, 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति, 'ब्रह्मैव सन् ब्रह्माप्येति' इत्यादिश्रुतिभ्यः। देहपातात्पूर्वं प्रारब्धकर्मणां सत्त्वात्, कुलालचक्रभ्रमणन्यायेन मिथ्याज्ञानरूपनिमित्तनाशेऽप्यनुवृत्तिर्युक्ता ; तद्भोगानन्तरं कस्यचिदपि कर्मणोऽभावान्न संसारानुवृत्तिः। तस्माद्भोगेन प्रारब्धकर्मनाशानन्तरं विद्वान् स्वरूपानन्दात्मनावस्थानलक्षणं कैवल्यं लभत इत्यतिशोभनम् ॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्व-
प्रकाशिकायां चतुर्थस्याध्यायस्य
प्रथमः पादः ॥



ॐ

द्वितीयः पादः ॥

पूर्वपादे मुक्तिविरुद्धानारब्धकार्यकर्मनिवृत्त्या जीवन्मुक्तत्वम्, आरब्धकर्मनिवृत्तौ तु विदेहमुक्तत्वमिति सगुणनिर्गुणविद्ययोः फलं सामान्यतो निरूपितम् । संप्रति प्रारब्धकर्मक्षयानन्तरभाविनि मोक्षे विशेषप्रदर्शनाय पादत्रयमारभ्यते । एवं च सामान्यनिरूपणस्य विशेषनिरूपणहेतुत्वात् पूर्वेणास्य पादत्रयस्य हेतुहेतुमद्भावसंगतिः । तत्र उत्क्रान्त्यपेक्षानपेक्षालक्षणविशेषं निरूपयितुमयं पाद आरभ्यते—

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

पादान्तरत्वादस्याधिकरणस्य नाव्यवहिताधिकरणसंगत्यपेक्षा । अत्र पूर्वपक्षे स्वोपादाने स्वस्य लय इति न्यायासिद्धिः,
१. वागधि- सिद्धान्ते तत्सिद्धिरिति फलभेदः । अस्त्यु-
करणम् । त्क्रान्तिक्रमबोधिका श्रुतिः— ‘अस्य सो-
म्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्’ इति । तत्र ‘वाङ्मनसि

संपद्यते' इत्यत्र किं सवृत्तिकाया वाच एव मनसि लयः, किं वा वाग्वृत्तेरेवेति संशये, श्रुतिबलाद्वाच एवेति पूर्वः पक्षः। सिद्धान्तस्तु — उक्तिर्वागिति भावव्युत्पत्त्या वाक्छब्देन वाग्वृत्तिरुच्यते। मनोवृत्तौ सत्यामेव मनसि वाग्वृत्तिर्लीयते। कुतः, दर्शनात् मनोवृत्तौ सत्यामेव लोके वाग्वृत्तिलयस्य दर्शनात्। तर्हि वाक्छब्दस्य का गतिरत आह। शब्दाच्च तस्य वाक्छब्दस्य वृत्तिवृत्तिमतोरभेदोपचारेण भावव्युत्पत्त्या वा वाग्वृत्तिपरत्वेन नयनादित्यर्थः॥

उक्तन्यायं चक्षुरादिष्वतिदिशति—

अत एव च सर्वाण्यनु॥ २॥

अत एव उक्तदर्शनादिहेतोः सर्वाणि चक्षुरादीन्द्रियाण्यपि सवृत्तिके मनसि वृत्तिलयमात्रेणानुवर्तन्ते लीयन्ते, न स्वरूपेणेत्यर्थः॥

पूर्वं मनसि सर्वेन्द्रियवृत्तिलय उक्तः, न तथा मनसः प्राणे वृत्तिलयः; 'अन्नमयं हि सोम्य मन आपोमयः प्राणः' इति श्रुतौ प्राणमनसोरबन्नविकारत्वश्रवणादबन्नयोश्चोपादानोपादेयभावात् स्वरूपलय इति प्रत्युदाहरणसंगत्येदमाह—

तन्मनः प्राण उत्तरात्॥ ३॥

फलं पूर्ववत् । 'मनः प्राणे' इत्युत्तरवाक्ये, किं मनसः प्राणे स्वरूपलयः, वृत्तिलयो वेति संशये, स्वरूपलय इति पूर्वः पक्षः । सिद्धान्तस्तु— तत् सर्वेन्द्रियवृत्तिलयाधारं मनोऽपि प्राणे स्ववृत्तिलयेनैव लीयते, न स्वरूपेणेति 'मनः प्राणे' इत्युत्तराद्वाक्यादवगन्तव्यम् । सुप्तिमृत्यवस्थयोः सवृत्तिके प्राणे सत्येव मनोवृत्तिलयदर्शनादिति हेत्वनुषङ्गः । न ह्यबन्नयोरुपादानोपादेयत्वमात्रेण तद्विकारयोरप्युपादानोपादेयभावो युक्तः, हिमघटयोस्तददर्शनादिति भावः ॥

२. मनोधिकरणम् ।

पूर्वं प्राणे मनसो वृत्तिलय उक्तः; तद्वत्तेजसि प्राणस्य वृत्तिलयोऽस्तु, 'प्राणस्तेजसि' इति श्रुतेरिति दृष्टान्तसंगत्येदमाह—

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

अत्र पूर्वपक्षे तेजःशब्दस्य मुख्यत्वम्, सिद्धान्ते भूतोपहितजीवलक्षकत्वमिति फलभेदः । 'प्राणस्तेजसि' इत्युत्तरवाक्ये किं प्राणस्य लयः तेजसि, उत जीवे इति संशये, तेजसीति पूर्वः पक्षः । सिद्धान्तस्तु— स प्राणः अध्यक्षे जीवे निवृत्तवृत्तिः सन्नवतिष्ठते । कुतः, तं जीवं प्रति उपगमानुगमनावस्थानेभ्यः; 'एवमे-

३. अध्यक्षाधिकरणम् ।

वेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति' इत्युपगमः, 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' इत्यनुगमनम्, 'सविज्ञानो भवति' इत्यवस्थानम्, तेभ्य इत्यर्थः ॥

तर्हि 'प्राणस्तेजसि' इति श्रुतेः कोऽर्थस्तत्राह—

भूतेषु तच्छ्रुतेः ॥ ५ ॥

'प्राणस्तेजसि' इति श्रुतेः तेजःसहितेषु उत्तरदेहारम्भकेषु पञ्चभूतेषूपहितत्वेन विद्यमाने जीवे प्राणस्य वृत्तिलय इत्यर्थः । एवं च प्राणस्य उपहितजीवप्राप्तावुपाधितेजआदिभूतप्राप्तेः स्वतः सिद्धत्वादिति भावः ॥

ननु 'प्राणस्तेजसि' इत्येकस्यैव तेजसः श्रवणात् कथं तेजःसहितेषु भूतेष्वित्युक्तम्, तत्राह—

नैकस्मिन्दर्शयतो हि ॥ ६ ॥

एकस्मिन्नेव तेजसि उत्क्रान्तिसमये जीवो नावतिष्ठते, उत्तरदेहस्य पाञ्चभौतिकत्वेन पञ्चसु भूतेष्ववस्थितेरावश्यकत्वात् । दर्शयतो हि इममर्थं रंहत्यधिकरणे व्याख्याते प्रश्ननिरूपणे इत्यर्थः ॥

पूर्वोक्तोत्क्रान्तिमुपजीव्यान्यत्किंचिद्विचार्यत इत्युपजीव्योपजीवकभावसंगत्येदमाह—

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥

अत्र पूर्वपक्षे दहराद्युपासकस्य उत्क्रान्त्यभावादिहैव मुक्तिः, सिद्धान्ते तु उत्क्रान्तिसद्भावात् ब्रह्मलोकप्राप्तिरिति फलभेदः ।

४ आसृत्युपक्रमाधिकरणम् । किं उत्क्रान्तिरविदुष एव, उत दहरादिसगुणब्रह्मोपासकस्यापि इति संशये, 'तयोर्ध्वमायन्न मृतत्वमेति' इत्युपासकस्य मोक्षश्रवणात् अविदुष एवेति पूर्वः पक्षः । सिद्धान्तस्तु— आसृत्युपक्रमात् देवयानोपक्रमात् प्राक् येयम् उत्क्रान्तिः सा विद्वदविदुषोः समानैव भवितुमर्हति । कुतः, वाङ्मनसीत्याद्यविशेषश्रवणात् । ननु कथं तर्हि सगुणविद्यायाम् अमृतत्वश्रवणमिति तत्राह— अमृतत्वं चानुपोष्य । अनुपोष्य अदग्ध्वा अत्यन्तमविद्याक्लेशजालम्, एतदमृतत्वमापेक्षिकमित्यर्थः ॥

ननूत्क्रान्तिः समानेत्ययुक्तम्, मृतस्य स्वरूपत एवात्यन्तं ब्रह्मसंपत्तेरित्याक्षेपसंगत्येदमाह—

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

अत्र पूर्वपक्षे मृतमात्रस्य मुक्तिः, सिद्धान्ते तदभाव इति फलभेदः । 'तेजः परस्यां देवतायाम्' इत्यत्र साध्यक्षं भूतान्तरसहितं तेजः परमात्मनि संपद्यत इति तेजसो लयः

श्रूयते । स किं आत्यन्तिकः, उत अनात्यन्तिक इति संशये,

५. संसारव्यपदेशाधिकरणम् ।

परमात्मनः सर्वोपादानत्वात् तत्रात्यन्तिक एव लय इति पूर्वः पक्षः । सिद्धान्तस्तु—तत् यथोदीरितं तेजः आ अपीतेः आ मोक्षादवतिष्ठते । कुतः, 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः' इत्यादिना संसारव्यपदेशात्; अन्यथा पुनः संसाराभावः प्रसज्येत । तस्मात् सुषुप्ताविव नात्यन्तिकलय इति सिद्धम् ॥

ननूक्तलक्षणं तेजो यद्यस्ति, तर्हि पार्श्वस्थैरुपलभ्येतेत्यत आह—

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

यथोक्तं तेजः प्रमाणतः चकारात् स्वरूपतश्च त्रसरेणुवत् सूक्ष्मम्; तस्य नाडीद्वारा निष्क्रमणश्रुत्या तथा सूक्ष्मत्वस्योपलब्धेरित्यर्थः ॥

नोपमर्देनातः ॥ १० ॥

अतः सूक्ष्मत्वादेव शरीरोपमर्देन स्वयं नोपमृद्यत इत्यर्थः ॥

सूक्ष्मतेजःसद्भावे औष्ण्यलिङ्गकमनुमानमाह—

अस्यैव चोपपत्तेरेष ऊष्मा ॥ ११ ॥

स्थूलदेहे एष उपलभ्यमानः ऊष्मा अस्यैव सूक्ष्मतेजस

एव धर्मः, सत्येव तस्मिन् तदुपलब्धेः तदभावे मृतदेहे तद्नुपलब्धेरित्यन्वयव्यतिरेकाभ्यां तद्धर्मत्वस्यैवोपपत्तेरित्यर्थः ॥

आसृत्युपक्रमाधिकरणे मुख्यामृतत्वे उत्क्रान्त्यभावोऽवगतः । स न युक्त इत्याक्षेपसंगत्येदमाह—

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

नाव्यवहितेनास्य संगत्यपेक्षा । अत्र पूर्वपक्षे निर्गुणब्रह्मविदोऽपि ब्रह्मलोकप्राप्तिः, सिद्धान्ते त्विहैव मुक्तिरिति फलभेदः । निर्गुणब्रह्मविदत्र विषयः; किं तस्योत्क्रान्तिरस्ति न वेति संशये, अस्त्युत्क्रान्तिः ।

६. प्रतिषेधाधिकरणम् ।

ननु नास्त्युत्क्रान्तिः 'न तस्य प्राणा उत्क्रामन्ति' इति निर्गुणब्रह्मविदः शरीरात् प्राणोत्क्रान्तिप्रतिषेधादिति चेत्, न । शारीराज्जीवादयमुत्क्रान्तिप्रतिषेधः, न शरीरात् । 'न तस्मात्प्राणा उत्क्रामन्ति' इति माध्यंदिनशाखायां जीवादेव प्राणोत्क्रान्तिप्रतिषेधस्य कृतत्वात् । अतः प्राणादिसहितस्य जीवस्य परब्रह्मविदोऽप्यस्त्युत्क्रान्तिरिति पूर्वः पक्षः ॥

सिद्धान्तस्तु—

स्पष्टो ह्येकेषाम् ॥ १३ ॥

एकेषां काण्वानां शाखायां प्राणानां परब्रह्मविदः देहादु-

त्क्रान्तिप्रतिषेधः स्पष्टः। हि यतः उपलभ्यते, अतः न तस्योत्क्रान्तिः, अपि त्वत्रैव लयः। अन्यथा अनुत्क्रान्तानां प्राणानां देहे अवस्थाने 'स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते' इत्युत्क्रान्त्यवधेर्देहस्योच्छूनत्वादिलिङ्गं बाध्येत । तत्सामान्यात् माध्यंदिनशाखायामपि तस्मादित्यनेन देहस्यैव ग्रहणं बोध्यम् । तस्माद्विद्वद्देहादेव प्राणोत्क्रान्तिप्रतिषेध इति ॥

किं च--

स्मर्यते च ॥ १४ ॥

महाभारते 'देवापि मार्गे मुह्यन्ति ह्यपदस्य पदैषिणः' इति विदुष उत्क्रान्त्यभावः स्मर्यत इत्यर्थः ॥

ननु ब्रह्मणि लय इत्ययुक्तम् , 'गताः कलाः पञ्चदश प्रतिष्ठाः' इति विद्वद्विषयश्रुत्यैव पृथिव्यादिषु लयश्रवणादित्याक्षेपसंगत्येदमाह---

तानि परे तथा ह्याह ॥ १५ ॥

पूर्वाधिकरणाक्षेपरूपत्वादस्य तत्फलं द्रष्टव्यम् । अत्र किं ब्रह्मविदः प्राणानां लयः पृथिव्यादिषु, उत परब्रह्मणीति वि-

७. वागादिलयाधिकरणम् ।

शये, पृथिव्यादिष्विति पूर्वः पक्षः । सिद्धान्तस्तु-- तानि यथोक्तानि प्राणाख्या-

नीन्द्रियाणि परे ब्रह्मणि लीयन्ते । तथा ह्याह श्रुतिः— 'एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति' इति । न च पूर्वश्रुतिविरोधः । स्वोपादानेषु पृथिव्यादिषु प्रलीनाः कलाः प्राणाः स्वोपादानैः सह परब्रह्मण्यस्तं गच्छन्तीति श्रुतिद्वयतात्पर्यम् ॥

पूर्वोक्तविद्वत्कला विषयीकृत्यान्यत्किंचिद्विचार्यत इति एकविषयत्वसंगत्येदमाह—

अविभागो वचनात् ॥ १६ ॥

अत्र पूर्वपक्षे मोक्षासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः । विद्वत्कलालयः किमविदुष इवानात्यन्तिकः, उत आत्यन्तिक इति संदेहे, अनात्यन्तिक इति पूर्वः पक्षः । सिद्धान्तस्तु—विद्वत्कलानां ब्रह्मणा सहात्यन्तमविभाग एव, न सावशेषो लयः । कुतः, कलानां लयोक्त्यनन्तरं 'भिद्येते चासां नामरूपे' इति कलानां शक्त्यात्मकनामरूपयोः पुरुषे लयमुक्त्वा 'स एषोऽकलोऽमृतो भवति' इति वचनादित्यर्थः । अविदुषस्तु जन्मान्तरसिद्ध्यर्थम् अनात्यन्तिकलयो युक्तः, न विदुषः ; तस्य तदभावादिति भावः ॥

८. अविभागाधिकरणम् ।

स्थितेयं परविद्याचिन्ता। पूर्वमासृत्युपक्रमाधिकरणे सगुणब्रह्मविदां येयमुत्क्रान्तिः, सेयमितरोत्क्रान्त्या मार्गोपक्रमपर्यन्तं समेत्युक्तम्। तद्वन्मार्गोपक्रमेऽपि समैवास्तु 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वा' इति हृत्प्रद्योतनादेः समत्वश्रवणादिति दृष्टान्तसंगत्येदमाह—

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्या-सामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया॥ १७॥

अत्र पूर्वपक्षे विद्याधिकृतातिशयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। अत्र किमुपासकोऽप्यनुपासकवत् येन केनचिद्द्वारेण निष्क्रामति, उत मूर्धन्यनाडचेति विशये, येन केनचिदिति पूर्वः पक्षः। सिद्धान्तस्तु— तदोकोग्रज्वलनं तस्य लीनवृत्तिकवागादिसमुदायस्योत्क्रमिष्यतो जीवस्य ओकः आयतनं हृदयं तस्य यदग्रं तस्य ज्वलनं प्राप्तव्यज्ञानरूपं प्रद्योतनाख्यम् आदौ भवति; तेन प्रद्योतेन प्रकाशितद्वारः विद्वानविद्वांश्च भवति। तत्र अविद्वान स्थानान्तरेभ्यो निष्क्रामति, विद्वांस्तु मूर्धस्थानादेव। कुतः, विद्यासामर्थ्यात्, यदि विद्वानपि इतरवत्स्थाना-

९. तदोकोधिकरणम्।

न्तरेभ्यो निष्क्रामेत् नैवोत्कृष्टं फलं लभेत। ननु स्थानान्तरेभ्योऽप्युत्क्रामन्नुत्कृष्टं फलमाप्नुयादिति चेत्, नेत्याह—

तच्छेषगत्यनुस्मृतियोगाच्च। तस्याः सगुणविद्यायाः शेषभूता या गतिः मूर्धन्यनाडीसृतिः तस्या अनुस्मृतिर्ध्यानं तद्योगात्तद्विधानाच्च। यदि स्थानान्तरेभ्यो निष्क्रामतोऽपि विशिष्टफलप्राप्तिः स्यात्, तर्हि विशिष्टगतिचिन्तनविधानं व्यर्थमेव स्यात्। अतो दीर्घकालनैरन्तर्यसत्कारैर्दृढमासेवितेन हार्देन ब्रह्मणानुगृहीतस्तद्भावमापन्नो विद्वान् मूर्धन्ययैव शताद्धिकया नाड्या निष्क्रामति। तथा च श्रुतिः— 'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति' इति॥

पूर्वोक्तनाडीसंबद्धरश्मीनत्रोपजीव्य किंचिद्विचार्यत इत्युपजीव्योपजीवकभावसंगत्येदमाह—

रश्म्यनुसारी॥ १८॥

अत्र पूर्वपक्षे रात्रौ मृतस्य रश्मिप्राप्त्यर्थं सूर्योदयप्रतीक्षास्ति, सिद्धान्ते नास्तीति फलभेदः। अत्र 'अथैतैरेव रश्मिभिरूर्ध्वम् आक्रमते' इति मूर्धन्यनाड्या निर्गतस्य रश्मिसंबन्धः श्रूयते। तत्र किं रश्म्यनुसारित्वम् अहनि मृतस्यैव, उत रात्रावपीति संदेहे, अह-

१०. रश्म्यधिकरणम्।

न्येवेति पूर्वः पक्षः । सिद्धान्तस्तु— अहनि रात्रौ वा मृतः रश्म्यनुसारी भवतीति ॥

पूर्वपक्षबीजमुपन्यस्य दूषयति—

निशि नेति चेन्न संबन्धस्य यावद्देह-भावित्वाद्दर्शयति च ॥ १९ ॥

अहनि सूर्यरश्मिनाडीसंबन्धस्य सत्त्वात्तत्रैव मृतो रश्म्यनुसारी भवति । निशि तु न तदसत्त्वादिति चेत्, न; नाडीरश्मिसंबन्धस्य यावद्देहभावित्वात् । दर्शयति च श्रुतिः— 'अमुष्मादादित्यात्प्रतायन्ते ता आसु नाडीषु सृप्ताः आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः' इति । तस्मान्निश्यपि मृतो रश्म्यनुसारीति सिद्धम् ॥

उक्तन्यायमन्यत्रातिदिशति—

अतश्चायनेऽपि दक्षिणे ॥ २० ॥

अस्यातिदेशत्वान्न पृथक्संगत्यपेक्षा । अत्र पूर्वपक्षे दक्षिणायने मृतस्य फलाभावादुत्तरायणार्थं प्रयत्नापेक्षा, सिद्धान्ते हेत्वसिद्धेस्तदनपेक्षेति फलभेदः । किं दक्षिणायने मृतो विद्वान् विद्याफलं प्राप्नोति, न वेति विशये, उत्तरायणप्रा-

शस्त्यप्रसिद्धेर्भीष्मस्य तत्प्रतीक्षास्मरणाच्च न प्राप्नोतीति पूर्वः

११. दक्षिणायनाधिकरणम् । पक्षः । सिद्धान्तस्तु— अत एव कालान्तरप्रतीक्षानुपपत्तेः विद्यायाः नित्यवत्फलसंबन्धश्रवणाच्च दक्षिणेऽप्ययने मृतो विद्वान् फलं प्राप्नोत्येवेत्यर्थः । प्राशस्त्यप्रसिद्धिरविद्वद्विषया । भीष्मस्य च प्रतीक्षापरिपालनम् आचारपरिपालनार्थम्, पितृप्रसादलब्धस्वेच्छामरणज्ञापनार्थं वेति भावः ॥

ननु 'यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्' इति स्मृतिविरोधात् कथं रात्रौ दक्षिणायने वा मृतस्य अनावृत्तिः स्यादित्याशङ्क्याह—

योगिनः प्रति च स्मर्यते स्मार्ते चैते ॥ २१ ॥

योगिनः स्मार्तविद्योपासकान् प्रति अयमहरादिकालविशेषः स्मर्यते, स्मार्तत्वप्रत्यासत्तेः; न श्रौतदहराद्युपासकान्प्रति । ननु योगिनो दहराद्युपासका एव स्मृत्युक्ताः किं न स्युरित्यत आह—स्मार्ते चैते । ब्रह्मार्पणबुद्ध्यानुष्ठितं कर्म योगः, 'अनाश्रितः कर्मफलम्' इत्यादिस्मृतेः । धारणापूर्वकाकर्तृत्वानुभवः

सांख्यः, 'इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्' इति स्मृतेः । एवं चैते योगसांख्ये स्मार्ते एव, न श्रौते । तथा च श्रुतिस्मृत्योरर्थभेदान्न श्रौतोपास्तिषु कालनियमः । यदि श्रौतार्थप्रत्यभिज्ञया कालशब्दस्तदभिमानिदेवतापरः, तर्ह्यैकार्थ्यमेवेत्यनवद्यम् । तस्माद्विद्वान् सर्वदैव मृतः विद्याफलमाप्नोतीत्यतिशोभनम् ॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्व-
प्रकाशिकायां चतुर्थाध्यायस्य
द्वितीयः पादः ॥

ॐ

तृतीयः पादः ॥

इत्थमुत्क्रान्तिं निरूप्य तत्साध्यमार्गं निरूपयितुमिमं पादमारभते। पूर्वं यदाकदाचिन्मृतस्यापि फलप्राप्तिरुक्ता; तद्वत् येन केनचिन्मार्गेण गतिरिति दृष्टान्तसंगत्येदमधिकरणमारभते—

अर्चिरादिना तत्प्रथितेः ॥ १ ॥

अत्र पूर्वपक्षे मार्गविकल्पः, सिद्धान्ते मार्गैक्यमिति फलभेदः। अस्ति ब्रह्मलोकप्राप्तिहेतौ मार्गे श्रुतीनां विप्रतिपत्तिः।

१. आर्चिराद्यधिकरणम्।

तत्र क्वचित् 'अथैतैरेव रश्मिभिरूर्ध्वमाक्रमते' इति रश्मिरूपो मार्गः श्रूयते; क्वचित् 'तेऽर्चिषमभिसंभवन्ति' इत्यर्चिरादिरूपः। तत्र किं परस्परविभिन्ना एवैते मार्गाः, उतानेकविशेषणयुक्त एक एवेति विशये, प्रकरणभेदात् परस्परविभिन्ना एवेति पूर्वः पक्षः। सिद्धान्तस्तु— सर्वो हि ब्रह्मलोकप्रेप्सुरर्चिरादिनैकेन मार्गेण गन्तुमर्हति। कुतः, तत्प्रथितेः तस्य अर्चिरादिमार्गस्य पञ्चाग्निविद्याप्रकरणे 'ये चेमे अरण्ये श्रद्धा तप इत्युपासते तेऽ-

र्चिषमभिसंभवन्ति' इति पञ्चाग्न्युपासकस्येव इतरस्यापि सगुणब्रह्मोपासकस्य प्रथितेः श्रुतत्वादित्यर्थः। न च प्रकरणभेदान्मार्गभेद इति वाच्यम्, सर्वत्रार्चिराद्येकदेशप्रत्यभिज्ञानात्। गन्तव्यब्रह्मलोकाभेदाच्च सर्वत्र सर्वविशेषणोपसंहारेण अनेकविशेषणयुक्त एक एव मार्ग इत्यनवद्यम्॥

पूर्वं सर्वत्रार्चिराद्येकदेशप्रत्यभिज्ञानान्मार्गैक्यमित्युक्तम्। तद्वदग्न्यनन्तरं वायुपाठप्रत्यभिज्ञानात् तत्रैव वायुर्निवेशयितव्य इति दृष्टान्तसंगत्येदमाह—

वायुमब्दादविशेषविशेषाभ्याम्॥ २॥

अत्र पूर्वपक्षे पाठक्रमस्यानुसरणम्, सिद्धान्ते तु अर्थक्रमात्तस्य बाध इति फलभेदः। 'स एतं देवयानं पन्था-

२. वाय्वधिकरणम्। नमासाद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम्' इति कौषीतकिनः देवयानमार्गमामनन्ति। छन्दोगाश्चैवमेवाधीयते— 'तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्। मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति' इति। तत्र श्रुतिद्वयेऽप्यग्निरादौ पठितः पश्चात्कौषीतकिश्रुतौ

वायुः पठितः । स किं वायुः अर्चिरात्मकाग्नेरनन्तरं निवेशयितव्यः, उत संवत्सरात्परमिति विशये, अग्नेरनन्तरमिति पूर्वः पक्षः । सिद्धान्तस्तु—अब्दात् संवत्सरादनन्तरम् आदित्यादर्वाक् वायुमभिसंविशन्ति । कुतः, अविशेषविशेषाभ्याम्, कौषीतकिश्रुतौ वायोः कुतश्चिदानन्तर्यम् अर्वाक्त्वं वा विशेषो न ज्ञायते तद्वाचकपदाभावात् । बृहदारण्यके तु 'यदा वै पुरुषोऽस्माँल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स उर्ध्वमाक्रमते स आदित्यमागच्छति' इत्यादित्यादर्वाक्त्वं विशेषो दृश्यते । ताभ्याम् अविशेषविशेषाभ्यां संवत्सरादनन्तरं वायुर्निवेशयितव्यः । अग्न्यनन्तरपाठक्रमस्तु ऊर्ध्वशब्दश्रुतिसिद्धार्थक्रमेण बाध्यत इत्यदोषः । यद्यपि बृहदारण्यके मासानन्तरं देवलोकः श्रूयते, तथापि छान्दोग्यश्रुत्या मासानन्तरं संवत्सरो निवेशयितव्यः, तस्य मासावयवित्वेन योग्यत्वात् । अत्रैवं क्रमो निष्पन्नः— मासेभ्यः संवत्सरं संवत्सराद्देवलोकं देवलोकाद्वायुं वायोरादित्यम् आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतमिति । एवं च सूत्रे वायुपदं देवलोकोपलक्षकमिति द्रष्टव्यम् ॥

पूर्वमग्न्यनन्तरं श्रुतस्य वायोः स्थानविशेषश्रवणादर्चिरादिमार्गपर्वत्वेन संबन्ध उक्तः । न तथा वरुणादीनां संबन्धः

संभवति स्थानविशेषाश्रवणादिति प्रत्युदाहरणसंगत्येदमाह—

तडितोऽधि वरुणः संबन्धात् ॥ ३ ॥

अत्र पूर्वपक्षे वरुणादेः मार्गपर्वत्वेन संबन्धासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। किं कौषीतकिवाक्ये श्रुतः वरुणादिः मार्गपर्वत्वेन संबध्यते न वेति विशये, नेति पूर्वः पक्षः। सिद्धान्तस्तु— तडितः विद्युल्लोकादधि उपरिष्टात् वरुणः संबध्यते। कुतः, संबन्धात् वरुणस्याब्द्वारा विद्युत्संबन्धादित्यर्थः। 'आगन्तुकानामन्ते निवेशः' इति न्यायाद्विद्युदानन्तर्ये सति यथापाठमिन्द्रप्रजापत्योः क्रमो द्रष्टव्यः, बाधकाभावादिति भावः ॥

३. तडिदधिकरणम्।

पूर्वं यथा तडिद्वरुणसंबन्धात् तडिदनन्तरं वरुणस्य संबन्ध उक्तः, तद्वदिह लौकिकमार्गचिह्नसारूप्यसंबन्धात् अर्चिरादेः मार्गचिह्नोपदेश इति दृष्टान्तसंगत्येदमाह—

आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

अत्र पूर्वपक्षे उपदेशस्य लोकश्रुतेर्वा मुख्यत्वम्, सिद्धान्ते न्यायवल्लिङ्गस्य मुख्यत्वमिति फलभेदः। अत्र किं तेऽर्चिरादयो मार्गचिह्नभूताः, उत गन्तॄणां भोगभूमयः, उताहो आतिवाहिका इति विशये, अर्चिरादयो वृक्षनद्यादिवत् मार्गचि-

ह्नभूताः । अथवा 'अग्निलोकं वायुलोकम्' इत्यादिलोकश-

४. आतिवाहिकाधिकरणम् ।

ब्दश्रुतेः भोगभूमय इति पूर्वः पक्षः । सिद्धान्तस्तु—अर्चिरादयः आतिवाहिकाः कार्यब्रह्मगन्तॄणां गमयितारः । कुतः, तल्लिङ्गात् 'तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयति' इत्यमानवपुरुषस्य विद्युल्लोकं प्राप्तानुपासकान् प्रति गमयितृत्वश्रवणादित्यर्थः । यत्तु उपदेशस्वारस्यात् चिह्नभूता इति, तन्न; तेषामर्चिरादीनामातिवाहिकत्वे विरोधाभावात् । यत्तु लोकशब्दश्रुतेः भोगभूमय इति, तदपि न; निलीनेन्द्रियाणामुपासकानां भोगायोगात् । अतः अमानवादर्वाचीना अर्चिरादिमानवाः आतिवाहिका इति भावः ॥

ननु लिङ्गमात्रं न तेषां नेतृत्वगमकम्, न्यायाभावादित्यत आह—

उभयव्यामोहात्तत्सिद्धेः ॥ ५ ॥

यद्यर्चिरादयोऽचेतनाः, तर्हि मार्गतद्गन्त्रोः उभयोरपि व्यामोहात् अज्ञत्वादूर्ध्वगतिर्न स्यात् । अतः स्वयं प्रयत्नशून्यश्चेतनान्तरेण नेय इति लौकिकन्यायानुगृहीताल्लिङ्गात् तत्सिद्धेः नेतृत्वसिद्धेरित्यर्थः ॥

ननु विद्युल्लोकादमानवस्यैवं नेतृत्वश्रवणात् कथं वरुणा-

दीनां नेतृत्वमित्यत आह—

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ६ ॥

अमानवः पुरुषो विद्युल्लोकमागतः वैद्युतस्तेनैव, ततः विद्युल्लोकप्राप्तेरूर्ध्वं नीयमाना उपासकाः कार्यब्रह्म प्राप्नुवन्ति, 'अमानवः स एत्य ब्रह्मलोकं गमयति' इत्यमानवस्यैव गमयितृत्वश्रवणात्। वरुणादीनां तु अमानवोपसर्जनत्वेन नेतृत्वम्, न प्राधान्येन । अतः अर्चिरादयो नेतार इति सिद्धम् ॥

इत्थं गन्तव्यप्राप्तिहेतुं मार्गं निरूप्य फलभूतं गन्तव्यं निरूपयतीति फलफलिभावसंगत्येदमाह—

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ७ ॥

अत्र पूर्वपक्षे मार्गस्य मुक्त्यर्थता, सिद्धान्ते भोगार्थतेति फलभेदः । 'स एनान् ब्रह्म गमयति' इत्यत्र किं परं ब्रह्म

५. कार्याधिकरणम् ।

गन्तव्यम्, उत कार्यं ब्रह्मेति संशये, परं ब्रह्मेति पूर्वः पक्षः । सिद्धान्तस्तु— कार्यमेव ब्रह्म गन्तव्यमिति बादरिराचार्यो मन्यते । कुतः, अस्य कार्यस्य ब्रह्मणः परिच्छिन्नस्य गत्युपपत्तेः गन्तव्यत्वोपपत्तेरित्यर्थः ॥

विशेषितत्वाच्च ॥ ८ ॥

'ब्रह्मलोकान्गमयति' इति श्रुत्यन्तरे बहुवचनेन गन्तव्यब्रह्मणः विशेषितत्वात्, न परस्येति चकारार्थः ॥

ननु नपुंसकब्रह्मशब्दस्य परस्मिन्नेव मुख्यत्वात् कथं कार्यब्रह्मणि तद्व्यपदेशः; तत्र आह—

सामीप्यात्तु तद्व्यपदेशः ॥ ९ ॥

तुश्चोद्यनिरासार्थः । परमेव हि ब्रह्म सत्यकामत्वादिगुणयुक्तं कार्यं ब्रह्मेति कथ्यते । तथा च कार्यब्रह्मणः कारणब्रह्मसामीप्यात् कारणे मुख्यस्य ब्रह्मशब्दस्य कार्ये व्यपदेशः लक्षणया प्रयोग इत्यर्थः । मुख्याभावादिति भावः ॥

ननु कार्यब्रह्मप्राप्तौ कथं तेषां न पुनरावृत्तिः, इतरथा श्रुतिविरोधः; तत्र आह—

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ १० ॥

कार्यब्रह्मलोकस्यात्यये नाशे सति तदध्यक्षेण तल्लोकस्वामिना हिरण्यगर्भेण सह अतः कार्याद्ब्रह्मणः परं ब्रह्म प्राप्नुवन्ति उत्पन्नात्मसाक्षात्कारा विद्वांस इत्यनावृत्तिश्रुत्यभिधानादवगन्तव्यमित्यर्थः ॥

स्मृतेश्च ॥ ११ ॥

'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति स्मृतेरपि ब्रह्मलोकं प्राप्ताः क्रमेण मुक्तिं प्राप्नुवन्तीत्यवगन्तव्यमित्यर्थः ॥

इत्थं सिद्धान्तमभिधाय पूर्वपक्षमाह—

परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥

नपुंसकब्रह्मशब्दस्य परस्मिन्नेव मुख्यत्वात् परमेव ब्रह्म गमयत्यमानव इति जैमिनिराचार्यो मन्यत इत्यर्थः ॥

दर्शनाच्च ॥ १३ ॥

'तयोर्ध्वमायन्नमृतत्वमेति' इति मुक्तेर्गतिपूर्वकत्वदर्शनाच्च परमेव गमयतीत्यर्थः ॥

अपि च—

न च कार्ये प्रतिपत्त्यभिसंधिः ॥ १४ ॥

'प्रजापतेः सभां वेश्म प्रपद्ये' इत्ययं प्रतिप्रत्त्यभिसंधिः वेश्मप्राप्तिसंकल्पः न कार्ये कार्यब्रह्मविषयको न भवति, अपि तु परब्रह्मविषयक एव; 'ते यदन्तरा तद्ब्रह्म' इति परस्यैव प्रकृतत्वादिति पूर्वः पक्षः। अस्मिन्पक्षे मुख्यत्वाद्दर्शनाच्चेति हेतुद्वयमर्वागेवादूषि। यत्तु प्रकरणाद्वेश्मप्राप्तिसंकल्पः परविषय इति, तन्न; 'प्रजापतेः सभां वेश्म प्रपद्ये' इति वाक्य-

श्रुतिभ्यां दुर्बलप्रकरणविच्छेदेन वेश्मप्राप्तिसंकल्पस्य कार्यब्रह्मविषयकत्वावगमात् । अतः कार्यं ब्रह्मैव गन्तव्यमिति सिद्धम् ॥

इत्थं अर्चिरादिगन्तव्यं निरूप्य गन्तॄणां बुद्धिस्थत्वात् बुद्धिस्थत्वसंगत्या तान्निरूपयितुमिदमाह—

अप्रतीकालम्बनान्नयतीति बादरायण उभयथादोषात्तत्क्रतुश्च ॥ १५ ॥

अत्र पूर्वपक्षे उपासकमात्रस्योत्तरमार्गसिद्धिः, सिद्धान्ते तु उभयथाभावसिद्धिरिति फलभेदः। किममानवः पुरुषः सर्वा-

६. अप्रतीकालम्बनाधिकरणम् ।

नुपासकान् ब्रह्मलोकं नयति, उत अप्रतीकालम्बनानिति संदेहे, नियामकाभावात् सर्वानिति पूर्वः पक्षः। सिद्धान्तस्तु—अप्रतीकालम्बनान् प्रतीकोपासकभिन्नानुपासकान्नयत्यमानव इति बादरायणाचार्यो मन्यते। ननु तर्हि 'अनियमः सर्वासाम्' इत्यत्र सर्वोपासनेषु मार्गोपसंहारः कृतः, तद्विरोध इत्यत आह— उभयथादोषात् कांश्चिदुपासकान्नयति, कांश्चिन्नेति उभयथाभ्युपगमे अदोषात् दोषाभावात्; अनियमन्यायस्य प्रतीकभिन्नविषयकत्वान्न तद्विरोधः। अत्र नियामकमाह— तत्क्रतुश्च तस्य कार्यब्रह्मणः क्रतुरुपासनं यस्य स तत्क्रतुः उपासकः;

एवं च यो यद्विषयकोपासकः स तत्प्राप्नोति इति श्रुतिस्मृतिसिद्धत्वात्तदुपासकानामेव कार्यब्रह्मप्राप्तिः ; प्रतीकोपासनेषु 'नाम ब्रह्म' इत्यादिषु ब्रह्मणः प्रतीकं प्रति विशेषणत्वेन प्रतीकस्यैव प्राधान्यात् न तदुपासकानां ब्रह्मप्राप्तिः; पञ्चाग्न्युपासकानां चाब्रह्मोपासकत्वेऽपि श्रुतिबलात् ब्रह्मप्राप्तिरिति विवेकः ॥

अपि च—

विशेषं च दर्शयति ॥ १६ ॥

'यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति' इति नामप्रतीकोपासनफलादुत्तरोत्तरवागाद्युपासनानामुत्कृष्टफलविशेषं दर्शयति— 'वाग्वाव नाम्नो भूयसी' इत्याद्या श्रुतिः । अयं च फलविशेषः प्रतीकानामुत्कर्षापकर्षवतामुपास्यत्वे युज्यते, न तु सर्वत्रैकरूपस्य ब्रह्मण उपास्यत्वे। तस्माद्ब्रह्मोपासकानामेव ब्रह्मप्राप्तिः, न प्रतीकोपासकानामिति सिद्धम् ॥

इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्वप्रकाशिकायां चतुर्थाध्यायस्य
तृतीयः पादः ॥

ॐ

चतुर्थः पादः ॥

इत्थं पूर्वस्मिन्पादे सगुणब्रह्मोपासकानां कार्यब्रह्मप्राप्तिः कथिता । अधुना निर्गुणब्रह्मविदां तद्भावमभिधातुमयं पाद आरभ्यते—

संपद्याविर्भावः स्वेन शब्दात् ॥ १ ॥

पादान्तरत्वादस्य न पूर्वाधिकरणसंगत्यपेक्षा । अत्र पूर्वपक्षे स्वर्गमोक्षयोरविशेषः, सिद्धान्ते विशेष इति फलभेदः ।

१. संपद्याविर्भावाधिकरणम् ।

'एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति श्रूयते। तत्र किं स्वर्गादौ सुकृतिन इव निर्गुणब्रह्मविदोऽप्यागन्तुकेन केनचिद्विशेषेणाभिनिष्पत्तिः, उतात्ममात्रेणेति संशये, फलत्वाविशेषात्स्वर्गवदभिनिष्पत्तिरिति पूर्वः पक्षः । सिद्धान्तस्तु—संपद्य स्वप्रकाशमात्मानं साक्षादनुभूय तेनैवात्ममात्रेणाविर्भावो विद्वानाविर्भवति । कुतः, 'स्वेन रूपेणाभिनिष्पद्यते' इति स्वशब्दादित्यर्थः । फलहेतुकानु-

मानं मोक्षनित्यत्वश्रुतिबाधितमिति बोध्यम् ॥

ननु स्वरूपात्मकमोक्षस्य सनातनत्वात् कः पुनः पूर्वावस्थातो विशेषः, अत आह—

मुक्तः प्रतिज्ञानात् ॥ २ ॥

पूर्वमवस्थात्रयकलुषितः संसारीवावतिष्ठमानोऽपि सर्वसंसारानर्थव्रातान्मुक्तः परितः प्रद्योतमानपूर्णानन्दात्मनावतिष्ठत इति महानयं विशेषः। कुतः पुनरयमवगम्यते, प्रतिज्ञानात् 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' इति सकलानर्थविनिर्मुक्तस्यैवानन्दात्मनो व्याख्येयत्वेन प्रतिज्ञानादित्यर्थः ॥

ननु कार्यं ज्योतिरुपसंपन्नस्य कथं मुक्तत्वम्, अत आह—

आत्मा प्रकरणात् ॥ ३ ॥

अत्रात्मैव ज्योतिर्न भौतिकं तेजः, 'य आत्मापहतपाप्मा' इति आत्मप्रकरणादित्यर्थः ॥

यथोक्तमेतदुपजीव्यान्यत्किंचिद्विचार्यत इत्युपजीव्योपजीवकभावसंगत्येदमाह—

अविभागेन दृष्टत्वात् ॥ ४ ॥

अत्र पूर्वपक्षे जीवब्रह्मणोरत्यन्तभेदः, सिद्धान्ते तयोरत्यन्ताभेद इति फलभेदः। किं मुक्तो ब्रह्मभिन्नत्वेनावतिष्ठते, उत ब्रह्माभिन्नत्वेनेति संदेहे, 'ज्योतिरुपसंपद्य' इति कर्मकर्तृत्वेन भेदोक्तेः ब्रह्मभिन्नत्वेनेति पूर्वः पक्षः। सिद्धान्तस्तु— अविभागेन निरतिशयानन्दब्रह्मात्मनैवावतिष्ठते। कुतः, दृष्टत्वात् 'ब्रह्मैव सन् ब्रह्माप्येति' 'तत्त्वमसि' इत्यादिश्रुतिष्वभेदस्यैव दृष्टत्वादित्यर्थः। भेदोक्तिरौपचारिकीति भावः॥

२. अविभागेन दृष्टत्वाधिकरणम्।

यथोदीरितं ब्रह्माभिन्नं मुक्तमुपजीव्य किंचिद्विचार्यत इत्युपजीव्योपजीवकभावसंगत्येदमाह——

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः॥ ५॥

अत्र तत्तत्पक्षसिद्धिरेव फलं द्रष्टव्यम्। स किं ब्रह्मात्मको मुक्तः सत्येन सर्वज्ञत्वादिना युक्तोऽवतिष्ठते, उत सर्वज्ञत्वादेः शशविषाणवदत्यन्तासत्त्वाच्चिन्मात्रात्मनावतिष्ठते, आहोस्विद्वस्तुतश्चिन्मात्रो जीवान्तरव्यवहारदृष्ट्या कल्पितसर्वज्ञत्वादिमानिवावतिष्ठत इति संदेहे, सत्येन सर्वज्ञत्वादिना युक्तोऽवतिष्ठत इति जैमिनिराचार्यो मन्यते। कुतः, उपन्यासादिभ्यः उपन्यासविधिव्य-

३. ब्राह्माधिकरणम्।

पदेशेभ्यः । तत्र 'सोऽन्वेष्टव्यः' इति विधानार्थमागतः 'य आत्मापहतपाप्मा' इत्यादिरुपदेश उपन्यासः; 'तस्य सर्वेषु लोकेषु कामचारो भवति' इत्यादिरज्ञातज्ञापको विधिः; 'यः सर्वज्ञः सर्ववित्' इत्यादिर्व्यपदेशः; सोऽयं नोपदेशः, विध्यभावात्; नापि विधिः, सिद्धवन्निर्देशात्; अपि तूभयविलक्षणः । अतस्तेभ्यो हेतुभ्यः सप्रपञ्च एव मुक्तात्मेत्याद्यः पूर्वः पक्षः ॥

द्वितीयं पूर्वपक्षमाह—

चिति तन्मात्रेण तदात्मकत्वा-
दित्यौडुलोमिः ॥ ६ ॥

जीवात्मनः तदात्मकत्वात् चैतन्यात्मकत्वात् चिति तन्मात्रेण चैतन्यात्मनावस्थिते मुक्ते ब्रह्मणि सर्वज्ञत्वादिशब्दा निरर्थका एव प्रयुज्यन्त इत्यौडुलोमिराचार्यो मन्यते, सर्वज्ञत्वादिधर्माणामत्यन्तासत्त्वादिति ॥

सिद्धान्तस्तु—

एवमप्युपन्यासात्पूर्वभावादविरोधं
बादरायणः ॥ ७ ॥

एवमपि पारमार्थिकचैतन्यमात्रस्वरूपाभ्युपगमेऽपि पूर्वोक्तोपन्यासादिभ्यः पूर्वभावात् पूर्वस्य ब्रह्मस्वरूपस्य सर्वज्ञत्वा-

देर्व्यावहारिकस्य भावात् ब्रह्मणो मुक्तात्मनः सप्रपञ्चत्वनिष्प्रपञ्चत्वयोरविरोधं बादरायण आचार्यो मन्यत इत्यर्थः। आविद्यकधर्माणां सर्वज्ञत्वादीनामुपपत्तेर्न तेषां तुच्छत्वमिति भावः ॥

पूर्वत्र ब्रह्मणि विशेषासंभवादविशेषप्रवृत्तापि सविशेषश्रुतिरौपाधिकविषयेति व्यवस्थापिता। न तथेहाविशेषप्रवृत्तमनुमानमयोगिविषये व्यवस्थापनीयम्, योगिन्यपि संकल्पातिरिक्तसाधनसंभवादिति प्रत्युदाहरणसंगत्येदमाह—

संकल्पादेव तु तच्छ्रुतेः ॥ ८ ॥

अत्र पूर्वपक्षे लोकवृत्तानुसरणं फलम्, सिद्धान्ते तु विद्याबलेन संकल्पस्यैव भोगपुष्टिकरत्वसिद्धिः फलमिति विवेकः। दहरविद्यायां श्रूयते—'स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' इति। तत्र किं ब्रह्मलोकस्थस्य विदुषः संकल्पादेव पित्रादिविभूतिप्राप्तिः, उत यत्नान्तरसहकृतात्तस्मादिति संदेहे, विदुषः संकल्पो यत्नान्तरसापेक्षः भोगसामग्रीसंकल्पत्वात् अस्मदादिसंकल्पवदित्यनुमानेन यत्नान्तरसहकृतसंकल्पाद्विभूतिप्राप्तिरिति पूर्वः पक्षः। सिद्धान्तस्तु—केवलात्संकल्पादेवास्य विदुषः पित्रादिविभूतिप्राप्तिः। कुतः,

४. संकल्पाधिकरणम्।

तच्छ्रुतेः 'संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' इति यत्नान्तरानिरपेक्षसत्यसंकल्पश्रुतेः। तया च श्रुत्या लौकिकानुमानस्य बाधो द्रष्टव्यः। यदि संकल्पः साधनान्तरसापेक्षः, तर्हि तदभावे विदुषः वन्ध्यसंकल्पत्वात् सत्यसंकल्पत्वं हीयेत; संकल्पानुगुणसाधनान्तरं त्विष्टमेवेत्यदोषः॥

किं च—

अत एव चानन्याधिपतिः॥ ९॥

अत एव सत्यसंकल्पत्वादेव विद्वाननन्याधिपतिर्भवति। यदि विदुषः कश्चिदधिपतिः स्यात्, तर्हि तदधीनभोगस्य संकल्पमात्रसाध्यत्वाभावात्सत्यसंकल्पत्वं न स्यात्; तस्माद्ब्रह्मात्मकस्य विदुषः संकल्पादेव सर्वैश्वर्यप्राप्तिरिति सिद्धम्॥

पूर्वाधिकरणदृष्टान्तसंगत्येदमाह—

अभावं बादरिराह ह्येवम्॥ १०॥

अत्र पूर्वपक्षे विशेषणश्रुतेरनेकधाभावश्रुतेर्वा मुख्यार्थत्वसिद्धिः, सिद्धान्ते द्वयोरपि श्रुत्योर्विदुषः सत्यसंकल्पत्वादेव मुख्यार्थत्वसिद्धिरिति फलभेदः। 'संकल्पादेव' इति श्रुत्या विदुषस्तावत् मनोऽस्तीत्यवगतम्। किं तस्य शरीरेन्द्रियाणि न सन्ति, उत सन्ति,

(५. अभावाधिकरणम्।)

आहोस्वित् सन्ति न सन्ति चेति संशये, यथा 'संकल्पादेव' इत्यवधारणश्रुत्या साधनान्तराभाव उक्तः, एवं बादरिराचार्यः शरीरेन्द्रियाणामभावं मन्यते । आह ह्येवम् अभावमाम्नायः— 'मनसैतान् कामान्पश्यन्रमते' 'य एते ब्रह्मलोके' इति । यदि विदुषः शरीरादिकं स्यात्, तदा मनसेति विशेषणमन्ययोगव्यवच्छेदकमनर्थकं स्यादित्येकः पूर्वः पक्षः ।

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

शरीरेन्द्रियाणां मनस इव भावं सत्त्वं जैमिनिराचार्यो मन्यते, 'स एकधा भवति त्रिधा भवति' इत्यादिना विदुषः अनेकधाभावविकल्पामननात् । न हि शरीरभेदं विना कदाचिदेकधाभावः, कदाचिदनेकधाभावः संभवतीत्यपरः पूर्वः पक्षः ॥

सिद्धान्तस्तु—

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

अत एव मनसेति विशेषणादनेकधाभावविकल्पाभिधानाच्च, एवं लिङ्गद्वयात्, यदा शरीरादिसंकल्पः, तदा शरीरेन्द्रियवत्त्वम्; यदा तु तत्संकल्पाभावः, तदा शरीरेन्द्रियवत्त्वाभाव इति उभयविधं विदुष ऐश्वर्यं बादरायण आचार्यो मन्यते ।

द्वादशाहवत् यथा 'द्वादशाहमृद्धिकामा उपेयुः' इति उपायिचोदनागम्यत्वात् द्वादशाहस्य सत्रत्वम्, 'द्वादशाहेन प्रजाकामं याजयेत्' इत्यहर्गणत्वे सति यजतिचोदनागम्यत्वादहीनत्वं चेत्युभयविधत्वम्, तद्वदित्यर्थः ॥

ननु विदुषः शरीराद्यभावे कथं भोगस्तत्राह—

तन्वभावे संध्यवदुपपत्तेः ॥ १३ ॥

तनोः सेन्द्रियस्य शरीरस्याभावकाले संध्यवत्, यथा स्वप्ने मानसिकविषयभोगः जाग्रद्विलक्षणः, तद्वद्भोगः । कुतः, 'मनसैतान्कामान्पश्यन्रमते' इति श्रुतेः; एवमेवोपपत्तेरित्यर्थः ॥

ननु देहाद्यभावेऽपि भोगसत्त्वे शरीरादिसत्त्वाङ्गीकारो व्यर्थः स्यादत आह—

भावे जाग्रद्वत् ॥ १४ ॥

देहादिभावकाले यथा जाग्रद्भोगः स्वप्नभोगविलक्षणो भवति, तद्वदित्यर्थः ॥

ननु विकल्पामननलिङ्गेन विदुषोऽनेकशरीराणि सन्तीत्यभाणि, तद्व्यर्थम्; निरात्मकेषु तेषु भोगायोगादित्याक्षेपसंगत्येदमाह—

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

अत्र पूर्वपक्षे एकस्मिन्नेव देहे भोगः, सिद्धान्ते सर्वेष्विति फलभेदः। तत्र किं विदुषा सृज्यमानानि शरीराणि दारुयन्त्रवन्निरात्मकानि, उतास्मदादिशरीरवत् सात्मकानीति संदेहे, निरात्मकानीति पूर्वः पक्षः। सिद्धान्तस्तु— विदुषा सृज्यमानेष्वनेकेषु शरीरेषु विदुष आवेशोऽभिव्यक्तिः विद्यासामर्थ्यादुपपद्यते। प्रदीपवत् यथा प्रदीप एकोऽनेकवर्तिषु प्रविशति, तद्वद्विद्वाननेकान्तःकरणद्वारा देहेषु प्रविशति। तथाहि दर्शयति श्रुतिः— 'स एकधा भवति' इत्यादिका। तस्मात्सर्वाणि शरीराणि सात्मकान्येवेति सिद्धम् ॥

६. प्रदीपाधिकरणम्।

ननु विदुषः न शरीरवत्त्वं युक्तम्; 'तत्केन कं पश्येत्' इति 'ततोऽन्यद्विभक्तं यत्पश्येत्' इति च विशेषज्ञानाभावश्रवणादित्यत आह—

स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

स्वाप्ययसंपत्त्योः सुषुप्तिपरममुक्त्योः अन्यतरापेक्षमिदं विशेषज्ञानाभावश्रवणम्। हि यतः प्रकरणादेवमाविष्कृतम्; सुषुप्तिप्रकरणापेक्षया 'ततोऽन्यत्' इत्यादि श्रुतम्, परममुक्तिप्रकर-

णापेक्षया 'तत्केन' इत्यादि ; तस्मान्नेदं सगुणब्रह्मविदः शरीराङ्गीकारे बाधकमिति ॥

पूर्वं संकल्पमात्रेण देहादिसर्गे विदुष उत्सर्गतः सर्वैश्वर्यमुक्तम् । तस्येह जगदुत्पत्त्यादावपवादः क्रियत इत्युत्सर्गापवादसंगत्येदमाह—

जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ १७ ॥

अत्र पूर्वपक्षे ईश्वरनानात्वम् , सिद्धान्ते तदैक्यमिति फलभेदः । तत्र किं विदुष ऐश्वर्यमीश्वरस्येव निरङ्कुशम् , उत

७. जगद्व्यापाराधिकरणम् । सातिशयमिति विशये, निरङ्कुशमिति पूर्वः पक्षः । सिद्धान्तस्तु— जगदुत्पत्त्यादिव्यापारवर्जं सातिशयमेवैश्वर्यम् ; जगद्व्यापारस्तु परमेश्वरस्यैव ; सृष्टिवाक्येषु सर्वत्र तस्यैव प्रकरणात् प्रकृतत्वात् , विदुषश्च तत्रासंनिहितत्वादित्यर्थः ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

ननु 'आप्नोति स्वाराज्यम्' इति प्रत्यक्षश्रुत्या ऐश्वर्योपदेशान्निरङ्कुशं विदुष ऐश्वर्यमिति चेत् , न । आधिकारिकमण्डल-

स्थोक्तेः अधिकारे तत्तद्व्यापारे नियोजयतीत्याधिकारिकः स चासौ मण्डलस्थः सूर्यमण्डलस्थः परमात्मा, तस्योक्तेः उत्तरवाक्ये 'आप्नोति मनसस्पतिम्' इत्यत्र प्राप्यत्वेनोक्तेः विदुषः सातिशयमैश्वर्यमिति गम्यते। यदि पूर्ववाक्य एव निरतिशयमैश्वर्यमुक्तं स्यात्, तर्हि इदमीश्वरप्राप्तिवचनमनर्थकं स्यात्। अतः सातिशयं विदुष ऐश्वर्यमिति सिद्धम्॥

विकारावर्ति च तथाहि स्थितिमाह॥ १९॥

सगुणे ब्रह्मणि विकारावर्ति निर्गुणं स्वरूपमस्ति। तथाहि ब्रह्मणि सगुणत्वनिर्गुणत्वयोः स्थितिमाह श्रुतिः—'तावानस्य महिमा ततो ज्यायांश्च पूरुषः' इत्यादिका। अयं भावः—यथा सगुणे स्थितं निर्गुणस्वरूपम् उपासको न प्राप्नोति, तज्ज्ञानाभावात्; तथा तद्गतं जगदुत्पत्त्यादिकमैश्वर्यं न प्राप्नोति, तदुपास्त्यभावात्; उपास्त्यभावश्च श्रुत्यभावादिति॥

अत्र दृष्टान्तत्वेन निर्गुणस्वरूपमुक्तम्, तत्र प्रमाणान्तरमाह—

दर्शयतश्चैवं प्रत्यक्षानुमाने॥ २०॥

एवं ब्रह्मणो निर्गुणत्वं श्रुतिस्मृती दर्शयतः; 'न तत्र

सूर्यो भाति' इत्याद्या श्रुतिः, 'न तद्भासयते सूर्यः' इत्याद्या स्मृतिरिति ॥

इतश्चोपासकस्यानिरङ्कुशमैश्वर्यमित्याह––

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

उपासकस्य उपास्यदेवतया सह भोगमात्रेण साम्यं श्रुतम्, न जगद्व्यापारेण; 'आपो वै खलु मीयन्ते लोकोऽसौ' इत्यादौ। तस्मात्साम्यलिङ्गाद्विदुषः सातिशयमैश्वर्यं गम्यत इत्यर्थः ॥

ननु यद्यैश्वर्यं सातिशयं स्यात्, तर्हि लौकिकैश्वर्यवदनित्यं स्यात्; एवं च विदुषामावृत्तिः प्रसज्येतेत्याशङ्क्य परमकृपालुर्भगवान्बादरायणः समादधाति––

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

ये अर्चिरादिमार्गेण ब्रह्मलोकं प्राप्ताः, तेषामनावृत्तिरेव; 'न च पुनरावर्तते' इत्यादिक्रममुक्त्यभिधायकशब्दादित्यर्थः । निर्गुणब्रह्मविदां त्वावृत्तिशङ्कैव नास्ति, यतः सगुणविदामपि निर्गुणाश्रयणेनैवानावृत्तिर्नान्यथा । तस्माद्ब्रह्मविदां निरस्तसमस्तप्रपञ्चस्वप्रकाशचिदेकरसनिरतिशयानन्दात्मनावस्थितिरि-

त्यतिशोभनम् । ‘अनावृत्तिः शब्दात्’ इति सूत्रावृत्तिः शास्त्रसमाप्तिद्योतनार्था ॥

यज्ज्ञानाज्जीवतो मुक्तिरुत्क्रान्तिर्गतिरुत्तरा ।
ब्रह्मप्राप्तिः प्रत्यपादि तदस्मि ब्रह्म चिद्घनम् ॥

यस्यापाङ्गनिरीक्षणाद्भवरतिं भीतिप्रदामुज्जह-
त्र्य्यन्तार्थविमर्शनाद्धतमहामायोऽभवं संततम् ।
तं शुद्धाद्वयबुद्धमुक्तमनघं कारुण्यपूर्णं शिवं
पूर्णानन्दमहाप्रभावमतुलं वन्दे गुरुं शाश्वतम् ॥

जडः क्वाहं बालः क्व च गहनवेदान्तसरणि-
स्तथाप्याम्नायार्थं परमशिवयोगीन्द्रकृपया ।
विजानन्व्याख्यानं व्यरचयमहं वेदशिरस-
स्तदेतत्क्षन्तव्यं मयि सदयदृष्ट्या बुधजनैः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीपरमशिवेन्द्रसरस्वतीपादाब्ज-
सेवापरायणेन श्रीसदाशिवेन्द्रसरस्वत्या विरचितायां
ब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्वप्रकाशिकायां
चतुर्थोऽध्यायः ॥

अकारादिक्रमेण

॥ सूत्रानुक्रमणिका ॥

सूत्रानुक्रमणिका ॥